No. १५८५

Title कारिकावली सिद्धान्त मुक्तावली समाख्य टीका युता

Author विश्वनाथ पञ्चानन:

Extent ४४ Age x

Subject न्याय वैशेषिकं

कारिकावली सिद्धांतमुक्तावली समाख्यटीका सहिता

१५८५

प. ४४

।मुक्तावलीपुस्तकम्।

ननु ग्रन्थादौ ग्रन्थस्य प्रयोजनादि वक्तव्यं भवति तस्य चेतानुक्तत्वात् उपे क्षणीयत्वं तस्य ग्रन्थस्य संबन्धाभिधायकविषयप्रयोजनाभावे ... इत्याशयेनाह निजेत्यादि त
व्यम् अत्र सकलपदार्थप्रतिपादकतयाकर्ण्यता ... नन्वस्य सकलपदार्थप्रतिपादकत्वं दर्शनेन परिहरन्त्यकरोऽपि य ग्रन्थो विद्वद्भिरादरणीयः ॥

सि॰ मु॰ १

स्वरूपासिद्धिवारणाय मङ्गलं न समाप्ति कारणं समाप्त्यपि कारणं तु अभावप्रति योगिनां यद्य दपि कारणं भावप्रतियोगि तत्तत्कारणम्

ॐ श्रीगणेशाय नमः ॥ ॐ चूडामणीकृतविधुर्वलयीकृतवासुकिः भवो भवतु भव्याय लीलाताण्डवपण्डितः १ निजनिर्मितकारिका
वलीमतिसंक्षिप्तचिरंतनोक्तिभिः विशदीकरवाणि कौतुकान्ननु राजीवदयावशंवदः २ सद्रव्या गुणगुम्फिता सुकृतिनां सत्कर्मणा ज्ञा
पिका सत्सामान्यविशेषनित्यमिलिताभावप्रकर्षोज्ज्वला विष्णोर्वक्षसि विश्वनाथकृतिना सिद्धान्तमुक्तावली विन्यस्ता मनसो मुदं
वितनुतां सद्युक्तिरेषा चिरम् ३ विघ्नविघातायकृतं मङ्गलं शिष्यशिक्षायै निबध्नाति नूतनजलधररुचये गोपवधूटीदुकूलचौराय त
स्मै कृष्णाय नमः संसारमहीरुहस्य बीजाय १ ननु मङ्गलेन विघ्नध्वंसं प्रति न वा समाप्तिं प्रति कारणत्वं विनापि मङ्गलं नास्तिकादिग्रन्थे
निर्विघ्नपरिसमाप्तिदर्शनादिति चेन्न श्रुतिविहितशिष्टाचारविषयत्वेन मङ्गलस्य सफलत्वे सिद्धे तच्च फलं निराकाङ्क्षायां सम्भवति दृष्ट
फलकत्वे दृष्टकल्पनाया अन्याय्यत्वादुपस्थितत्वात्समाप्तिरेव फलं कल्प्यते इत्थं च यत्र मङ्गलं न दृश्यते तत्रापि जन्मान्तरीयं तत्कल्प्यते
यत्र च [illegible] सत्यपि मङ्गले समाप्तिर्न दृश्यते तत्र बलवत्तरो विघ्नो विघ्नप्राचुर्यं वा बोध्यम् प्रचुरस्यैव बलवत्तरविघ्ननिवारणे कार
णत्वं बोध्यं विघ्नध्वंसस्तु मङ्गलस्य द्वारमित्याहुः नव्यास्तु मङ्गलस्य विघ्नध्वंस एव फलं समाप्तिस्तु बुद्धिप्रतिभादिकारणकलापात् नैवं स
तः सिद्धविघ्नविरहवता कृतस्य मङ्गलस्य निष्फलत्वापत्तिरिति वाच्यम् इष्टापत्तेः विघ्नशङ्कया तदाचरणात् तथैव शिष्टाचारात् न
च तस्य निष्फलत्वे तद्बोधकवेदाप्रामाण्यम् सति विघ्ने तन्नाशस्यैव वेदबोधितत्वात् अत एव पापभ्रमेण कृतप्रायश्चित्तस्य निष्फलत्वेऽपि
न तद्बोधकवेदाप्रामाण्यम् मङ्गलं च विघ्नध्वंसविशेषे कारणम् विघ्नध्वंसविशेषे च विनायकस्तवपाठादिः क्वचिच्च विघ्नात्यन्ताभाव ए
व समाप्तिसाधनं प्रतिबन्धकसंसर्गाभावस्यैव कार्यजनकत्वात् इत्थं च नास्तिकादिग्रन्थेषु जन्मान्तरीयमङ्गलजन्यो विघ्नध्वंसः स्वतः
सिद्धविघ्नात्यन्ताभावो वास्तीति न व्यभिचार इत्याहुः ॥ संसारेति संसार एव महीरुहो वृक्षस्तस्य बीजाय निमित्तकारणायेत्यर्थः एतेनेश्व
रे प्रमाणमपि दर्शितं भवति तथाहि यथा घटादिकार्यं कर्तृजन्यं तथा क्षित्यङ्कुरादिकमपि न च तत्कर्तृत्वमस्मदादीनां संभवतीत्यतस्त
त्कर्तृत्वेनेश्वरसिद्धिः न च शरीराजन्यत्वेन कर्त्रजन्यत्वसाधकेन सत्प्रतिपक्ष इति वाच्यम् अप्रयोजकत्वात् सकर्तृकत्वेन कार्यत्वेन कार्य

यत्र यस्य सिद्धौ तेन य तस्तु तच्छमदर्पण मिति भगवद्गीतेयं मा वलीसमं सुकीयं ग्रं श्रीभगवति चार्पय त्यकीर्त्यि ... ग्रन्थस्य समस्तनाम विघ्नाति ॥ = २ मङ्गलेति

प०

पदार्थान्विभजते ।

कारणभावएवानुकूलस्तर्कः द्यावाभूमीजनयन्देवएको विश्वस्य कर्ता भुवनस्य गोप्ता इत्यादयआगमाश्चात्र संपेयाः ॥१॥ इदं शास्त्र
स्याकर्मसामान्यसविशेषकम् समवायस्तथाभावः पदार्थाः सप्तकीर्तिताः ॥२॥ सप्तसूत्राभावत्वकथनादेव षट्त्वंभावत्वंप्राप्तम् तेनभावत्वेन
एवानुपन्यासोनन्यूनत्वः एतेचपदार्थावैशेषिकप्रसिद्धाः नैयायिकानामप्यविरुद्धाः प्रतिपादितश्चैवमेवभाष्ये अतएवोपमानचिन्तामणौ
सप्तपदार्थभिन्नतयाशङ्कितः सादृश्यस्यवातिरिक्तपदार्थत्वमाशङ्कितम् ननुकथमेतएवपदार्थाः शक्तिसादृश्यादीनामतिरिक्तपदार्थत्वात्
तथाहि मण्यादिसमवहितेनवह्निनादाहोनजन्यते तद्भूत्येनजन्यते तत्रमण्यादिनावह्नौदाहानुकूलाशक्तिर्नाश्यते उत्तेजकेनमण्या
द्यपसारणेनचजन्यतेइतिकल्प्यते एवंसादृश्यमप्यतिरिक्तपदार्थः सद्भिन्नद्रव्यत्वेष्वन्तर्भवतिसामान्येऽपिसत्त्वात् यथागोत्वेनित्यत्वंतथाश्व
त्वमपीतिसादृश्यप्रतीतेः नाप्यभावे सत्त्वेनप्रतीयमानत्वादितिचेन्न मण्याद्यभावविशिष्टवह्न्यादेर्दाहादिकंप्रतिमण्याद्यभावादेर्वा
कारणत्वंकल्प्यते सर्वत्रैवसामञ्जस्येनान्यशक्तितत्प्रागभावध्वंसकल्पनागौरवात् नचोत्तेजकेसतिप्रतिबन्धकसद्भावे
दाहःस्यादितिवाच्यम् उत्तेजकाभावविशिष्टमण्यभावस्यकारणत्वात् सादृश्यमपिनपदार्थान्तरम् किंतुतद्भिन्नत्वेसतितद्गतभू
योधर्मवत्त्वम् यथाचन्द्रभिन्नत्वेसतिचन्द्रगताह्लादकत्वादिमत्त्वंमुखेचन्द्रसादृश्यमिति ॥ द्रव्याणिविभजते क्षितिरप्तेजोमरुद्व्योमकाल
दिग्देहिनोमनः ॥ द्रव्याणिक्षितिःपृथिवीआपोजलानितेजोवह्निःमरुद्वायुःव्योमआकाशः देहीआत्मा दिक्कालमनांसिप्रसिद्धानिनव
द्रव्याणीत्यर्थः ननुद्रव्यत्वजातौकिंमानम् नहिप्रत्यक्षेणतत्रप्रमाणम् तत्रतेजःप्रभृतिष्वद्रव्यत्वाग्रहादितिचेन्न कार्यसमवायिकारण
तावच्छेदकतयासंयोगस्यविभागस्यवासमवायिकारणतावच्छेदकतयावाद्रव्यत्वजातिसिद्धेरिति ननुदशमंद्रव्यंतमःकुतोनो
क्तम् नहिप्रत्यक्षेणतत्सिद्धेस्तेनसाचरूपवत्त्वात्कर्मवत्त्वाच्चद्रव्यम् नहिगन्धशून्यत्वात्पृथिवी नीलरूपवत्त्वाच्चनजलादिकम् तस्यरूपदर्शने
चालोकनिरपेक्षंचक्षुःकारणमितिचेन्न आवश्यकतेजोऽभावेनोपपत्तौद्रव्यान्तरकल्पनायामनायुक्तत्वात् रूपवत्ताप्रतीतिस्तुभ्रमरू
पा कर्मप्रतीतिरपिआलोकापसारणोपाधिकीभ्रान्तिरेव तमसोऽतिरिक्तत्वेनीलाद्यवान्तरकल्पनागौरवंस्यात् एवंगुणस्ययथातेज(

एतदीनामः पाठान्तरम्

चकारोवाकारार्थः

२५

तमोभावस्तेजःप्रतिभवति ... ॥२॥

... ॥५॥

प०

वृत्ती ८

जतु ... पाठान्तरं

आदिनोपनिषदंसपरिग्रहः ॥१

गुणान्विभजते.

गुणानिरूपणंकरोति २

व्यक्तेरभेदइति एकव्यक्तिकत्वमाकाशादेर्जातित्वबाधकमित्यर्थः तुल्यत्वं तुल्यव्यक्तिवृत्तित्वं घटत्वकलशत्वादीनां नाना
भेदे दस्तुतस्तुल्यत्वं तुल्यव्यक्तिवृत्तित्वं सभिन्नजातिसमनियतत्वमिति यावत् तच्च जातिबाधकमेवेतिध्येयम् संकर
श्च परस्परात्यन्ताभावसमानाधिकरणयोर्धर्मयोरेकत्र समावेशः भूतत्वादेर्जातित्वे भूतत्वं विहाय मनसि वर्तमानस्य मूर्तत्व
स्य मूर्तत्वं विहाय गगने वर्तमानस्य भूतत्वस्य च पृथिव्यादिवृत्तित्वेसत्वात् ननु सांकर्यस्य जातिबाधकत्वे किं मानमिति चेत् स्व
समानाधिकरणस्वाभावसमानाधिकरणोभयसंबंधेन जातिविशिष्टजातिनावच्छेदेन स्वसमानाधिकरणाभावप्रतियोगिताभाव

संतभावस्तथापरत्वे । अथगुणारूपंरसोगन्धस्ततःपरम् २ स्पर्शःसंख्यापरिमितिःपृथक्त्वंचततःपरम् संयोगश्चविभागश्चप
रत्वंचापरत्वकम् ३ बुद्धिःसुखंदुःखमिच्छाद्वेषोयत्नोगुरुत्वकम् द्रवत्वंस्नेहसंस्कारावदृष्टंशब्दएवच ४ एतेगुणाश्चतुर्विंशतिसं
ख्याकाः कणादेनकण्ठतश्चशब्देनचदर्शिताः नत्रगुणत्वजातिसिद्धिरेवस्यात् कर्माणिविभजते उत्क्षेपणंततोऽपक्षेपणमाकुञ्च
नंतथा प्रसारणंचगमनंकर्माण्येतानिपंचच ६ कर्मत्वजातिस्त्वेषामेवसिद्धा एवमुत्क्षेपणत्वादिकमपि ननुभ्रमणादिकमपिपृथ
क्कुतोधिकमयाकृतोनोक्तमतआह भ्रमणंरेचनंस्यन्दनोर्ध्वज्वलनमेवच तिर्यग्गमनमप्यत्रगमनादेवलभ्यते ७ सामान्यंवि
भजते सामान्यंद्विविधंप्रोक्तंपरंचापरमेवच ८ तल्लक्षणंतुनित्यत्वेसत्यनेकसमवेतत्वम् अनेकसमवेतत्वंसंयोगादीनामप्यस्ति
अतउक्तं नित्यत्वेसतीति नित्यत्वेसतिसमवेतत्वंगगनपरिमाणादीनामप्यस्तिअतउक्तमनेकेति नित्यत्वेसत्यनेकवृत्तित्वमत्यन्ताभावे
ऽप्यस्तिअतोवृत्तिसामान्यंविहायसमवेतत्वमुक्तम् एकमात्रव्यक्तिवृत्तिस्तुनजातिः तेषांबाधकम् व्यक्तेरभेदस्तुल्यत्वंसंकरोथानवस्थि
तिः रूपहानिरसंबंधोजातिबाधकसंग्रहः द्रव्यादित्रिकवृत्तिस्तुसत्तापरतयोच्यते ९ परभिन्नातुयाजातिःसैवापरतयोच्यते
[illegible] द्रव्यत्वादिकजातिस्तुपरापरतयोच्यते १० परत्वमधिकदेशवृत्तित्वमपरत्वमल्पदेशवृत्तित्वम्
सकलजात्यपेक्षयाअधिकदेशवृत्तित्वात्सत्तायाःपरत्वम् तदपेक्षयान्यासांजातीनामपरत्वम् व्यापकत्वात्परापिसत्ताव्याप्यत्वात्
परापिच पृथिवीत्वाद्यपेक्षयाव्यापकत्वादधिकदेशवृत्तित्वात्परत्वम् सत्तापेक्षयाव्याप्यत्वादल्पदेशवृत्तित्वाद्द्रव्यत्वादेरपरत्वम् वि
शेषंनिरूपयति अन्त्योनित्यद्रव्यवृत्तिर्विशेषःपरिकीर्तितः ११ अन्तेऽवसानेवर्तन्तइत्यन्त्याः यदपेक्षयाविशेषोनास्तीत्यर्थः घटादीनांद्व्यणु
कपर्यन्तानांतत्तदवयवभेदात्परस्परंभेदः परमाणूनांपरस्परभेदकोविशेषएव सतुस्वतएवव्यावृत्तः तेनतत्रविशेषान्तरापेक्षाना
स्तीतिभावः समवायंदर्शयति घटादीनांकपालादौद्रव्येषुगुणकर्मणोः तेषुजातेश्चसंबंधःसमवायःप्रकीर्तितः १२ अवयवाव
यविनो[illegible]र्गुणगुणिनोः क्रियाक्रियावतोर्नित्यद्रव्यविशेषयोःसंबंधःसमवायः समवायत्वंनित्यसंबंधत्वम् तत्रप्रमाणं

जातिव्यक्त्योः

चकारान्नित्यद्रव्यविशेषयोःसंबंधोग्राह्यते ।

[illegible] समवायः स्वचित्यादिना [illegible]

तादात्म्यसंबंधेन

द्रव्ययोरेव संयोगः इति नियमात् अत्र समवायसंबंधेन घटत्वावच्छिन्नप्रतियोगिताकत्वेनहेतुत्वात् कार्यतावच्छेदक
संबंधविषयासमवायसिद्धिः न च समवायस्यापि स्वरूपसंबंधेन निवेशे कार्यकारणभावः कल्पनीय इति वाच्य
म् तथा समवेतं कार्यमुत्पद्यते इत्यादि समवायिकारणप्रवृत्त्यनन्तरात् न च यत्संबंधि कार्यतापद्यते तत्स
मवायिकारणमेवास्त्विति वाच्यम् कपालसंबंधिघटध्वंसप्रति कपालस्य समवायिकारणत्वप्रसंगात् = ३
अयुतसिद्धयोः स्वरूपसंबंध इति वदतः परस्येति दोषः = २ अनभिमतार्थसिद्धिरर्थान्तरम् = १

रूपनिरूपित वृत्तिविशिष्टसमवायनिरूपिताधिकरणतायाएव रूपसंबंधत्वात् स्यैवाभाव
भावात् पृथिव्यां गन्धसमवायो न जले इत्यादिप्रतीतेः समवायस्य नानात्वमिति नव्याः = ३
घटाभाववद्भूतलमिति तात्कालीनं घटस्य भूतले घटाभावबुद्धिर्न तद्भूतलादिकं तस्य घटाभावस्य तत्र स्यैवेष्टेः = ६ इदानीं स्वरूपसंबंधविशे
प्रतिबंधकीभूत घटवत्तानविरहदशायां च घटानीतकाले तद्वटे तत्पर्यभावप्रतीतिः स्यादेव अभावभूतलतत्संबंधात्मनः स्वरू
पसंबंधसामान्यस्य तत्र सत्त्वात् = ६

गुणक्रियादिविशिष्टबुद्धिः विशेषणविशेष्यसंबंधविषया विशिष्टबुद्धित्वात् दण्डी पुरुष इति विशिष्टबुद्धिवदित्यनुमानेन संयोगा ।
द्विबाधात्समवायसिद्धिः ॥ न च स्वरूपसंबंधेन सिद्धसाधनम् अर्थान्तरं वा ॥ अनन्तस्वरूपाणां सम्बन्धत्वकल्पने गौरवात् लाघवादेकसम
वायसिद्धिः ॥ न च समवायस्यैकत्वे वायौ रूपवत्ताबुद्धिप्रसंगः ॥ तत्र रूपसमवायसत्त्वेऽपि रूपाभावात् ॥ न चैवमभाववैशिष्ट्यस्यापि वै
शिष्ट्यसंबंधान्तरसिद्धिरिति वाच्यं ॥ तस्य नित्यत्वे भूतले घटानयनानन्तरमपि घटाभावबुद्धिप्रसंगात् घटाभावस्य तत्र सत्त्वात् । तै
स्य च नित्यत्वात् ॥ अन्यथा एतेषां तत्र विशिष्टप्रतीतिनियमात् ॥ वैशिष्ट्यस्य च तत्र संबंधत्वात् ॥ ममत्व चेत्पाकरक्ततादशायां घटश्यामरूपस्य नष्ट ।
त्वात् तत्र तद्बुद्धिः ॥ वैशिष्ट्यस्यानित्यत्वे अनन्तवैशिष्ट्यकल्पने तु गौरवं ॥ एवं च तेन तत्कालीनभूतलादिकं तद्घटाभावानां सं ।
बंधः ॥ अभावं विभजते ॥ अभावस्तु द्विधा संसर्गान्योन्याभावभेदतः ॥ अभावत्वं द्रव्यादिषट्कान्योन्याभाववत्त्वम् ॥ संसर्गेति ॥ संसर्गाभा ।
वान्योन्याभावभेदादित्यर्थः ॥ अन्योन्याभावस्यैकविधत्वात् द्विभागाभावात् संसर्गाभावं विभजते ॥ प्रागभावस्तथा ध्वंसोऽप्यत्यन्ताभा
व उच्यते ॥ २ ॥ एवं त्रैविध्यमापन्नः संसर्गाभाव इष्यते ॥ संसर्गाभावत्वम् अन्योन्याभावभिन्नाभावत्वम् ॥ अन्योन्याभावत्वं तादात्म्यसंबंधाव
च्छिन्नप्रतियोगिताकाभावत्वम् ॥ विनाश्यभावत्वं प्रागभावत्वम् ॥ जन्याभावत्वं ध्वंसत्वम् ॥ नित्यसंसर्गाभावत्वम् अत्यन्ताभावत्वम् ॥ घटे र ।
न च भूतले यदा घटादिकमपसारितं पुनरानीतं च तत्र घटरूपकालस्य संबंधावच्छेदकत्वात् तदत्यन्ताभावस्यानित्यत्वेऽपि तद्घटकालेन घटात्यन्ताभा
वबुद्धिः ॥ न चोत्पत्तिविनाशशाली चतुर्थोऽयमभाव इति केचित् ॥ अत्र ध्वंसप्रागभावाधिकरणे नात्यन्ताभाव इति प्राचां मतम् ॥ श्याम
घटे रक्तो नास्ति रक्ते घटे श्यामो नास्तीति धीः प्रागभावध्वंसावगाहते ॥ न तु तदत्यन्ताभावम् ॥ नव्यास्तु तत्र विरोधे मानाभावात् ॥ ध्वं ।
सादिकालावच्छेदेनात्यन्ताभावो वर्तत इत्याहुः ॥ न चैवमभावानामधिकरणात्मकत्वं लाघवादिति चेन्न ॥ अनन्ताधिकरणात्मकत्व
कल्पनापेक्षया अतिरिक्तकल्पनाया एव लघीयस्त्वात् ॥ एवं चाधाराधेयभावोऽप्युपपद्यते ॥ एवं च तत्र ज्ञानग्रहणस्य साध्यभावानां तथा
त्वमुपपद्यते ॥ अन्यथा तत्तदधिकरणानां तत्तदिन्द्रियाग्राह्यत्वात् अप्रत्यक्षत्वं स्यात् ॥ एतेन ज्ञानविशेषकालविशेषात्मकत्वमभावा ।

लाघवादिति पर्याप्तिसंबंध
नाविनाकृतयोः समवायो
ऽयं लाघवात् अप्रीति = २
समवायस्य संयोगत्वेऽपि वायो
रूपवत्त्वसिद्धिः = २
घटवत्ति भूतले = ४
घटाभावस्य
नित्यत्वाभ्युपगमपक्षे = ५

संबंधान्तरमिति
प्रतियोगिकृपदार्थतये विशेष = ४

संबंधान्तरस्य = ४
घटाभावस्यानित्यत्वे = ५ एषां
तरकालतिवसत्त्वपदेशोपि = ५
अन्तरत्वावच्छिन्नाभावसंबंधत्वात् =
वै

नन्वत्यन्ताभावस्यानित्यत्वे
तद्घटानयनानन्तरमपि भूतले
घटो नास्तीति प्रतीतिः स्यादि
ति तत्राह तत्रेति = १

ध्वंसप्रागभावयोः इति
भावेन सह =

नैयोविरोधात्
मानाभावात् = ४
ध्वंसप्रागभावयोरत्यन्ताभा
वेन सह विरोधे = ४

एवं च

केचित्तु नैयायिकाः स्वरसतः का
लविशेषाविशिष्टस्वरूपस्य
ससर्गा योग्यमात्रेति
ते नास्तीति संसर्गाभावे प्रत्यक्षो
न तदर्थसंसर्गाभावे मानाभाव
इति = ४

अभावस्याधिकरणात्मकत्वे = १ कालादीनां = १ चक्षुरादिः = १
अधिकरणपेक्षया तिरिक्तत्वसिद्धेः = २
ज्ञानाद्यभावत्वेन रूपस्य प्रतीतेः = १

को

एवं द्रव्यादयः पञ्चेति उद्देश्यपदद्वयं भावा अनेके इति विधेयपदद्वयं तत एव भावत्वे सति अनेकत्वम् न तु पञ्चानां भावानाम्=५

सोऽतिप्रसक्तः ॥ अप्रसक्तत्वापत्तेः ॥ इदानीं पदार्थानां साधर्म्यवैधर्म्ये वक्तुमुपक्रमते ॥ सप्तानामपि साधर्म्यं ज्ञेयत्वादिकमुच्यते ॥ १२ ॥ समानो धर्मो येषां ते
णां ते सधर्माणः तेषां भावः साधर्म्यं समानो धर्म इति फलितोऽर्थः ॥ विरुद्धो धर्मो येषां ते विरुद्धधर्माणः तेषां भावो वैधर्म्यं विरुद्धो धर्म इति फ
लितोऽर्थः ॥ ज्ञेयत्वं ज्ञानविषयता ॥ सा च सर्वत्रैवास्ति ॥ ईश्वरज्ञानविषयतायाः केवलान्वयित्वात् ॥ एवमभिधेयत्वप्रमेयत्वादिकं बोध्यम् ॥ द्रव्या
दयः पञ्च भावा अनेके समवायिनः ॥ द्रव्यगुणकर्मसामान्यविशेषाणां साधर्म्यमनेकत्वं समवायित्वं च ॥ यद्यप्यनेकत्वमभावेऽप्यस्ति तथा
प्यनेकत्वे सति भावत्वम् ॥ तथा चानेकभावत्वं द्विपदार्थविभाजकोपाधिमत्त्वमिति फलितोऽर्थः ॥ तेन प्रत्येकं घटादावाकाशादौ च नाव्याप्तिः ॥
समवायित्वं समवायसंबन्धेन संबन्धित्वम् ॥ न तु समवायित्वं ॥ सामान्यादावभावात् ॥ समवेतत्वं द्विपदार्थविभाजकोपाधिमत्त्वमिति फ
लितोऽर्थः ॥ तेन नित्यद्रव्येषु समवेतत्वाभावेऽपि नाव्याप्तिः ॥ सत्तावन्तस्त्रयस्त्वाद्याः ॥ द्रव्यगुणकर्मणां सत्तावत्त्वमित्यर्थः ॥ गुणादिर्निर्गुणक्रि
यः ॥ १४ ॥ यद्यपि गुणक्रियाशून्यत्वमाद्यक्षणे घटादावतिव्याप्तम् ॥ क्रियाशून्यत्वं च गगनादावतिव्याप्तम् ॥ तथापि गुणवद्वृत्तिधर्मव
त्कर्मवद्वृत्तिपदार्थविभाजकोपाधिमत्त्वं च तदर्थः ॥ न हि घटत्वादिकं द्रव्यत्वं वा गुणवद्वृत्तिकर्मवद्वृत्तिभिन्नं ॥ किन्तु गुणत्वादिकं त
था ॥ आकाशत्वादिर्न पदार्थविभाजकोपाधिः ॥ सामान्यपरिहीनास्तु सर्वे जात्यादयो मताः ॥ सामान्यानधिकरणत्वं सामान्यादीनां
मित्यर्थः ॥ पारिमाण्डल्यभिन्नानां कारणत्वमुदाहृतम् ॥ १५ ॥ पारिमाण्डल्यमणुपरिमाणं कारणत्वं तद्भिन्नानामित्यर्थः ॥ अणुपरि
माणं न कस्यापि कारणम् ॥ तद्धि स्वाश्रयारब्धद्रव्यपरिमाणारम्भकं भवेत् ॥ तच्च न संभवति ॥ परिमाणस्य स्वसमानजातीयोत्कृष्टप
रिमाणजनकत्वनियमात् ॥ महदारब्धस्य महत्तरत्ववदणुजन्यस्याणुतरत्वप्रसङ्गात् ॥ एवं परममहत्परिमाणमतीन्द्रियसामान्यं विशेषाश्च
बोध्याः ॥ आत्ममानसप्रत्यक्षे आत्मपरममहत्त्वस्यापि कारणतायाः परममहत्परिमाणमाकाशादेर्बोध्यम् ॥ तेषामपि नैकारणत्वमित्या
चार्याणामाशयस्त्वन्ये ॥ तत्र ज्ञानातिरिक्तं प्रत्येकारणतायां चार्यैकत्वात् ॥ इदमपि योगिप्रत्यक्षे विषयस्य न कारणत्वम् ॥ ज्ञा
यमाने सामान्यं न प्रत्यासत्तिः ॥ ज्ञायमानं लिङ्गं नानुमितिकारणमिति अभिप्रायेणोक्तम् ॥ नन्वकारणत्वं किमत आह ॥ अन्यथासिद्धिशून्यस्य

गुणत्वादिकं कण्ठ
कारणत्वं चान्यथा पारिमाण्डल्यादिभ्य इति भाष्ये आदिग्रहणात् परममहत्त्वादि ग्राह्यं ते इत्याचार्यव्याख्या आशयः परममहत्त्वस्य विशेषग्रहणात् मनसम्पर्क कारणत्वं च तात्पर्ये तत्र भावकार्यं पि तत्ये आचार्यग्रन्थे नैव विरोधात् आचार्यमतमपि न सम्पर्क ज्ञानादीनां जनकत्वेन पारिमाण्डल्यादि स्पष्टत्वात् दोषे जनि तावयवविभागादिद्वयादेः पाकजपरमाणुद्व्यणुकादेः ज्ञानानां केषां कारणत्वस्वीकारे साधर्म्यादिलक्षणानुपपत्तेः=५

आदिनाभिधेयत्वशब्दवाच्यत्वका लसंबंधित्वम्=२

द्रव्यत्वादिः=६

अतीन्द्रियद्रव्यगतं सामान्यम्=४

ननु योगज धर्मस्यैव प्रत्येकारणत्वात् तेनान्यथासिद्धत्वविषयस्यापि तेनैव प्रत्यक्षत्वे=२

किन्तु सामान्यज्ञानं=१
किन्तु लिङ्गज्ञानम्=१
अतीन्द्रियसामान्यमपि=१ ननु भवद्भिः ममसंगतं पारिमाण्डल्यादीनामपि योगिप्रत्यक्षजनकत्वादित्यत आह इदमपीति=२

तुरीतन्तुसंयोगस्तु पटं प्रति नासमवायिकारणं ... = ५

स्यनियतापूर्ववर्तिता ॥ कारणत्वं भवेत्तस्य त्रैविध्यं परिकीर्तितम् ॥ १६ ॥ समवायिकारणत्वं ज्ञेयमथाप्यसमवायिहेतुत्वम् ॥ एवं न्या
यनयपैस्तृतीयमुक्तं निमित्तहेतुत्वम् ॥ १७ ॥ यत्समवेतं कार्यं भवति विहि समवायिजनकं तत् ॥ तत्रासन्नं जनकं द्वितीयमाभ्यां परं तृ
तीयं स्यात् ॥ १८ ॥ तस्य कारणत्वस्य ॥ त्रेधेति समवायिकारणे प्रत्यासन्नं कारणं द्वितीयमसमवायिकारणत्वमित्यर्थः ॥ अत्र यद्यपि
तुरीतन्तुसंयोगे पटासमवायिकारणत्वं स्यात् ॥ एवं वेगादीनामपि चाभिघातासमवायिकारणत्वं स्यादेवं ज्ञानादिकमपि कार्येऽसम
वायिकारणं स्यात्तथापि पटासमवायिकारणलक्षणे तुरीतन्तुसंयोगादिभिन्नत्वं देयम् ॥ तुरीतन्तुसंयोगस्तु तुरीपटसंयोगं प्रत्यस
मवायिकारणं भवत्येव ॥ एवं वेगादिकमपि वेगस्यन्दनाद्यसमवायिकारणं भवत्येव ॥ तत्तत्कार्यासमवायिकारणलक्षणे तत्त
द्भिन्नत्वं देयम् ॥ आत्मविशेषगुणानां तु क्वाप्यसमवायिकारणत्वं नास्ति ॥ तेन तद्भिन्नत्वं सामान्यलक्षणे देयमेव ॥ अत्रासमवायि
कारणे प्रत्यासन्नं द्विविधम् ॥ कार्यैकार्थप्रत्यासत्त्या कारणैकार्थप्रत्यासत्त्या च ॥ आद्यं यथा घटादिकं प्रति कपालसंयोगादिकं त
स्य हि कार्येण घटेन सह एकस्मिन् कपाले प्रत्यासत्तिरस्ति ॥ द्वितीयं यथा ॥ घटरूपं प्रति कपालरूपमसमवायिकारणम् ॥ तत्र घटरूपं प्र
ति कारणीभूतेन घटेन सह कपालरूपस्य एकस्मिन् कपाले प्रत्यासत्तिरस्ति ॥ समवायश्च क्वचित् स्वसमवायिसमवायसं
बन्धेनेति फलितोऽर्थः ॥ इत्थं च कार्यैकार्थकारणैकार्थान्यतरप्रत्यासत्त्या कारणं ज्ञानादिभिन्नमसमवायिकारणमिति सामान्यल
क्षणं पर्यवसन्नम् ॥ आभ्यां समवायिकारणासमवायिकारणाभ्यां परं भिन्नं कारणं तृतीयं निमित्तकारणमित्यर्थः ॥ इदानीमन्य
थासिद्धत्वमेव कियन्तां तदाह ॥ येन सह पूर्वभावः कारणमादाय वा यस्य ॥ अन्यं प्रति पूर्वभावे ज्ञाते यत्पूर्वभावविज्ञानम् ॥ १९ ॥ य
त्कार्यं प्रति कारणस्य पूर्ववर्तिता येन गृह्यते तेन तत्कार्यं प्रति तद्रूपमन्यथासिद्धमित्यर्थः ॥ यथा घटादिकं प्रति दण्डत्वादिक
मिति ॥ द्वितीयमाह ॥ यस्य स्वातन्त्र्येणान्वयव्यतिरेकौ न स्तः किं तु कारणमादायैवान्वयव्यतिरेकौ गृह्येते तदन्यथासिद्धम् ॥ य
था घटादिकं प्रत्याकाशस्य ॥ आकाशस्य हि घटादिकं प्रति कारणत्वमाकाशत्वेनैव स्यात् ॥ आकाशत्वं हि शब्दसमवायिका
रणत्वरूपं ॥ तृतीयमाह ॥ अन्यं प्रति पूर्ववर्तित्वं गृहीत्वैव यस्य यत्कार्यं प्रति पूर्ववर्तित्वं गृह्यते तस्य तत्कार्यं प्रत्यन्यथासिद्धत्वम् ॥ २ ॥

घटादिकं प्रति तेजस्त्वादिना हेतुत्ववारणाय अवश्यक्लृप्तमिति वह्निसामान्यं प्रति मणित्वादिना हेतुत्ववारणाय नियतपूर्ववर्तिन इति ॥६

अनन्तस्य ८ । गृहीत्वा ८ २ — कवत्वावत्कल्पने गौरवात् द्वितीयमवच्छेदकमाह ॥२

ननु

मु. व. ४ रणत्वमेव । शब्दं प्रति जनकत्वं गृहीत्वैव घटादिकं प्रति जनकत्वं गृह्यते तत् तदन्यथासिद्धं । शब्दाश्रयत्वेन तस्य कारणत्वे कान्यथा-

सिद्धिरिति चेन्न पंचमीति । यथाकाशस्य शब्दं प्रति जनकत्वे किमवच्छेदकमिति चेत् कवत्वादिकं विशेषपदार्थो वेति तदर्थम-

न्यथासिद्धमाह जनकं प्रति पूर्ववर्तितामपरिज्ञाय न यस्य गृह्यते अतिरिक्तमथापि यद्भवेन्नियतावश्यकपूर्वभाविनः । २ ।

५ दि. यत्कार्यजनकं प्रति पूर्ववर्तित्वं गृहीत्वैव यस्य यत्कार्यं प्रति पूर्ववर्तित्वं गृह्यते तत्तस्य तत्कार्यं प्रत्यन्यथासिद्धत्वम् यथा कुलालपि- ल

अतिरिक्तमिति तुर्घटं प्रति तस्य कुलालपितृत्वेन घटं प्रति जनकत्वेऽन्यथासिद्धिः कुलालत्वेन रूपेण जनकत्वे विशेषापत्तिः कुलालमात्रस्य घटं प्र-

ति जनकत्वात् पंचममाह अवश्यक्लृप्तनियतपूर्ववर्तिन एव कार्यसंभवे तद्भिन्नमन्यथासिद्धमित्यर्थः अत एव प्रत्यक्षे महत्त्वं — अनन्यथासि[illegible] पूर्ववर्तिन एवका[illegible] ६

कारणमनेकद्रव्यत्वमन्यथासिद्धम् तत्र हि महत्त्वमवश्यक्लृप्तं तेनानेकद्रव्यत्वमन्यथासिद्धम् न चैवं परीत्ये किं विनिगमकमि-

ति वाच्यम् महत्त्वजातेः कारणतावच्छेदकत्वे लाघवात् । एते पंचान्यथासिद्धा दण्डत्वादिकमादिमम् घटादौ दण्डरूपादि द्वितीयम-

प्यदर्शितम् २१ तृतीयं तु भवेद्व्योम कुलालजनकोऽपरः पञ्चमो रासभादिः स्यादेतेष्वावश्यकस्त्वसौ २२ घटादिकं प्रति रासभ- यद्वा

स्य नियतपूर्ववर्तित्वमस्ति तथापि तद्व्यक्तिं प्रति सिद्धकारणभावे दण्डादिभिरेव तद्व्यक्तेरपि संभवे रासभोऽन्यथासिद्ध इति भा-

वः एतेष्विति एतेषु पंचस्वन्यथासिद्धेषु मध्ये पंचमोऽन्यथासिद्ध आवश्यकः तेनैव सर्वेषां चरितार्थत्वात् तथा हि दण्डादि- अन्येषामनेनैव

भिरवश्यक्लृप्तनियतपूर्ववर्तिभिरेव कार्यसंभवे दण्डत्वादिकमन्यथासिद्धम् न चैवं परीत्ये किं विनिगमकमिति वाच्यम् दण्ड-

त्वस्य कारणत्वे दण्डघटितपरंपरायाः संबंधत्वकल्पने गौरवात् एवमन्येषामप्यनेनैव चरितार्थत्वं संभवति समवायिकारणत्वं

द्रव्यस्यैवेति विज्ञेयम् स्पष्टम् गुणकर्ममात्रवृत्तित्वेयमथाप्यसमवायिहेतुत्वम् अन्य समवायिकारणत्वं गुणकर्मभिन्नानां वैधर्म्यं

न तु गुणकर्मणोः साधर्म्यमित्यत्रैतात्पर्यम् अथवा समवायिकारणवृत्तिसत्ताभिन्नजातिमत्त्वं तदर्थः तेन तन्नाशादीनामसमवा- ज्ञे ४

यिकारणत्वविरहेऽपि नाव्याप्तिः अन्यत्र नित्यद्रव्येष्वप्याश्रितत्वमिहोच्यते नित्यद्रव्याणि परमाण्वाकाशादीनि विहायाश्रित

गुणकर्ममात्रवृत्तिसमवायिकारणत्वं [illegible] परतयाप्यसमवायिकारणत्वमिति ॥३

साधर्म्यप्रकरणे वैधर्म्यनिरूपणमयुक्तमिति मत्वाह अथवेति सत्ताभिन्नद्रव्यत्वरूपजातिमत्त्वं द्वयोः तिप्रसक्तमतो ह्यपेतं द्रव्यादित्रसत्ता-
मादायाऽव्याप्तिवारणाय सत्ताभिन्नेति तेनैव द्रव्यगुणान्यतरत्वरूपधर्ममादायाऽव्याप्तिवारणाय जातीति ॥२॥

कालिकविशेषणतासम्बन्धेन वृत्तित्वमिति परमार्थः तेन समवायस्य समवायेन वृत्तित्वाभावेऽपि न क्षतिः —

पृथक्त्वम्=२

(कालिकविशेषणतया)

त्वेसाधर्म्यमित्यर्थः आश्रितत्वं तु समवायसंबन्धेनान्यतरसंबन्धेन वृत्तिमत्वम् विशेषणतया कालेन नित्यानामपि कालो वृत्तेः इदानीं
द्रव्यस्यैव विशिष्य साधर्म्यं वक्तुमुपक्रमते क्षित्यादीनां नवानां तु द्रव्यत्वं गुणयोगिता ॥२४॥ साधर्म्यं क्षितिर्जलं तथा तेजः पवनो मन एव च
परापरत्वमूर्तत्वक्रियावेगाश्रया अमी ॥२५॥ पृथिव्यप्तेजोवायुमनसां परत्वापरत्ववत्त्वं मूर्तत्वं कर्मवत्त्वं वेगवत्त्वं च साधर्म्यम् न च यत्र घटा
दौ परत्वमपरत्वं वा नोत्पन्नं तत्राव्याप्तिरिति वाच्यम् परत्वादिसमानाधिकरणद्रव्यत्वव्याप्यजातिमत्त्वस्य विवक्षितत्वात् मूर्तत्वमपकृष्ट
परिमाणवत्त्वं तच्च तेषामेव गगनादिपरिमाणस्य कुतोऽप्यपकृष्टत्वाभावात् एवं कर्मवत्त्वं कर्मसमानाधिकरणद्रव्यत्वव्याप्यजातिम
त्त्वं वेगवत्त्वमपि द्रव्यत्वव्याप्यजातिमत्त्वं बोध्यम् कालखात्मदिशां सर्वगतत्वं परमं महत् क्षित्यादि पंच भूतानि चत्वारि स्पर्शवन्ति हि ॥२६॥
कालाकाशात्मदिशां सर्वगतत्वं सर्वमूर्तसंयोगित्वं परममहत्त्वं च परममहत्त्वं जातिविशेषः अपकर्षानाश्रयपरिमाणवत्त्वं वा क्षित्या
दीति पृथिव्यप्तेजोवाय्वाकाशानां भूतत्वम् तच्च बहिरिन्द्रियग्राह्यविशेषगुणवत्त्वम् अत्र ग्राह्यत्वं लौकिकप्रत्यक्षस्वरूपयोग्यत्वं बोध्यम् ।
तेन ज्ञातो घट इति प्रत्यक्षे ज्ञानस्योपनीतभानविषयत्वेऽपि आत्मनि नातिव्याप्तिः न च परमाणुविषयरूपादिमति परमाणावव्या
प्तिः न [illegible] विषयत्वयोग्यत्वात् महत्त्वलक्षणकारणतासंनिधानाच्च न दोषः अथवात्मावृत्तिविशेषगुणवत्त्वम् चत्वारीति पृथिव्य
प्तेजोवायूनां स्पर्शवत्त्वम् द्रव्यारम्भकत्वं चेत्यर्थः इति पृथिव्यप्तेजोवायुष्वेव द्रव्यारम्भकत्वम् न च द्रव्यानारम्भकेऽन्त्यावयवेऽव्याप्तिः ।
द्रव्यसमवायिकारणवृत्तिद्रव्यत्वव्याप्यजातिमत्त्वस्य विवक्षितत्वात् आकाशशरीरिणाम् अव्याप्यवृत्तिः क्षणिको विशेषगुण इष्यते ॥२७॥
आकाशात्मनाम् अव्याप्यवृत्तिक्षणिकविशेषगुणवत्त्वं आकाशस्य विशेषगुणः शब्दः स चाव्याप्यवृत्तिः यदा किंचिदवच्छेदेन शब्द उ
त्पद्यते तदा तदन्यावच्छेदेन तदभावस्यापि सत्त्वात् क्षणिकत्वं च तृतीयक्षणवृत्तिध्वंसप्रतियोगित्वं योग्यविभुविशेषगुणानां स्वोत्तरवर्ति
गुणनाश्यत्वात् प्रथमशब्दस्य द्वितीयशब्देन नाशः एवं ज्ञानादीनामपि ज्ञानादिकं हि यदात्मनि विभौ शरीरावच्छेदेनोत्पद्यते तदा घ
टाद्यवच्छेदेन तदभावोऽस्त्येव एवं ज्ञानादीनामपि क्षणिकत्वमपि अन्यं चाव्याप्यवृत्तिविशेषगुणवत्त्वं क्षणिकविशेषगुणवत्त्वं चार्थः

आकाशात्मवृत्तिव्याप्यसमानाधिकरणमिति ... परममहत्त्वसमानाधिकरणद्रव्यत्वव्याप्यजातिमत्त्वं ...

मु॰ द॰ ५

जय

पृथिव्यादौ रूपादिर्विशेषगुणोस्तीत्यव्याप्तिरित्यत आह॥ पृथिव्यादावव्याप्तिरिति संयोगादिरस्तीति विशेषगुणो लक्षणम् नच रूपादीनां
कदाचित्तृतीयक्षणे नाशसंभवात्तत्कालिकविशेषगुणवत्त्वं विभागादावतिव्याप्तमिति वाच्यम् चक्षुःसंयोगजन्यप्रत्यक्षजातिमद्विशेषगु
णवत्त्वस्य तदर्थत्वात्॥ अपेक्षाबुद्धिः क्षणत्रयं तिष्ठति क्षणचतुष्टयं तु न किमपि ज्ञानादिकं तिष्ठति रूपत्वादिकं तु क्षणचतुष्टयस्था
यि न पिरूपादौ वर्त्तत इति तद्व्युदासः॥ ईश्वरज्ञानस्य चक्षुःसंयोगजन्यत्वाज्ज्ञानत्वस्य तद्वृत्तित्वाज्जन्यलक्षणम् यद्वा आकाशजीवात्मनोः साधर्म्य
न स्याज्जन्येति न देयम्॥ द्वित्वादिकमादाय लक्षणसमन्वयात् परममहत्त्वस्य नाशाभावात् तल्लोहितादीनां नाशाभ्युपगमा
द्द्वित्वादीनामपि तेषां वारणाय विशेषेति विशेषणविशेषवाच्यम् रूपत्वादिकमादाय लक्षणसमन्वयात् रूपद्रवत्वप
त्यक्षयोग्यत्वं शृणु मालयः पृथिव्यप्तेजसो रूपवत्त्वं द्रवत्ववत्त्वं प्रत्यक्षविषयत्वं चेत्यर्थः नच चक्षुरादीनां भर्जनकपालस्थवह्नेरूपाणा
मरूपवत्त्वे किं मानमिति वाच्यम् तत्रापि तेजस्त्वेन रूपानुमानात् एवं चक्षुरादीनां पृथिवीजलत्वेभागानामपि पृथिवीत्वादिनानुमा
नुमानेन बोध्यम् नच वह्न्यादौ द्रुतसुवर्णादिभिन्ने तेजसि द्रवत्वमव्याप्तमिति वाच्यम्॥ द्रवत्ववद्वृत्तिद्रव्यत्वव्याप्यजातिमत्त्वस्य विवक्षि
तत्वात् घृतजतुप्रभृतिषु पृथिवीषु जलेषु द्रुतसुवर्णादौ तेजसि च द्रवत्वसत्त्वान्न च पृथिवीत्वादिकमादाय सर्वत्र लक्षणसम
न्वयः नच प्रत्यक्षविषयत्वं परमाण्वादावव्याप्तमिति पृथिव्यादौ रूपादिविति वाच्यम् चाक्षुषप्रत्यक्षविषयवृत्तिद्रव्यत्वव्याप्यजातिम
त्त्वस्य विवक्षितत्वात् आत्मन्यतिव्याप्तिवारणाय चाक्षुषेति गुरुत्ववती हेत्वमवती गुरुत्ववत्त्वं रसवत्त्वं च पृथिवीजलयोरित्यर्थः नच
घ्राणेन्द्रियादीनां वायवीयानीतपार्थिवभागानां च रसादिमत्त्वे किं मानमिति वाच्यम् तत्रापि पृथिवीत्वादिनानुमानात् द्वयोर्नैमि
त्तिको द्रवः पृथिवीतेजसोरित्यर्थः नच नैमित्तिकद्रवत्वं घृतादौ व्याप्तादौ चाव्याप्तमिति वाच्यम् नैमित्तिकद्रवत्वसमानाधिकरण
द्रव्यत्वव्याप्यजातिमत्त्वस्य विवक्षितत्वात् आत्मनो भूतवर्गस्य विशेषगुणयोगिनः पृथिव्यप्तेजोवाय्वाकाशात्मनां विशेषगुणव
त्त्वमित्यर्थः यद्वाक्यस्य साधर्म्यं वैधर्म्यमितरस्य तत् २१ रूपत्वादिकं विहायेति वाच्यम् तत्तत्कस्यापि वैधर्म्यं केवलान्वयित्वात्

दी॰ ५

प्रथमो पश्यिन तत्रूपला
द्यवमपि संपाय विशेणति

चक्षुःसंयोगजन्यप्रत्यक्षजा
तिमद्गुणत्वात् नच परममह
त्त्वं जन्यजातिः किं तु पकर्षाना
श्रयप्रविमाणत्वजातिरेव
तत्र तत्रमादायजातिरपंगः
श्रत्र्यन्दर्थत्वात् इति ५

ज्ञाणरसनादि

तसौतेरीषुविषयत्वात्

रसवत्वद्वृत्तिद्रव्यत्वमि
द्व्यत्वसाक्षाद्व्याप्यजाति
मत्त्वात् ७

स्पर्शादयोऽष्टौ वेगाख्यः संस्कारो मरुतो गुणाः स्पर्शाद्यष्टौ रूपवेगौ द्रवत्वं तेजसो गुणाः ३० स्पर्शादयोऽष्टौ वेगश्च गुरुत्वं च द्रवत्वकम्
रूपं रसस्तथा स्नेहो वारिण्येते चतुर्दश ३१ स्नेहहीना गन्धयुताः क्षितावेते चतुर्दश बुद्ध्यादिषट्कं संख्यादिपञ्चकं भावना तथा ३२
धर्माधर्मौ गुणा एते ह्यात्मनः स्युश्चतुर्दश संख्यादिपंचकं कालदिशोः शब्दश्च ते च खे ३३ संख्यादयः पञ्च बुद्धिरिच्छा यत्नोऽपि चेश्वरे प
रापरत्वे संख्यादिपञ्च वेगश्च मानसे ३४ वायोर्नवैकादश तेजसो गुणा जलक्षितिप्राणभृतां चतुर्दश दिक्कालयोः पंच षडेव चाम्बरे म
हेश्वरेऽष्टौ मनसस्तथैव च ३५ तेच संख्यादयः पंचविभ्वाकाशो साधर्म्यवैधर्म्ये निरूप्य संप्रत्येकं पृथिव्यादिकं निरूपयति तत्र क्षिति
र्गन्धहेतुर्नानारूपवती मता गन्धसमवायिकारणमित्यर्थः यद्यपि गन्धवत्वमात्रं लक्षणमुचितं तथापि पृथिवीत्वजातौ प्रमा
णोपन्यासाय कारणत्वमुपन्यस्तम् तथाहि पृथिवीत्वं हि गन्धसमवायिकारणतावच्छेदकतया सिद्ध्यति गन्धत्वांश्च यथावच्छि
न्नस्याकस्मिकत्वापत्तेः न च पाषाणादौ गंधाभावादव्याप्तिरिति वाच्यम् तत्रापि गन्धसत्वात् अनुपलब्धिस्तूत्कटत्वेना
प्युपपद्यते कथमन्यथा तद्भस्मनि गन्ध उपलभ्यते भस्मनो हि पाषाणध्वंसजन्यत्वात् पाषाणोपादानोपादेयत्वं सिध्यति यद्द्रव्यं यद्द्रव्य
ध्वंसजन्यं तत्तदुपादानोपादेयमिति व्याप्तेः दृष्टं चैतत् खण्डघटे महाघटध्वंसजन्ये घटध्वंसजन्यघटध्वंसप्रभवे मिथ्याज्ञानध्वंसज
न्यकार्यस्य हेतुव्यभिचारवारणाय द्रव्यपदद्वयं व्याप्तिशरीरे निविष्टम् इत्थं च पाषाणपरमाणोः पृथिवीत्वात् तज्जन्यपाषाणस्या
पि पृथिवीत्वं तथा च तस्यापि गन्धवत्वे बाधकाभावः नानारूपेति शुक्लनीलादिभेदेन नानाजातीयं रूपं पृथिव्यामेव वर्त्तते न
तु जलादौ तत्र शुक्लस्यैव सत्वात् पृथिव्यां त्वेकस्मिन्नपि धर्मिणि पाकवशेन नानारूपसंभवात् न च नानारूपपक्षे नोत्पन्नं तत्रा
व्याप्तिः रूपद्वयवद्वृत्तिद्रव्यत्वव्याप्यजातिमत्वस्य रूपनाशवद्वृत्तिद्रव्यत्वव्याप्यजातिमत्वस्य वा विवक्षितत्वात् वैशेषिकनये पृथिवी
परमाणो रूपनाशस्य रूपान्तरस्य च सत्वात् न्यायनये घटादावपि तत्सत्वाद्वलक्षणसमन्वयः षड्विधस्तु रसस्तत्र गन्धस्तु द्विविधो मतः
३६ मधुराम्लकटुकषायादिभेदेन षड्विधो रसः पृथिव्यामेव जले मधुर एव रसः अग्नावपि सर्वेऽपि रसद्वयवद्वृत्तिद्रव्यत्वव्याप्य

गन्धवद्वृत्तिद्रव्यत्वव्याप्यजा
तिमत्वमित्यर्थः ८
गन्धहेतुः ४

प्रति

ध्वंसजन्यं चात्रद्रव्यहारकं
विवक्षितम् तेन सालिग्राम
ध्वंसजन्ये नारकीयशरीरे न
व्यभिचारः ५

भस्म पृथिवी गन्धवत्वात् पा
षाणावयवात् पृथिवी पृथि
वीसमवायिकारणत्वात् पा
षाणः पृथिवी पृथिवीसम
वायिकारणकत्वात् पाषाणः
गन्धवान् पृथिवीत्वात् ६

रूपद्वयवद्वृत्तिसजातीय
जातिमत्तिगुणत्वावच्छि
न्निरतो द्रव्यत्वव्याप्येति द्र
व्यत्व[illegible]व्याप्यजलत्वा
दिजातिजलादावव्याप्तिरतो
रूपद्वयवद्वृत्तीति जलपृथि
व्यन्यतरत्वादिरूपधर्ममादा
य जलादिव्याप्तिर्व्याप्तिरतो
जातीति न च अपेक्षा तु हि वि
शेषविषयत्वरूपहितत्वादि
वृत्तित्वेन गौरवाद् रूप
नाशेति ९

रसवत्त्वावद्वृत्तीत्यपि
लक्षणं ज्ञेयम् १

स्तु द्विविध ड्र वक्तव्ये॰ वं॰

भु॰ वे॰

पाकजस्पर्शवत्त्वमात्रेणैव =३

आदिना वैशेषिकमते ऽवयविपरिग्रहः

6

जातिमत्त्वं लक्षणार्थो बोध्यः। गन्धो द्विविध इति वक्तव्ये स्थितिमात्रं न तु गन्धवत्त्वमिति लक्षणे द्विवि॰ स्योपयोगित्वात् द्वैविध्यं चैसौरभा
सौरभभेदेन तेयम् स्पर्शलक्षणस्य तु विजातीयो ह्यनुष्णाशीतपाकजः। तस्याः पृथिव्याः अनुष्णाशीतस्पर्शवत्त्वं वायावपि वर्तते ऽत
स्तदुक्तं पाकज इति। इत्थं च पृथिव्याः स्पर्शोऽनुष्णाशीत इति लक्षणार्थम् पाकजस्पर्शवत्त्वमात्रं लक्षणम्। अथ कि
स्य वैयर्थ्यात्। यद्यपि पाकजस्पर्शः परमाणौ नास्ति तथापि पाकजस्पर्शवद्वृत्तिद्रव्यत्वव्याप्यजातिमत्त्वमर्थो बोध्यः। नित्यानि
त्या च सा द्वेधा नित्या स्यात्परमाणुलक्षणा अनित्या तु तदन्या स्यात् सैवावयवयोगिनी सा च त्रिधा भवेद्देहमिन्द्रियं विषयस्तथा। पृथ्व्य
सा पृथिवी द्विविधा नित्याऽनित्या चेत्यर्थः। अणुलक्षणा परमाणुरूपा पृथिवी नित्या तदन्या परमाणुभिन्ना पृथिवी द्व्यणुकादिः
सर्वाप्यनित्येत्यर्थः। सैवानित्या पृथिवी अवयववतीत्यर्थः। नन्ववयविनि किं मानम् परमाणुपुञ्जैरेवोपपत्तेः। न चैवं परमाणूना
मतीन्द्रियत्वाद् घटादेः प्रत्यक्षत्वं न स्यादिति वाच्यम् एकस्य परमाणोरप्रत्यक्षत्वेऽपि तत्समूहस्य प्रत्यक्षत्वात् यथैकस्य केशस्य दू
रेऽप्रत्यक्षत्वेऽपि तत्समूहस्य प्रत्यक्षत्वात्। न चैकः स्थूलो घट इति बुद्धेरनुपपत्तिरिति वाच्यम् एको महान् धान्यराशिरितिवदुपपत्तेः
मैवम् परमाणोरतीन्द्रियत्वेन तत्समूहस्यापि प्रत्यक्षत्वायोगात् दूरस्थकेशस्य नातीन्द्रियः सन्निधाने तस्यैव प्रत्यक्षत्वात्। न
च तदतीन्द्रियपरमाणुपुञ्जस्योत्पन्नत्वान्न प्रत्यक्षत्वेऽपि विरोध इति वाच्यम् अदृश्यस्यादृश्यानुपादानत्वात् अन्यथा चक्षुरूष्मादिसन्
तेः कदाचिद्दृश्यत्वप्रसङ्गात्। न चातिनमतेनालोके कथमदृश्यपरमाणुसन्निवेशैर्दृश्यद्व्यणुकारम्भ इति वाच्यम् तत्र त्रसरेणुपर्यन्तमदृश्यद्व्या
णुकादेः स्थूलद्रव्यानारम्भकत्वाभ्युपगमात्। न च ह्यदृश्येन द्व्यणुकेन कथं दृश्यत्रसरेणोरुत्पत्तिरिति वाच्यम् यतो न वयं दृश्यत्वमदृश्यत्वं
वा कस्यचित्स्वभावादाचक्ष्महे परं तु महत्त्वोद्भूतरूपादिकारणसमुदायवशाद् दृश्यत्वं तदभावे चादृश्यत्वं त्रसरेणोर्महत्त्वात्तस्य दृ
न तु द्व्यणुकादेर्महत्त्वाभावात्। न हि त्वन्मतेऽपीदं सम्भवति परमाणोर्महत्त्वाभावात्। इत्थं चावयविसिद्धौ तेषामुत्पत्तिविनाशयोः प्र
त्यक्षसिद्धत्वादनित्यत्वम् तेषां चावयवावयवधाराया अनन्तत्वे मेरुसर्षपयोरपि साम्यप्रसङ्गः। अतः क्वचिद्विश्रामो वाच्यः।

कारणानैरपेक्ष्यात् =२

सत्याद्दृष्टस्य नित्यादृष्ट गगनाद्यावनित्यादि तोद्भूतत्वव्याप्येति द्र व्यत्वव्याप्तिसत्तामात्रया नित्या नित्या त्वाः सामान्या गः स्पर्शवत्तिजलत्वाद्वि कमाद्युजलाद्वाव्यति व्याप्तिरतः पाकजेति पा कजद्रव्यवत्तितेजस्त्वसा मान्यतेजस्यतिव्याप्तिरतः स्पर्शेति =४

यद्दृश्यं द्विविधप्रती तिविध उपमायाश्चने कृपरमाणुरूपकस्यते नोरवाद ेतितिका वय विसिद्धिः =२

तथाच॰ २

प्रत्यक्षविषयस्य तस्या नित्यत्वे तत्समवेतेन कार्येणापि तथा भाव्यम् । सा च तस्या नित्यत्वम् । महत्त्वपरिमाणतारतम्यस्य गगनादौ विश्रा-
न्तत्वमिव अणुपरिमाणतारतम्यस्यापि क्वचिद्विश्रान्तत्वमित्यनुमानेन परमाणुसिद्धिः । न च त्रसरेणावेव विश्रामोऽस्त्विति वाच्यम्
त्रसरेणुः सावयवः चाक्षुषद्रव्यत्वात् घटवदित्यनुमानेन तदवयवसिद्धौ त्रसरेणोरवयवाः सावयवाः महदवयवत्वात् कपा-
लवदित्यनुमानेन तदवयवसिद्धिः । न चेदमप्रयोजकम् । अपकृष्टमहत्त्वं प्रत्यनेकद्रव्यवत्त्वस्य प्रयोजकत्वात् । न चैवं क्रमेण
तदवयवधारापि सिद्ध्येदिति वाच्यम् । अनवस्थाभयेन तत्सिद्धेः । सा च त्रिविधा भवेदिति । सा कार्यरूपा पृथिवी त्रिवि-
धा शरीरेन्द्रियविषयभेदादित्यर्थः । तत्र देहमुदाहरति योनिजादिभेदेन देहसिद्धिः । इन्द्रियं घ्राणलक्षणम् । विषयो मृत्पाषाणादिस्तत्र
देहं तत्रोदाहरति । योनिजमयोनिजं चेत्यर्थः । योनिजमपि द्विविधं जरायुजमण्डजं चेति । जरायुजं मनुष्यादीनाम् । अण्डजं पन्नग-
पक्ष्यादीनाम् । अयोनिजं स्वेदजोद्भिज्जादीनाम् । स्वेदजाः कृमिदंशाद्याः । उद्भिज्जाः वृक्षगुल्माद्याः । नारकिणां शरीरमयोनिजं च । मनुष्या-
दीनां शरीराणां पार्थिवत्वे किं मानमिति वाच्यम् । गन्धादिमत्त्वस्यैव प्रमाणत्वात् । न च क्लेदोष्माद्युपलम्भात् जलत्वादिकं स्यादिति
वाच्यम् [illegible] तथा सति जलत्वादिना संकरप्रसंगात् । न च तर्हि जलत्वादिकमेवास्तु न तु पार्थिवत्वमिति वाच्यम् । क्लेदादी-
नां विनाशेऽपि शरीरत्वेन प्रत्यभिज्ञानात् गन्धाद्युपलब्धेश्च पृथिवीत्वसिद्धेः । तेन पार्थिवादिशरीरे जलादीनां निमित्तत्वमात्रं
बोध्यम् । शरीरत्वे किं मानमिति वाच्यम् । आत्माधिष्ठितत्वाद्यसंबन्धस्य प्रमाणत्वात् । तत्रैव किं मानमिति चेत् भवतु तत्संयोगलक्षणा-
नात् [illegible] हस्तादौ शरीरव्यवहारेण भवति । तदवयवत्वेन न तद्विशेषणत्वम् । न च यत्र शरीरे चेष्टा न जायते तत्राव्या-
प्तिरिति वाच्यम् । तादृशशरीराभावात् । अथवा चेष्टावदन्त्यावयविवृत्तिद्रव्यत्वव्याप्यजातिमत्त्वं लक्षणम् । अन्त्यावयवि-
वृत्तिः चेष्टावद्वृत्तिर्जातिमत्त्वं शरीरत्वं [illegible] जातिमात्रग्रहणे लक्षणसमन्वयः । न च नृसिंहशरीरे [illegible] शरीरे व्या-
कथमेतल्लक्षणसमन्वयः [illegible] नृसिंहत्वस्य [illegible] तथा जातिर्न भावाजलीयतेजसशरीरे [illegible] तयादेव व्याप्या जाति-
शरीरत्वेन जातिः पृथिवीत्वेन सङ्करात् । किं तु चेष्टाश्रयत्वम् । हस्तादीनामपि चेष्टाश्रयत्वान्न व्याप्तिः । न च हस्तादेः ५

एवं च मनुष्यशरीरादावव्याप्तिः । अथवेति चरमावयवदेहनिष्ठा [illegible] चेष्टावदिति । हस्तादेर्व्याप्यजात्यवयवीति २   न तु देवत्वादिरूपजातिमादा- लक्षणसमन्वयः अन्तपद १

सीय॰२ नाद्यवाहाद यदेति॰४ त्व ॰॰॰ १ ना॰१ एवार्थत्वात॰२

७

गमु॰टी॰

संकराव

त्वाभावादितिवाच्यम्॥ कलभेदेननरसिंहशरीरस्यनानात्वेननृसिंहस्यायालक्षणसमन्वयात्॥ इन्द्रियमिति घ्राणेंद्रियंपार्थिव मित्यर्थः॥ पार्थिवत्वंकथमितिचेदित्थम्॥ घ्राणेंद्रियंपार्थिवं रूपादिषुमध्येगन्धस्यैवाभिव्यंजकत्वात् कुंकुमगंधाभिव्यंजकघृ तादिवत्॥ नचदृष्टांतेरूपादिव्यंजकत्वात्दसिद्धिरितिवाच्यम्॥ परकीयरूपाद्यव्यंजकस्यतदर्थत्वात्॥ नचनवशरावगन्धव्यंजकज लेनानैकान्तिकमितिवाच्यम्॥ तस्यसक्तुरसाभिव्यंजकत्वात्॥ यद्वापरकीयेतिनदेयम्॥ वायूपनीतसुरभिभागस्यदृष्टान्तत्वसंभवा त्॥ नचघ्राणेंद्रियसन्निकर्षस्यगन्धमात्राभिव्यंजकत्वाद्व्यभिचारइतिवाच्यम्॥ द्रव्यत्वेसतीतिविशेषणात्॥ विषयइति॥ उपभोगसा धनंहिविषयः॥ सर्वमेवहिकार्यजातमदृष्टाधीनंयच्चकार्यंयदहृष्टाधीनंतत्तदुपभोगंसाक्षात्परंपरयावाजनयत्येव॥ नहिबीज प्रयोजनाभावेविनाशकस्यचिरंस्थितिरस्ति॥ तेनद्व्यणुकादिकंब्रह्मांडांतंसर्वमेवविषयोभवति॥ शरीरेन्द्रिययोर्विषयत्वेपिप्रकारां तरेणोपन्यासःशिष्यबुद्धिवैशद्यार्थः॥ जलंनिरूपयति॥ वर्णःशुक्लोरसस्पर्शौजलेमधुरशीतलौ॥ स्नेहसमवायिकारणतावच्छेदक तयाजलत्वंजातिसिध्यति॥ यद्यपिस्नेहत्वंनित्यानित्यवृत्तितयानकार्यतावच्छेदकम्॥ तथापिजन्यस्नेहत्वंतथाबोध्यम्॥ यद्यप्येवमपि ततोजलत्वंनस्यात्॥ नचजन्यस्नेहाभावात्॥ तथापिनित्यस्यस्वरूपयोग्यत्वेफलावश्यंभावनियमादितिचेन्न॥ जन्यस्नेहजनकताव च्छेदकाया जन्यजलत्वजातेःसिद्धौतदवच्छिन्नजनकतावच्छेदकतयानित्यजलत्वजातिसिद्धेः॥ शुक्लरूपमेवजलस्येतिदर्शयितुम् क्तम्॥ वर्णःशुक्लइति॥ नतुशुक्लेतरवर्णवत्त्वंजलत्वं॥ ग्रन्थवानैमित्तिकद्रवत्ववद्वृत्तिरूपवद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वम्॥ अ भास्वरशुक्लेतररूपासमानाधिकरणरूपवद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वम्॥ रसस्पर्शाविति॥ जलस्यमधुरएवरसः शीतए वस्पर्शः॥ तिक्तवद्वृत्तिमधुरवद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वं॥ शीतेतरस्पर्शवद्वृत्तिशीतस्पर्शवद्वृत्तिद्रव्यत्वसाक्षाद्व्या प्यजातिमत्त्वे तदर्थः॥ [illegible]॥ नन्वशुक्लरूपमेवेतिकुतः कालिन्दीजलादौनीलिमोपल ब्धेरितिचेन्न॥ नीलजनकतावच्छेदिकायाःपृथिवीत्वजातेरभावात्॥ जलेनीलरूपासम्भवात्॥ कालिन्दीजलेनीलत्वप्रतीतिस्तु

तदुक्तंनस्फटिकादौनातिव्याप्तिः॥

जं॥ शुक्लरूपमात्रत्वालेपिनचतिरिक्तविषयिशुक्लाद्ध शुक्लेति नायोवारणायरूपवद्वृत्तीति दिगादौवारणायनैमित्तिकद्रवत्ववद्वृत्तीति पटत्वादिवारणायसा नतुनीलरूपाभावेकथंनीलरूप क्षादिति द्रव्यत्वसाक्षाद्व्याप्यत्वेद्रव्यत्वव्याप्यव्याप्यमां नतुद्रव्यत्वव्याप्यतव्याप्तिमत्त्वाभावः रूपवद्वृत्तिविशेषणेनैवरूपादीनांवारणात्तद्विवेचनप्रयोजनाभावात्॥ ५ प्रतीतिर्मलिनसाह कालिंदीति॥ १९ ॥ २० नतुरूपाशुक्लप्रत्यक्षेदीपकाशुक्लरूपाधायकेकारणतावच्छेदकतयाऽऽदित्यकिरणानिलपाषाणविभक्ति॰॰॰ नत्वेति देशादेःस्वरूपयोग्यत्वमात्रानंकाचिदेतिः तस्यानित्यत्वेनफलोपधायकाभावात् परमाणोर्नित्यत्वात्तस्यसाक्षात्व्याप्यजातित्वमेवाधिकरणसमवायविशिष्ट नचिवारणायाहजन्यस्नेहेति॥ २१॥

नचनवशराचगन्धाभिव्यंजकज लेनानैकान्तिकं तद्व्यंजकता वच्छेदकस्यजलत्वस्य॥ नतथैवनघ्राणेंद्रिये॥ ४ घ्राणकार्दिकार्यस्यतस्यद्रव्यत्वेन॥ ९॥ २ विषयइत्यिर्मसाकार्यत्वाव च्छेदकत्वाभावेनसकला॰॰॰ विषयत्वमितिप्रकारान्तरम् तिशेकतेवधपीतिप्रकारान्तर नित्यस्यापरमाणुमात्रकार्य तावच्छेदकत्वेदोषाभावाज्ञान पदेनतदेषु॥ ९॥ पृथिवीत्वमादाय॰॰॰ ताम्रनित्यत्वाभिवारणाय कुरणानम् जलत्वस्यतु ॰॰॰ रूपसमानाधिकरणता दृत्वंबदत्तिशुक्लेतरेतिने जस्यातिव्याप्तिवारणायाः भास्वरेतिः ४ स्फटिकमिच्छाश्वेतिलावि त्वसार्थ॰॰ २

केचित्तुसमवायिकंचस्याः ईश्वरादेःकारणत्वेनिर्भि दश्चसाक्षात्वसंभवन्तं तथाचजलसंयुक्तेपर्नततं ध्वंसत्वमजलत्वमरेवपवृत्ति नित्यमनानियतत्वमजलंघान तः सार्थतमेकारणमान्तु छेदकतयाजलत्वजातिसि द्धिरित्याहुः॥ परेतुस्थालन लनिष्ठजलत्वनिरदजलत्वर प्राजवच्छिन्नसमवायिकारण तावच्छेदकतयापरमाणौसा धारणजातिसिद्धिःकार्यता वच्छेदकतावच्छेदक कोटौ नित्यवातितेन साधार्णतयमवत्कार्यता वच्छेदकेदोषाभावात्॥ वेयाज्ञः॥ २॥

तत्समवायिसंयोगसंबन्धेनोपष्टम्भकपार्थिवभागगतनीलरूपप्रतीतिः कालिन्दीजलादाविति भावः = १ =

नन्वम्लमले मधुरो रसः तथापि जंबीर[...]दाव[...]रसस्य प्रत्यक्षसिद्धत्वादत आह पृथिवीत्वस्येति = ४ =

दूषितसंबंधस्य नीलप्रतीतिनियमकत्वादेव = १ हरीतक्यादिभक्षणोत्तरं प्रतीतमाधुर्योपलंभात् = ३ =

माधुर्यस्य = २ आश्रयोपाधिकत्वाभावे = २

यद्यपि पृथिवीत्वस्याम्लादिजनकतावच्छेदकम् मधुरत्वं मधुरस्यापि जनकतावच्छेदकत्वमव्याहतमिति तत्त्वम् तथापि हरीतकीभक्षणोत्तरं जले मधुरोपलब्धेः तत्र मधुरस्यैव जलरसो वि कारणस्याप्यपकता जलत्वेनापि मधुरत्वं प्रतिरोधकत्वं कल्प्यत इति भावः = ४ =

रसो जले = ४

श्रयोपाधिकी अत एव वियति विक्षेपे धवलिमो[...]लब्धिः अथ जलमाधुर्ये किं मानम् न हि प्रत्यक्षेण कोऽपि रसस्तत्रानुभूय-
यते न च नारिकेलजलादौ माधुर्यमुपलभ्यत एवेति वाच्यम् तस्याश्रयोपाधिकत्वात् अन्यथा जम्बीररसादावुपलब्धेरम्लादि-
मत्त्वमपि स्यादिति चेन्न हरीतक्यादिभक्षणस्य जलरसव्यञ्जकत्वात् न च हरीतक्यां जलसंयोगाद्रसान्तरोत्पत्तिरिति
वाच्यम् कल्पनागौरवात् पृथिवीत्वस्याम्लादिजनकतावच्छेदकत्वाच्च जले चाम्लादिकं जम्बीररसादौ तदाश्रयोपाधिकीत-
याप्रतीतिः एवं च अनुष्णाशीतस्पर्शजनकतावच्छेदकं जलत्वं जलत्वं वा बोध्यम् दृष्टं चन्दनादौ शीतोपलब्धिस्तदन्तर्वर्ति-
शीतस्पर्शवत्त्वं सलिलस्य तेजःसंयोगाज्जले उष्णत्वप्रतीतिरौपाधिकी स्फुटैव तत्र पाकासम्भवात् स्नेहस्तु द्रववत्त्वं सांसि-
द्धिकमुदाहृतम् ३८ घृतादावपि तदन्तर्वर्तिजलस्यैव स्नेहः जलस्यैव स्नेहसमवायिकारणत्वात् तेन जल एव स्नेहद्रुतिमत्-
त्वम् द्रवत्वमिति सांसिद्धिकद्रवत्वत्वं जातिविशेषः प्रत्यक्षसिद्धस्तदवच्छिन्नजनकतावच्छेदकमपि तदेवेति भावः तैलादा-
वपि जलस्यैव द्रवत्वं स्नेहप्रकर्षेण च दहनानुकूलमिति वक्ष्यते नित्यतादि प्रथमवत् किन्तु देहमयोनिजं इन्द्रियं रसनं सिन्धुहि-
मादिर्विषयो मतः ३९ पृथिव्या इव जलस्यार्थः तथा हि जलं द्विविधम् नित्यमनित्यं च परमाणुरूपं नित्यं द्व्यणुकादि सर्वमनित्य-
मवयवसमवेतं च अनित्यमपि त्रिविधम् शरीरेन्द्रियविषयभेदात् पृथिवीतोययोर्विशेषमाह किन्त्विति अयोनिजमेवेत्य-
र्थः जलीयं शरीरमयोनिजं वरुणलोके प्रसिद्धम् इन्द्रियं रसनं जलीयमित्यर्थः तथा हि रसनं जलीयं गन्धाद्यव्यञ्जकत्वे सति
रसव्यञ्जकत्वात् सक्तुरसाभिव्यञ्जकोदकवत् वायूपनीतशीतभागवद् रसनसन्निकर्षव्यभिचारवारणाय [illegible]
विषयं दर्शयति सिन्ध्विति सिन्धुः समुद्रः हिमं तुषारः आदिग्रहणात् सरित्कासारकरकादिः सर्वोऽपि ग्राह्यः न च
हिमकरकयोः कठिनत्वात् पार्थिवत्वमिति वाच्यम् ऊष्मणा विलीनस्य तस्य जलत्वस्य प्रत्यक्षसिद्धत्वात् यद्द्रव्यं यद्द्रव्यध्वंसज-
न्यमिति व्याप्तेर्जलोपादानोपादेयत्वसिद्धेः अदृष्टविशेषेण द्रवत्वप्रतिरोधात् करकादौ काठिन्यप्रत्ययस्य भ्रान्तत्वात्

अवयवरसजन्यस्य पृथिवीरसस्याग्निसंयोगनाश्यत्वदर्शनादेतदनुरोधमात्रेण जलसंयोगस्यापि पृथिवीरसनाशकत्वस्वीकारेऽतिरिक्तकार्यकारणभावस्य स्वीकारात् मधुररसस्य कल्पनेनैव गौरवात् = ४ = जलस्य ज्ञानाधुनाधानात् रसमाणमात्र एवमिति = ५ =

तदाश्रयसंयोगेन प्रतीयत इति भावः = ७ =

अग्न्युत्कर्षे स्नेहस्यैव दहनप्रतिकूलत्वात् स्नेहविरूपतो तद्वपार्थिवावयवैरुपष्टब्धे कोष्णेन जलमाद्यतेलपाकादिरिव तस्यासम्भवेऽपि न क्षतिः = ५ =

घृतादौ समवायेन स्नेहनिरासेन = ७ =

नन्विन्द्रियग्राह्यरसव्यंजके न व्यभिचारवारणाय सत्यन्तम् = ५ =

यदि च विलीनस्य नष्टत्वार्थः तथापि करकादिनाशोत्तरमपेयत्व तत्र जलत्वयोः भ्रमत्वं न करकादौ नष्टता हिमाद्युत्पादे यद्द्रव्यमिति = २ =

कठिनस्पर्शवत्त्वात् = २ =

क.

पार्थिवत्वाभावेन कथं काठिन्यप्रत्ययः अत आह अदृष्टेति = १ =

यथा च जन्यजलत्वावच्छिन्नजनकतावच्छेदकतया जलपरमाणौ जलत्वजातिसिद्धिस्तथा जन्यतेजस्त्वावच्छिन्नजनक-
तावच्छेदकतया तेजःपरमाणावपि तेजस्त्वरूपा जातिसिद्धिरित्यर्थः इदमुपलक्षणं समवायेन विलक्षणनीलो-
त्पत्तित्वावच्छिन्नं प्रति समवायेन तेजःसंयोगत्वेन हेतुतया तेजस्त्वजातिसिद्धिरित्यपि द्रष्टव्यम् = २ =

उद्भूतशौक्ल्यं चाभास्वरं तत्र हेतुर्नेत्यग्रहः तद्भिन्नत्वादिति वैसादृश्ये
मरकतकिरणादौ पार्थिवरूपेणाभिभवात् ३

जातिसिद्धेः।

मु. व. ८ १ स्पर्श उष्णस्तेजसस्तु स्याद्रूपं शुक्लं भास्वरम् ॥ उष्णत्वं स्पर्शनिष्ठो जातिविशेषः प्रत्यक्षसिद्धः इत्थं च जन्योष्णस्पर्शसमवायिकारण-
तावच्छेदकं तेजस्त्वं जातिविशेषस्तस्य परमाणौ हि नित्यत्वं जलत्वस्येवानुसंधेयम् न चोष्णस्पर्शवत्त्वं चन्द्रकिरणादावव्याप्तमि-
ति वाच्यम् तत्राप्युष्णस्पर्शसत्त्वात् किंतु तदन्तःपातिजलस्पर्शेनाभिभवादग्रहः एवं रत्नकिरणादौ पार्थिवस्पर्शेनाभिभवा-
ता= दुष्णस्पर्शाग्रहः तद्रूपाग्रहे धर्मिणोपि चाक्षुषत्वं न स्यादिति चेन्न अनुद्भूतरूपत्वेपि धर्मिणो ग्रहसंभवात् शङ्खस्येव पित्तपीतिम्ना-
वच्छेद्यत्वे शुक्लरूपं नाभिभूतं किंतु तदीयशुक्लत्वमभिभूतमित्यन्ये नैमित्तिकद्रवत्वं तत्त्वनित्यतादि च पूर्ववत् ॥४॥ सुवर्णादिरूपे ते-
तद्व जस्त्वितत्वात् न चैवं नैमित्तिकद्रवत्वं तेजोलक्षणं दहनादावव्याप्तं घृतादावतिव्याप्तं चेति वाच्यम् पृथिव्यवृत्तिनैमित्तिकद्रवत्व-
वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वस्य विवक्षितत्वात् नित्यतादि जलस्येवेत्यर्थः तथाहि तद्द्विविधम् नित्यमनित्यं च नित्यं पर- सर्वं वदिति
माणुरूपं तदन्यदनित्यमवयवि च तच्च त्रिधा शरीरेन्द्रियविषयभेदात् शरीरमयोनिजमेव तच्च सूर्यलोकादौ प्रसिद्धम्
सूत्रयो विशेषस्तस्मात् इन्द्रियं नयनं वह्निः स्वर्णादिर्विषयो मतः ॥ चक्षुस्तैजसं परकीयस्पर्शाद्यव्यञ्जकत्वे सति परकीयरूप-
व्यञ्जकत्वात् प्रदीपवत् प्रदीपस्य स्वीयस्पर्शव्यञ्जकत्वात् प्रथमं परकीयेति नवादेः स्वीयरूपव्यञ्जकत्वात् व्यभिचारवा-
लाघवादाह=६ रणाय द्वितीयं परकीयेति अथवा शब्दव्यञ्जकत्वसंभवाद् द्वितीयं परकीयेति न देयम् चक्षुःसंनिकर्षे व्यभिचारवारणाय द्र-
व्यत्वं देयम् विषयं दर्शयति वह्नीति ननु सुवर्णस्य तैजसत्वे किं मानमिति चेन्न सुवर्णं तैजसम् असति प्रतिबन्धके अत्य-
न्तानलसंयोगेप्यनुच्छिद्यमानद्रवत्वात् यन्नैवं तन्नैवम् यथा पृथिवीति न चाप्रयोजकम् पृथिवीद्रवत्वस्य जलद्रवत्वस्य
चाग्निसंयोगनाश्यत्वात् ननु पीतिमगुरुत्वाश्रयस्य पार्थिवस्यापि तदानीं द्रुतत्वात्तेन व्यभिचार इति चेन्न जलमध्यस्थमसी- मु
२ तोदकवत्तस्याद्रवत्वात् अपि तु पीतिमाश्रयस्यात्यन्ताग्निसंयोगेपि रूपापरावृत्तिदर्शनात् तत्र प्रतिबंधकं विजातीयद्रव्यं ८
कल्प्यते तथाहि अग्निसंयोगी पीतिमगुरुत्वाश्रयः विजातीयरूपप्रतिबंधकद्रव्यसंयुक्तः अत्यन्ताग्निसंयोगे सति

इत्य शब्दे२

अनुमितिप्रकारस्तु वायवीयं रूपवद्द्रव्यासमवेतस्पर्शः सवक्कचिदाश्रितः स्पर्शत्वात् पृथिवीस्पर्शवत् पृथिव्यादिस्पर्शसिद्धसाधनवारणाय रूपवद्द्रव्यासमवेत इति पदविशेषणम् एवमः सति रूपवद्द्रव्याभिघातेयायं प्रा
दूसंतानः अस्पर्शवद्वेगवद्द्रव्यसंयोगजन्यः अविभज्यमानावयविसंबंधिशब्दजन्यसंताननत्वात् दण्डाभिहतभेरीशब्दसंतानवत् पृथिव्याद्यभिघातजन्यनिमित्तसिद्धसाधनवारणाय सत्यादिपदविशेषणम् विभागज
अनिशब्देव्यभिचारवारणाय हेतावविभज्यमानेत्यादि=५ शब्दविशेषस्य वर्त्तावच्छिन्नस्य वा निमित्तकारणतावच्छेदकतया वायुत्वजातिसिद्धिरित्यविरोधः=४

वाकजानुष्णाशीतस्प र्शवत्त्वमित्युक्तम् अनुष्णाशीत स्पर्शवत्त्वमित्युक्तमात्रा द्याप्यतातिमत्वेवोधम तेनपरेनाति अप्ति=२

सर्वस्य विजातीयरूपानधिकरणत्वात् जलमध्यस्थपीतपटवत् तस्मात् पृथिवीजलभिन्नस्य तेजसः नियमात् वायुं निरूपयति
२ अपाकजोऽनुष्णाशीतस्पर्शस्तु पवने मतः तिर्यग्गमनवानेष ज्ञेयः स्पर्शादिलिंगकः पूर्ववन्नित्यतायुक्तं देहव्यापि त्वगिन्द्रियं ४३
अनुष्णाशीत स्पर्शस्य पृथिव्यामपि सत्त्वादुक्तम् अपाकज इति अपाकजस्पर्शस्य जलादावपि सत्त्वादुक्तम् अनुष्णाशीत इति एतेन वायोः
विजातीयस्पर्शो दर्शितः तज्जनकतावच्छेदकं वायुत्वमिति भावः एष वायुः स्पर्शादिलिंगकः वायुर्हि स्पर्शशब्दधृतिकम्पैरनु
मीयते विजातीयस्पर्शेन विलक्षणशब्देन तृणादीनां धृत्या शाखादीनां कम्पेन च वायोरनुमानात् यथा च वायुर्न प्रत्यक्षस्तथाग्रे व
क्ष्यते पूर्ववदिति वायुर्हि द्विविधो नित्योऽनित्यश्च परमाणुरूपो नित्यस्तदन्योऽनित्यः समवेतश्च सोपि त्रिविधः शरीरेन्द्रियविष
यभेदात् तत्र शरीरमयोनिजं पिशाचादीनाम् परं तु जलीयतैजसवायवीयशरीराणां पार्थिवभागोपष्टम्भादुपभोग
क्षमत्वम् जलादीनां प्राधान्याज्जलीयत्वादिकमिति अत्र यो विशेषस्तमाह देहव्यापीति शरीरव्यापकमिन्द्रियं स्पर्शग्राहकं
त्वक् तच्च वायवीयं रूपादिषु मध्ये स्पर्शस्यैवाभिव्यञ्जकत्वात् यद्वा सक्तुसलिलशैत्याभिव्यञ्जकव्यजनपवनवत् विषयं द
र्शयति प्राणादिस्तु महावायुपर्यन्तो विषयो मतः ४४ आकाशं निरूपयति आकाशस्य तु विज्ञेयः शब्दो वैशेषिको गुणः ४५ आका
शकालदिशामेकैकव्यक्तित्वादाकाशत्वादिकं न जातिः किन्तु शब्दाश्रयत्वं वैशेषिकरतिकथनेन विशेषगुणान्तरव्यवच्छे
दः एतेन प्रमाणमपि दर्शितम् तथा हि शब्दो गुणः चक्षुर्ग्रहणायोग्यबहिरिन्द्रियग्राह्यजातिमत्त्वात् स्पर्शवत् शब्दो द्रव्यसम
वेतः गुणत्वादित्यनुमानेन तु शब्दस्य द्रव्यसमवेतत्वसिद्धिः शब्दो न स्पर्शवद्विशेषगुणः अग्निसंयोगासमवायिकारणकत्वाभावे
सति अकारणगुणपूर्वकप्रत्यक्षत्वात् सुखवत् पाकजरूपादौ व्यभिचारवारणाय सत्यन्तम् जलपरमाणुरूपादौ व्यभिचारवा
रणाय सत्त्वहेतौ न दिक्कालमनोगुणः विशेषगुणत्वाद्रूपवत् नात्मविशेषगुणः बहिरिन्द्रियग्राह्यत्वात् रूपवत् इत्थं च श
ब्दाधिकरणं नवमं द्रव्यं गगनं नाम सिद्ध्यति न च वाय्ववयवेषु सूक्ष्मशब्दक्रमेण वायौ कारणगुणपूर्वकः शब्दः उत्पद्यतामि
संयोगात् ४ प्रत्यक्षपरिशेषानुमानेन=१ पटरूपादौ व्य० अकारणगुणपूर्वकेति=२

कार्यमात्रजनककालादे र्व्य० इंद्रियमिति वक्तव्ये शरीरेति यवहारमिति=७ तज्जात्वादिवाव्याप्यता वाद्यरणादिवारणायाव क्षयमोगायतनत्वमत्राव्या पर्वतीति=६

सत्वपाद: पृथिव्यामपि प्र मातिनि र्द्रव्यसमवेत: अ प्रत्यक्षानाश्रितत्वे सतिद्रव्या श्रितत्वात् अनुमानेन ह द्रव्यत्वपरिसिद्धिपरिह र्त्तनानुपपत्तिरिति=५ = अतएव तैयायिकवारणा य चक्षुर्ग्राह्येति आत्मस व्यवहिरिंद्रियग्राह्येति २ सत्तादेर्व्य० जातिमदिति १ तज्जातुमानमयिद्रव्यसम वेतत्वसाधकानुमानेन तत्त्व सिद्धिवारणायेतिबोध्यं=६ आदि १

स्पर्शसत्त्वाऽनुष्णाशीत लकत्वेनेन=३

कार्यमात्रजनककालादे र्व्य० इंद्रियमिति वक्तव्ये दोषः स्पर्शग्राहकमिति=८

आश्रयत्वनानातुममवा येन विवक्षितत्वानेनकाल स्य गगनाधारत्वेन शब्दा श्रयत्वेपि न क्षतिः=६

अत्र इत्यानाश्रि तत्वे=२

नन्वेतन्नसर्वंतदाविशेषगुणत्वेमानंस्यात् न शब्दो विशेषगुणः लौकिकप्रत्यक्षसंयोगेंद्रिययावद्वेसति लौकिकप्रत्यक्षस्याहीन्द्रियग्रहणायोग्यत्वेसति गुणत्वव्याप्यजातिमत्त्वस्यैव तदनुमानात् प्रभात्वमादाय व्य० गुणत्वव्याप्येति
गुरुत्वेव्यभिचारवारणाय प्रथमं सत्यन्तम् संख्यात्वमादाय व्य० द्वितीयं सत्यन्तं सांसिद्धिकद्रवत्वस्नेहधर्माधर्मभावनासु प्रकृतहेतोरभावेपि तद्ग्रहे तत्र तेषु विशेषगुणत्वं साधनीयं प्रत्यक्षानुमाने [illegible] वायवीयत्वसिद्धिं द्वृशंकते न चेति=

२ यद्यप्यनित्यो वायुः स्पर्शवदविधः सवनवत्विधः प्राणादिरिति त्रिकमाकार तथात्वमसंपाद्यविषयश्चक्षे प्राणस्त्वेकएव सन्नुपाधिनानात्स्थानवशात्स्वरविनिर्गमना

आकाशएकः सन्नपि उपाधेः २

आकाशेपि
तत्र च शरीरस्य विषयस्य चाभावात्

वैशाटिकर्णशष्कुल्यवच्छिन्नमाकाशं वैशाटिश्रोत्रमित्यर्थः = २

ननु तथाप्याकाशादिनाम
मनोभिः विभुसंयो
गस्यासमवायिकारणं
स्यात् किं कालकल्पनेने
त्यत आह लाघवादिति आ
काशादिपञ्चविभुसंयोगस्य
तथात्वे जीवात्मभिरनेकता
दिनिरासः रहात्मम
न्सोस्त्वनन्तत्वात् तथात्व
म् किं तु लाघवादतिरिक्तः
काल एव तथात्वेन कल्प्य
ते इति भावः = ७ =

तिवाच्यम् श्रोत्रस्यावरणाभावित्वेन वायोर्विशेषगुणत्वाभावात् दिग्दिग्दर्शयति इन्द्रियं तु भवेच्छ्रोत्रमेकः सन्नप्युपाधितः नैवाका
शैकत्वाद्वादेकं सिद्धे श्रोत्रं पुरुषभेदाद्भिन्नं कथमाकाशं स्यादित्यत आह एकः सन्नप्युपाधितः कर्णशष्कुल्या भेदाद्भिन्नं भिन्नं श्रोत्रा
त्मकं भवतीत्यर्थः कालं निरूपयति जन्यानां जनकः कालो जगतामाश्रयो मतः ४५ परापरत्वधीहेतुः क्षणादिः स्यादुपाधितः जग
तामाश्रय इति तत्र प्रमाणं दर्शयति नु इदानीं घट इत्यादिप्रतीतिः सूर्यपरिस्पन्दादिकं यदा विषयीकरोति तदा सूर्यपरिस्पन्दादिना घ
टादेः संबंधो वाच्यः स च संयोगादिर्न संभवतीति काल एव संबंधघटकः कल्प्यते इत्थं च तस्याश्रयत्वमप्युक्तं प्रमाणान्तरं दर्श
यति परापरत्वधीहेतुः परत्वापरत्वबुद्धेरसाधारणं निमित्तं काल एव परत्वापरत्वयोरसमवायिकारणसंयोगाश्रयो लाघवा
दतिरिक्तः काल एव कल्प्यत इति भावः नन्वेकस्य कालस्य सिद्धौ क्षणदिनमाससंवत्सरादिसमयभेदो न स्यादित्यत आह क्षणादिः
स्यादुपाधितः कालस्त्वेकोप्युपाधिभेदात् क्षणादिव्यवहारविषयः उपाधिस्तु स्वजन्यविभागप्रागभावावच्छिन्नं कर्म पूर्वसंयो
गावच्छिन्नविभागो वा पूर्वसंयोगनाशावच्छिन्नोत्तरसंयोगप्रागभावो वा उत्तरसंयोगावच्छिन्नं कर्म वा न चोत्तरसंयोगानन्तर
क्षणे व्यवहारो न स्यादिति वाच्यम् कर्मान्तरसत्त्वादिति महाप्रलये तु क्षणादिव्यवहारो यद्यस्ति तदा ध्वंसेनैवोपपादनी
य इति दिनादिव्यवहारस्तु तत्तत्क्षणकूटैरेवेति दिशं निरूपयति दूरान्तिकादिधीहेतुरेका नित्या दिगुच्यते ४६ उपाधिभेदादेकापि
च॰ प्राच्यादिव्यपदेशभाक् दूरत्वमन्तिकत्वं दैशिकं परत्वमपरत्वं च बोध्यम् तद्बुद्धेरसाधारणं बीजं दिगेव दैशिकपरत्वापरत्व
तद्या॰ योरसमवायिकारणसंयोगाश्रयो लाघवादेका दिक् सिद्ध्यतीति भावः नन्वेकैव दिक् तदा प्राचीप्रतीच्यादिव्यवहारः कथमु
पपद्यतामित्यत आह उपाधीति यत्पुरुषस्योदयगिरिसन्निहिता या दिक् तत्पुरुषस्य सा प्राची एवम् उदयगिरिव्यवहिता प्र
तीची एवं तत्पुरुषस्य सुमेरुसन्निहिता दिगुदीची तद्व्यवहिता त्ववाची सर्वेषामेव वर्षाणां मेरुरुत्तरतः स्थित इति नियमात्
आत्मानं निरूपयति आत्मेन्द्रियाद्यधिष्ठाता करणं हि सकर्तृकम् आत्मत्वजातिः सुखदुःखादिसमवायिकारणतावच्छेदक

कालिकसंबंधावच्छिन्नका
र्यतानिरूपिताधिकरणतो
पाधिभिन्नत्वं कालत्वं दिक्
साभिचारवारणाय कालि
कसंबंधावच्छिन्नेति अ
हं इति चारः
घटादिकालेति घटः
इति प्रतीतौ
इति कार्यमात्राधि
करणत्वेन कालो विष
यीक्रियते = ५ =

स्वजन्येति स्वक्रियावृत्त्येकक्रियानाशोत्तरोत्पन्नतत्क्रियान्तरजन्यविभागप्रागभावविशिष्टस्वप्रथमकर्मणः क्षणत्वं चेष्टव्याप्त्यापत्तेः क्षणत्वापत्तिरतः स्वजन्येति ननु एवं प्रथमक्षणे क्षणव्यवहारोपपादनेपि द्वितीय
क्षणे कथं तदुपपादनं तत्र तत्क्रियाजन्यविभागोत्पत्त्या विभागप्रागभावाभावात् अतः पूर्वसंयोगेति क्रियाजन्यविभागनाशपूर्वसंयोगविशिष्टक्रियाजन्यविभागस्तदर्थः तेन क्रियाजन्यविभागस्य यत्किंचित्पूर्व
संयोगविशिष्टस्य यत्किंचिद्विभागस्य क्रियाजन्यविभागनाशपूर्वसंयोगविशिष्टस्य [illegible] पूर्वसंयोगनाशावच्छिन्नोत्तरसंयोगप्रागभावो वेति क्रियाजन्योत्तरसंयोगप्रागभाव
इत्यर्थः अतिप्रसंगः चतुर्थक्षणमाह उत्तरसंयोगेति स्वनाशकोत्तरसंयोगस्तदर्थः तेन सर्वसंयोगस्योत्तरसंयोगतया नाशविशिष्टस्य कर्मणः क्षणत्वापत्तेः क्षणत्वापत्तिर्निरस्ता = ९ =

जलवरमाणौ स्नेहानुत्पत्त्या तत्र हपानियमे मानाभावादितिभावः २ सबेदुःखोत्पत्त्यवादिकारणताबच्छेदका २

नतु नित्यस्य स्वरूपयोग्यस्य फलावश्यंभावइति नियमे स्वरूपयोग्यत्वे फलोपधानापत्तिरित्यत आह नि त्यस्येति १

तथा सिद्ध्यति ॥ ईश्वरेऽपि सा जातिरस्ति ॥ अदृष्टादिरूपकारणाभावाच्च न सा खेदुःखोत्पत्तिः नित्यस्य स्वरूपयोग्यस्य फलावश्यं
भावनियमः तस्याऽप्रयोजकत्वात् यद्वेतरेश्वरे सा जातिर्नाऽभिव्यज्यमानाऽभावात् नवदशमद्रव्यत्वापत्तिः ज्ञानाश्रयत्वेन विभु
त्वेनादिसिद्धेः ॥ इन्द्रियाद्यधिष्ठातेति ॥ इन्द्रियाणां शरीरस्य च परम्परया चेतनसंपादकः यद्यप्यात्मनिग्रहं ज्ञाने देहादीना
दिरूपत्वविषयत्वमस्त्येव ॥ तथापि विप्रतिपन्नं प्रति प्रथमतएव शरीरादिभिन्नत्वेन तस्मिन्नेतिगोचरइति प्रतिपादयितेन श
क्यतत्वतः प्रमाणं दर्शयति ॥ करणमिति ॥ वास्यादीनां छिदादिकरणानां कर्त्रा रमन्नेरोपलकुलानपुंसां यथा नेह सुमेवं चक्षुरादी
नां ज्ञानकरणानां फलोपधानमधिकर्त्रा रंस्येन रेतरे प्रयुज्यतइति श्रुतिविरूढः कर्त्ता कल्प्यते ननु शरीरस्यैव कर्तृत्वमस्तु तथा
ह ॥ शरीरे श्रुतचैतन्यस्य नेतृपयविचारतः ॥ ननु चैतन्यं ज्ञानादिकमेव ॥ मुख्यात्मनोनत्वतस्त्वमतशरीराणामपि तदभावेका
रतिः ॥ प्राणाभावे ज्ञानाभावस्य सिद्धेरिति चेन्न ॥ शरीरस्य चैतन्ये बाल्ये विलोकितस्य स्थविरे स्मरणानुपपत्तेः शरीराणामवय
वोपचयापचये उत्पादविनाशशालित्वात् न च पूर्वशरीरोत्पन्नसंस्कारेण द्वितीयशरीरे संस्कार उत्पाद्यतइति वाच्यम् अनेन
संस्कारकल्पनागौरवात् एवं शरीरस्य चैतन्ये बालकस्य स्तन्यपाने प्रवृत्तिर्न स्यात् इष्टसाधनताज्ञानस्य तद्धेतुत्वात् तदानीमिष्ट
साधनताभावकाभावात् जन्मांतरानुभूतेष्टसाधनत्वस्य तदानीं स्मरणादेव प्रवृत्तिः न च जन्मांतरानुभूतमप्यदृष्टपि स्म
र्यतइति वाच्यम् उद्बोधकाभावात् अत्र जननाद्यजीवनादृष्टमेवोद्बोधकं कल्प्यते इत्थं च संस्कारस्यानादित्वादात्मनो नादित्वसिद्धा
वनादिभावस्य नाशासंभवान्नित्यत्वं संभवतीति बोध्यं ननु चक्षुरादीनामेव ज्ञानादिकरणत्वं कर्तृत्वं चास्तु विशेषसाधकाभावाद
तआह तेषामेव मिंद्रियाणां चेदुपघाते कथं स्मृतिः तेषां चेतनत्वे चक्षुरुपघाते नाशे सत्यर्थात् चक्षुरादीनामेव कथमिति पूर्वं चक्षुषा
साक्षात्कृतानां चक्षुषोऽभावे स्मरणं न स्यात् अनुभवितुरभावात् अन्यो दृष्टस्यान्येन स्मरणासंभवात् अनुभवस्मरणयोः सामाना
धिकरण्येन कार्यकारणभावादिति भावः ननु च चक्षुरादीनां चैतन्यं मास्तु नित्यस्य मनसश्चैतन्यं स्यादत आह मनोऽपि न तथा ज्ञानाद्य

उपघातपदस्य लोके अवयवनाशोऽर्थः प्रयोगात् आहेति = २ = कुप्रतिः ४

नन्वीश्वरे हर्षे कृतौ नोत्पद्यते इति चेन्न मिथ्याज्ञानरूपकारणाभावात् मिथ्याज्ञानस्य देहात्मबुद्धिरूपत्वात् प्रसंगात् विभोरात्मनो देहेनादिमत्त्वे तत्वमपि निरूप्यत इत्याशयेनाह यत्वनिविरिति = २ =

ननु तस्मिन्नचैतन्याभावः शरीरे किं विनिगमकं न तस्य शरीरकारणत्वात् ... करणत्वात् आह = ४ =

जीवस्य फलमुक्ता तादृशं देहवर्णनमाह वचसिति = ७

संस्कारनाशाहार्

प्रागभावस्य नाशसंभवादाह भावेति = ७

मितार्थः २

ज्ञानात्मा न इत्येव विशेषः न यावत् संस्थानदशा... नवत्वापत्तिः नवद्रव्यत्वापत्तिः नवत्वादिस्त्रिवानश्रयत्वात् = २ =

नैयायिकमते चक्षुरादौ ज्ञानाभावेन तन्नाधिकरणत्वरूपचैतन्यं = ५ तथा च सप्रयोजकं संस्कारसंबंधेन बाल्यशरीरसम्बेता नुभवसंस्कारो विरस्थविरशरीरे स्मरणानुपपत्तिरिति भावः = ४ =

स्तनपानप्रवृत्तिरुत्पत्तिकाले = ५ =

स्तनपानप्रवृत्तेः इष्टसाधनतास्मरणे = ५ = एकस्य करणत्वं कर्तृत्वं चेति तत्वीकारे = ४ =

समवायिकारणत्वं सामानाधिकरण्यं

मु० 10

४ ननु विज्ञानस्य क्षणिकत्वेन तादृशसंस्कारस्यापि क्षणिकत्वात्
कालांतरे स्मरणं न स्यादिन्याशंकां परिहरति स्मरणादेरिति ॥ ३ ॥

अपोहरूपवादिमते ॥ २ क्षणिकविज्ञानवादी

विज्ञान०

नष्टसंतत्यभावेन नैतथा नचेतनं ज्ञाना[illegible]दी[illegible] ज्ञानादीनां मानसोऽप्रत्यक्षत्वमते च मतत्वस्य हेतुत्वान्मनस्विज्ञानस्य
बोधिसत्त्वे तस्य ज्ञानात्तदुपपत्तेरित्यर्थः यद्यपि मनसोऽप्रत्यक्षत्वेन यथार्थत्वं स्यात् न च स्वविज्ञानमेवात्मा तस्य स्वतः प्रकाशरूपत्वात् चेतनत्व
ज्ञानस्य बोधिकत्वं न सेवाकारविशेषः तस्यापि भावत्वादेव क्षणिकत्वं पूर्वपूर्वविज्ञानस्योत्तरोत्तरहेतुत्वात् सुषुप्तावप्यालयविज्ञान
तथा तन्निराबाधे बहिर्गमस्वासना या वासनात्र व सर्वपूर्वविज्ञानजनितसंस्कारानुगतोत्तरविज्ञाने संक्रान्तत्वाद्ग्रहणोपपत्तिः स्मर
णादेरिति चेन्न तस्य नागहिविषयकत्वे सार्वज्ञत्वापत्तिः यत्किंचिद्विषयकत्वे विनिगमकाभावात् सुषुप्तावपि विषयावभासप्रसंग
श्च तदानीं निराकारा विज्ञानतिरस्कुर्वन्ती तदिति चेन्न तस्याः प्रकाशत्वप्रमाणाभावात् अन्यथा घटादीनामपि ज्ञानत्वापत्तिः नचेदा
पत्तिर्विज्ञानव्यतिरिक्तस्य वस्तुनो भावादिति वाच्यं घटादेरनुभूयमानस्यापलपितुमशक्यत्वात् आकारविशेषएवायं विज्ञान
स्येति चेन्न किमयमाकारोऽतिरिच्यते विज्ञानात् नहि समायाते विज्ञानव्यतिरिक्तो नातिरिच्यते चेन्नहि समुदायालंबने नीलाकारोऽपि पी
ताकारः स्यात् स्वरूपतो विज्ञानस्याविशेषात् अपोहरूपो नीलत्वादिर्विज्ञानधर्म इति चेन्न नीलत्वादीनां विरुद्धानामेकस्मिन्नस
मवेशात् इतरथा विरोधावधारणस्यैव दुरुपपादत्वात् नैवावासनायाः संक्रमः संभवति मातृगर्भगोपरपि वासनासंक्रमप्रसंगात् न
चोपादानोपादेयभावो नियामक इति वाच्यं वासनायाः संक्रमासंभवात् अथोत्तरस्मिन्नुत्पत्तिरेव संक्रम इति चेन्न तदुत्पादका
भावात् विज्ञानमेवोत्पादकत्वे तत्संस्कारानन्त्यप्रसंगः क्षणिकविज्ञाने अतिशयविशेषः कल्प्यत इति चेन्न मानाभावात् कल्पना
गौरवाच्च एतेन क्षणिकशरीरेष्वेव चैतन्यमिति निरस्तं गौरवात् अतिशये मानाभावाच्च बीजादावपि सहकारिसमवधानासम
वधानाभ्यामेवोपपत्तेः कुर्वद्रूपत्वाकल्पनात् अस्तु तर्हि क्षणिकविज्ञाने गौरवात् स्थिरं विज्ञानमेवात्मा अविनाशी वा अरेऽयमात्मा
समंतात्तु नवं तत्त्वस्वप्रकाशस्थिरतरत्वेपीति चेन्न तस्य विषयतासंभवस्पर्शित्वात् निर्विषयस्य ज्ञानत्वे मानाभावात् सविषयकत्वे तस्मा
दननुभवैकतापत्तेः ततो ज्ञानभिन्नो नित्य आत्मेति सिद्धम् सत्यं विज्ञानं विनित्यस्य परं जीवेषु नोपपद्यते ज्ञानं ज्ञानवता[illegible]सविता दि

३ ननु सर्वे० सुषुप्तावाप्यालयविज्ञानस्यैव सर्वेषां विज्ञानस्य क्षणिकत्वेन नाशादिज्ञाना संस्कारवत्तानां सुषुप्त्यादौ कोऽप्यवस्तात् सर्वेति ॥ ३ ॥

ज्ञानत्वस्य विषयताव्याप्यत्वात् ॥ ४ ॥

तदभिन्नः भिन्नस्य तदभिन्नत्व विषयविनियमात् ॥ ५ ॥

नानीलं पीतं ज्ञान इति ॥ ६ ॥

विरुद्धनीलत्वादीनामेकस्मिन्समावेशो ॥ ७ ॥

उपादानेनानुगतस्थितादेव तत्स्थितेरसमपि तिरस्यति नवेति ॥

ज्ञानावासनोत्पादकत्वेन तत्संस्कारानन्त्यापत्तिः ॥ ८ ॥

प्रतिक्षणं नाशाभावात् संसक्ति गौरवात् ॥ ९ ॥

वेदांतिनां मतम् ॥ २ ॥

स्वयं प्रकाशस्थिरतरत्वेपि विज्ञाने आलयविज्ञानस्य आलयविज्ञानं तद्वत् आत्मा ॥ २ ॥

प्रमाणाभावे विज्ञानत्वस्वीकारे ॥ ३ ॥

नीलपीतसमुदायालंबने ॥ ८ ॥ ननु समूहालंबने नीलाकारोऽपि पीताकारे पर्यवसितः स्यात् इत्येव विज्ञानगतोऽपि नीलाकारा ... तथा हि परं मतं विज्ञाने ॥ १० ॥

स्मरणोत्पादकत्वेऽपि ज्ञाने उत्तरोत्तरविज्ञानानुकूलत्वविशेषः ॥ ५ ॥

ननु जीवत्वज्ञानयोरैक्यात् परिणति ज्ञानस्वरूपे ब्रह्म इति नानुपपत्तिः हेय वेदांतिनाम् ज्ञानत्वेति ॥ ११ ॥

४ ननु तैरस्य बीजादेरंकुरोत्पत्तिर्न कुसूलस्थबीजादंकुरत्वादिस्तैः कुर्वद्रूपत्वेन हेतुत्वं स्वीक्रियते कुर्वद्रूपत्वं चांकुरजननकत्वावच्छेदकतया सिद्धो जातिविशेषः सच फलोपधायककालीनकसमर्थबीजमात्रे सिद्धो तत्र व्याप्यः कल्प्यते एव
मन्यादि कुर्वद्रूपत्वेनैव क्षणिकशरीरे स्वजन्योत्पत्तिः [illegible] ज्ञानस्योत्पादकत्वं तत्समतयाह बीजादावपीति कुसूलस्थबीजादिषु परिणतिसलिलसंयोगादिरूपसहकार्यभावादेवांकुराद्यनुत्पत्तेः कुर्वद्रूपत्वेन जनकत्वे प्रमाणाभावात् ॥ ४ ॥
आत्ममात्रस्य नित्यविज्ञानरूपत्वमीश्वरस्येवयाह यद्यपीति तस्य प्रादिना यदज्ञानमनन्तस्य विषयकमिति नियमात् तस्य पाविविषयकत्वे मेवाहीनामपि तदनुभवापत्तेः यत्किंचिद्विषयकत्वे तत्तद्विषयो निसिद्धविषयो वेत्यत्र विनिगमनाविरहेण
तद्दोषमादवस्थादिति सुषुप्तौ विषयावभासप्रसंगाच्च ॥ ५ ॥ ननु जीवस्य अगहविषयकत्वेनवाक्यमनुपपत्तिं किंचिद्विषयकत्वं परन्तु यद्विषयकत्वं यत्र जीवेषु भवसिद्धं तत्तद्विषयकत्वमनाह सविषयकत्वेति ॥ २ ॥

भेदस्यानित्यत्वमभ्युपेत्यापि मोक्षकाले जीवब्रह्मणोर्भेदं खंडयत्यापयति भेदनाशेपीति भेदसत्त्वे व्यक्तिद्वयं निर्वाहमेवेत्यापि तत्त्वचिंतनम् = ३ = ननु निर्धर्मकत्वस्याभिव्यक्तधर्मस्य यत्नं मिथ्यात्वाभावत्व
धर्मस्य तत्पत्त्रत्वरूपत्वाद्भावस्याधिकरणात्मकत्वान्नानुपपत्रत्वमित्यभिप्रायेणशंकते मिथ्यात्वाभाव इति = ४ = मतर्थीयात्प्रत्ययेनानंदशब्देनानंदवत्त्वोधात् अयमानंदमितिज्ञसकलानापत्तिरिति भाव: = ८ =

भिन्नजीवानां भेदसिद्धौ हि तत्तामीश्वरभेदः सिद्धः अन्यथा बंधमोक्षानुपपत्तेः योपीश्वराभेदबोधको वेदः सोपि तदभेदेन तदीयत्वं प्र
तिपादयन् स्तौति अभेदभावनयैव यतितव्यमिति वदति अतएव सर्वं एवात्मानः समर्पितः इति श्रूयते मोक्षदशायामज्ञाननिवृत्त्या
वभेदो ज्ञायत इत्यपि न भेदस्य नित्यत्वेन नाशायोगात् भेदनाशेपि व्यक्तिद्वयं स्यात्स्यादेव न च द्वित्वमपि नश्यतीति वाच्यं तद्धर्मि
केद्वित्वाणि सत्त्वत्वाभावेपि सत्त्वप्रसंगः इति वह्नित्वाभावेपि द्रव्यात्मकोत्वादिति हवचनात् मिथ्यात्वाभावोधिकरणात्मकत्वस्य
सत्त्वमिति चेत् एकत्वाभावेपि व्यक्तिद्वयात्मको द्वित्वमित्युक्तौ अनेकमेकत्वेपि पृथिवीजलयोर्न गंधः इति वद्दुर्भयनैकमिति तस्य सर्वज
नसिद्धत्वात् योपि तदानीमभेदप्रतिपादकश्रुतिगमः सोपि निर्दुःखत्वादिना साम्यं प्रतिपादयति संपद्याधिक्यादोदितो यं राजा स्वं
भरतिवत् अतएव निरंजनः परमं साम्यमुपैतीति श्रूयते ईश्वरोपि न ज्ञानस्वरूपात्मा किं तु ज्ञानस्वरूपाद्याश्रयः नित्यविज्ञानमपि
सोविज्ञानवदेव ज्ञानाश्रयएवोक्तः यः सर्वज्ञः सर्वविदित्याद्यनुरोधात् आनंदमिति यस्यास्य आनंदविदमर्थः आनंदोपि दुःखाभा
वे तदुपचर्यते भाराद्यपगमे सुखी संवृत्तोहमितिवत् अतएवानंदमिति ज्ञानं नत्वमात्रमानंदः अतएवमिति श्रुतेः न विद्यते ज्ञानं यस्ये
ति श्रुतो नार्थ इति चेत् कल्पकल्पनापत्तेः संकरणविरोधात् आनंदमिति ब्रह्मणो यौ या च अन्यथा विरोधाच्चेति एतेन प्रकृतिर्जीव
वः पुष्करपलाशवन्निर्लेपः किं त्वचेतनः कार्यकारणयोरभेदात् कार्यनाशेसति कार्यद्रूपतया नाशोपि स्यादिति प्रकारणत्वेन
स्य बुद्धिगतचैतन्याभिमानानुपपत्तेः कल्पान्ते बुद्धिः प्रकृतेः परिणामः सैव महत्तत्त्वमतः करणमिति श्रूयते तस्यास्तत्त्वा
भ्यां पुरुषस्य संसारापवर्गौ तस्या एव इन्द्रियप्रणालिकया परिणतिर्ज्ञानरूपा तस्यादिना संबंधः पुरुषे कर्तृत्वाभिमानो बुद्धौ चैत
न्याभिमानश्चाभेदाग्रहात् ममेदं कर्तव्यमिति महदंशः पुरुषोपरागो बुद्धेः स्वच्छतया चेतनप्रतिबिंबात्तात्त्विकः दर्पणस्येव
मुखोपरागः इदमितिविषयोपरागः इन्द्रियप्रणालिकया परिणतिभेदस्तात्त्विकः निःश्वासाभिहतदर्पणस्येव मलिनिमा
कर्तव्यमिति व्यापारांशः तेनांशत्रयवती बुद्धिस्तत्परिणामे न ज्ञानेन पुरुषस्यातात्त्विकः संबंधः दर्पणमलिनिम्नेव मुखस्या

ननु कथमेकत्वाधि
करणेनहभावरूपे
द्वित्वमित्यतआह ।
अनेकमिति = ५ =
वस्तु विरुद्धे वभ
वति = ६ =

अधि
करणस्वरूपेण = ८ =
वृद्धौ हावत्पदार्थत्वाभा
वेन वस्तुत्वप्रयोजितार्थः
नतु ननु तत्स्वरूपेपि तद्गुण
वत्त्वकी अन्यथा नर्थस्य
मानार्थस्य यामे देनानवास
भवात् इति वाच्यम् तस्य
मत्त्वेपि निवापात् = ७ =
आनंदपाद्यस्य प्रलिंगत्वनि
यमेनानंदविमस्यमतुर्थी
वाच्यप्रत्ययं विनानुपपत्तेः
ननु पत्नाहप्रासत्त्वे किंमात
मतआह बुद्धिगतेति क
थितस्मिन्द्रसौवचेतनस्य
बुद्धावारोपसंभवादिति भा
वः = ५ =
अपंहदरस्यादिना नरूपः
विषयेणबुद्धेः संबंधः तस्य
पारमार्थिकत्वे निःश्वासा
भिहितदर्पणस्य मलिनिम्ना
दृष्टांतः प्रणालिकयेति = २

तत्वमतेईश्वरेआनं
दाभावएवनत्वन्ना
द आनंदीपीति = ८ =
लक्षणापत्तिकत्वन
मेवत्वोपादाद आत्व
वेति = ८ =
संक्रमतह्रयति आम
भिदानवत्त्वसाधनेनवत्वमा
णपुर्याद = ७ = कर्तृत्वा
त्रकर्तृभूतांतःकरणप्रकृति
त्व अत्रकृतप्रकृतिमहत्तत्त्व
णकर्तृत्वस्यतन्मतेनतःकर
णधर्मत्वादिति ध्येयम् = ५ =
दर्पणस्ययथा उत्त्वसंबं
धःप्रतिबिंबमात्रंतत्त्वता
त्विकस्तथाबुद्धिपुरुषयोर्भे
दाग्रहादेकत्वाभिमानः
पुरुषोपरागः = ३ =

इच्छाकृतपुरुषोपरागविषयोपरागाभ्यां कर्तव्यमस्यवदाद्देख
भावस्तेनकर्तव्यमितिव्यवसायोव्यापारांशस्यार्थः = १ =

बुद्धिसत्त्वेइंद्रियप्रणालिकयातत्परिणामेनाहं देहस्थादित्यनेनसंबद्धो देहादि
र्विषयः स्वाकारस्तानपरिणामितद्वाउद्गृहीतामुमर्गकृत्वसंबंधेनपुरुषनिष्ठःपुरुष
स्वरूपतिरोधानेनपुरुषस्यसंसारसंपादकः बुद्धिनाशेतनतत्परिणामस्यादंदेहद
र्शादिमात्ररूपस्याभावादिविषयावच्छेदाभावात्केवलावस्थानं मोक्षः = १५ =

फलत्विति कर्त्त्वाचे नानवतस्तावद्बुद्धिः इच्छाद्वेषप्रयत्नधर्माधर्माश्चयित्रृ देहे एव कृतिसामानाधिकरण्येन प्रतीतेः नव बुद्धिश्चेतना परि
णामित्वादिति मतमपास्तम् कृत्यदृष्टभोगानामिव चेतनस्यापि सामानाधिकरण्येन प्रतीतेः नहि ज्ञे मानाभावो चेतनोऽहं करो
मीति प्रतीतेः परिणामित्वाच्चेतनत्वांशे भ्रम इति चेत् कृत्यंशेऽपि किं नेष्यते अन्यथा देहे नित्यत्वे मोक्षाभावः अनित्यत्वे न सर्वसं
सारापत्तिः अचेतनायाः प्रकृतेः कार्यत्वाद्देहे चेतनत्वे कार्यकारणयोस्तादात्म्यादिति चेन्न असिद्धेः कर्त्तृजन्यत्वे मानाभावात्
वीतरागजन्मादर्शनात् नित्यत्वे मनोऽवयवानां नित्यत्वं न किं प्रकृत्यादिकल्पनेन न च प्रकृतेः क्रियमाणानि गुणैः कर्
माणि सर्वशः अहंकारविमूढात्मा कर्ताहमिति मन्यते इत्यनेन विरोध इति वाच्यं प्रकृतेरहंकारस्य गुणोऽहंजन्येच्छादिमि
कर्ताहं कर्ताहमेवेत्यस्य तदर्थत्वात् न चैवं सति कर्तारमात्मानं केवलं तु यः इत्यादि वर्त्म भगवतोक्तो यत्नपरिहारो नाशय
इति संक्षेपः धर्माधर्माश्रयोऽध्यक्षो विशेषगुणयोगतः ४८ आत्मेत्यनुवर्तते शरीरस्य तदाश्रयत्वे देहान्तरकृतकर्मणो देहान्त
रे भोगानुपपत्तेः विशेषगुणयोगतः इति योग्यविशेषगुणसंबंधेनात्मनः प्रत्यक्षं भवति न त्वन्यथा अहं जाने अहं करोमीत्या
दिप्रतीतेः परात्मा त्वनुमीयते इत्याह प्रवृत्त्याद्यनुमेयोऽयं रथगत्येव सारथिः आत्मा परदेहादौ प्रवृत्त्यादिनानुमीयते प्रवृत्तिर
त्र चेष्टा ज्ञानेच्छाप्रयत्नादीनां देहेऽभावस्योक्तप्रायत्वात् चेष्टायाश्च प्रयत्नसाध्यत्वात् चेष्टया प्रयत्नवानात्मानुमीयते इ
तिभावः अत्र दृष्टान्तः रथगत्येव सारथिरिति यद्यपि रथकर्म चेष्टा न भवति तथापि तेन कर्मणा सारथिर्यथानुमीयते त
था चेष्टात्मकेन कर्मणा परात्मापीति भावः अहंकारस्याश्रयोऽयं मनोमात्रस्य गोचरः ४९ अहंकारोऽहमिति धीस्तस्याश्रयो वि
षयः आत्मा न शरीरादिरिति मनोमात्रस्येति मनोभिन्नेन्द्रियजन्यप्रत्यक्षाविषयो मानसप्रत्यक्षविषयश्चेत्यर्थः रूपाद्यभावेन ॥
इन्द्रियान्तरायोग्यत्वात् विभुर्बुद्ध्यादिगुणवान् बुद्धिस्तु द्विविधा मता विभुत्वं परममहत्परिमाणवत्त्वम् तच्च सर्वमूर्त्तसंयो १९
गित्वम् बुद्ध्यादीति बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मसंख्यादयः पञ्चावेदितव्याः अत्रैव प्रसंगात् बुद्धेः प्रपञ्चं दर्शयति

पक्षधर्मतायाश्चवैशेष्येन तद्वयाप्तज्ञानं तस्मात् अथवेति अत्रापि पक्षतावच्छेदकधर्मसाध्यतावच्छेदकहेतुतावच्छेदकसंबंधानामनंतत्वात् एकव्याप्त्युपादाने ऽव्याप्तिः तथा च व्याप्तिरेकैव त्रिसूत्रायत ज्ञानकरणकत्वं अनुभवत्वव्याप्यजातिमत्त्वस्य विवक्षितत्वात् = ५ =

आदिना विशेषणतावच्छेदकप्रकारकनिश्चयविधया परामर्शजन्यत्व विशिष्टवैशिष्ट्यबोधस्य परिग्रहः = परामर्शजन्य मिति विषयविषयि तत्परामर्शस्य हेतुत्वादिति भावः = ७ =

इन्द्रियजन्यमिंद्रियजन्यत्व प्रत्यक्षम् ज्ञानं अनुमित्यादावतिव्याप्तिः इन्द्रियत्वेनेति ३ =

म

बुद्धीति । बुद्धिं विभजते अनुभूतिरिति अनुभूतिः स्मृतिश्च स्यादनुभूतिश्चतुर्विधा ५० अनुभवत्वं स्मृतिभिन्नज्ञानत्वं जातिविशेषो वा अनु
भवामीत्यनुव्यवसायसिद्धमनुभवत्वं जातिरित्यपि केचित् चतुर्विधेति प्रत्यक्षमप्यनुमितिस्तथोपमितिशब्दजे एतासां च
तसृणां करणानि चत्वारि प्रमाणानि प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानीति सूत्रोक्तानि वेदितव्यानि तत्रेन्द्रियजन्यं ज्ञा
नं प्रत्यक्षम् यद्यपि मनोरूपेन्द्रियजन्यं सर्वमेव ज्ञानं तथापीन्द्रियत्वरूपेणेन्द्रियाणां यज्ज्ञाने करणत्वं तत्प्रत्यक्षमिति विवक्षि
तम् ईश्वरप्रत्यक्षं त्विन्द्रियार्थसन्निकर्षोत्पन्नमिति सूत्रे तथैवोक्तत्वात् अथवा ज्ञानाकरणकं ज्ञानं प्रत्यक्षम्
अनुमितौ व्याप्तिज्ञानस्योपमितौ सादृश्यज्ञानस्य शाब्दबोधे पदज्ञानस्य स्मरणे चानुभवस्य करणत्वान्न तत्रातिव्याप्तिः इदं लक्ष
णमीश्वरप्रत्यक्षसाधारणं परामर्शजन्यं ज्ञानमनुमितिः यद्यपि परामर्शप्रत्यक्षादिकं परामर्शजन्यं तथापि परामर्शज
न्यं हेत्वविषयकं ज्ञानमनुमितिः न च कादाचित्कहेत्वविषयकानुमिताव्याप्तिरिति वाच्यम् तादृशज्ञाने हेत्वनुभवत्वव्या
प्यजातिमत्त्वस्य विवक्षितत्वात् अथवा व्याप्तिज्ञानकरणकं ज्ञानमनुमितिः एवं सादृश्यज्ञानकरणकं ज्ञानमुपमितिः पद
ज्ञानकरणकं ज्ञानं शाब्दबोधः वस्तुतो यत्किंचिदनुमितिमात्रायतनद्यां किंहेतुत्वप्रत्यक्षादिप्रमाजातिमत्त्वमनुमितित्वम् एवं य
त्किंचित्प्रत्यक्षादिकं प्रतिमात्राय तनद्यां किंहेतुत्वमुपमितित्वं तद्भिन्नजातिमत्त्वं प्रत्यक्षत्वादिकं वाच्यमिति प्रत्यक्षं विभजते
घ्राणजादिप्रभेदेन घ्राणजं रासनं चाक्षुषं स्पार्शनं श्रोत्रं मानसमिति प्रत्यक्षं षड्विधं मतम् ५१ न चेश्वरप्रत्यक्षस्य विभक्ता
न्यूनत्वम् जन्यप्रत्यक्षस्यैव निरूपणीयत्वात् जन्यस्यानुसारात् घ्राणस्य गोचरो गंधो गंधत्वादिरपि स्मृतः गोचर इति
ग्राह्य इत्यर्थः गंधत्वादिरित्यादिपदात् सुरभित्वादिपरिग्रहः गंधस्य प्रत्यक्षत्वात्तद्वृत्तिजातिरपि प्रत्यक्षा गंधाश्रयग्रहणे तु
घ्राणस्य न सामर्थ्यमिति बोध्यम् तथा रसो रसज्ञायाः रसत्वादिसहित इत्यर्थः तथा शब्दोऽपि च श्रुतेः ५२ तथा शब्दत्वादि
सहितः गंधो रसश्चोद्भूतो बोध्यः उद्भूतरूपं नयनस्य गोचरो द्रव्याणि तद्वन्ति पृथक्त्वसंख्ये विभागसंयोगपरापरत्वस्नेहद्रव

ज्ञानमेवाप्यदे प्रत्यक्षव्याप्तिका रित्ववसायात्मकप्रत्यक्षत्वात्

कालादिविषयिता प्रमेया व्याप्यजातिमत्त्वात् पक्षतावच्छेदकविधया प्रत्यक्षाभावात् = ८

इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानं प्रत्यक्षम् = ५ =

नन्वनुमितित्वमपि मनस्त्वेनैव करणत्वम् न च कार्यवैजात्यं तस्माद्धिति सामग्रीवैलक्षण्यानुपपत्तेः न च प्रमाणविभागानुपपत्तिः क्रियाविशेषानुपपत्तेः अतः सर्वोक्तानुमित्यादिलक्षणानामसंभवत्वमाह वस्तुत इति वदेयु- सम्यक् प्रत्यक्षानुभवत्वमादाय प्रत्यक्षादौ व्यभिचारः प्रसक्त इतीति वृत्तित्वसमवायेन तेनानुमितौ कालिकेन वृत्तित्वस्य निर्विवादत्वात् = ७ =

मु॰ च॰
१२

आदिना चूर्णप्रविष्टतेजःपरिग्रहः = १ =

नोष्मादिगतानुद्भूतरूपं परिहर्तुं

त्वं परिमाणं पृथक्त्वम् ५३ क्रियाजातिर्योग्यवृत्तिः समवायश्च तादृशः ग्रीष्मोष्मादावनुद्भूतरूपमिति न चाक्षुषम् तदर्थमुद्भूतरूप
वदिति योग्येति इन्द्रियत्वादिकमपि योग्यव्यक्तिवृत्ति नेत्याह तादृशो योग्यव्यक्तिवृत्तिरित्यर्थः चक्षुर्योग्यत्वमेव कुत इत्यत आह गृह्णा
ति चक्षुः संबन्धादालोकोद्भूतरूपयोः ५४ आलोकसंयोग उद्भूतरूपं च चाक्षुषप्रत्यक्षे कारणम् तत्र द्रव्यचाक्षुषप्रतीतियोः समव
वायसंबन्धेन कारणत्वम् द्रव्यसमवेतरूपादिप्रत्यक्षे स्वाश्रयसमवायसंबन्धेन द्रव्यसमवेतसमवेतस्य रूपत्वादेः प्रत्यक्षे स्वाश्र
यसमवेतसमवायसंबन्धेनेति उद्भूतस्पर्शवद्द्रव्यं गोचरः सोऽपि च त्वचः सोऽपि उद्भूतस्पर्शोऽपि स्पर्शत्वादिसहितः २५ रूपान्यच्चक्षुषो
योग्यं २६ रूपभिन्नं रूपत्वादिभिन्नं यच्चक्षुषो योग्यं तत् त्वगिन्द्रियस्यापि ग्राह्यम् तथा च संख्यादिसंयोगविभागपरत्वापरत्वगुणाः कर्माः च
वेक्रियापत्वे जातयो योग्यवृत्तयश्च त्वचो ग्राह्या इति रूपमत्रापि कारणम् ५५ इत्याधस्ते अत्रापि त्वगिन्द्रियजन्येऽपि द्रव्यप्रत्यक्षे
रूपं कारणं तथा च बहिरिन्द्रियजन्यद्रव्यप्रत्यक्षे रूपं कारणमिति नवीनास्तु बहिरिन्द्रियप्रत्यक्षे न रूपं कारणं प्रमाणाभावात् ।
किं तु चाक्षुषप्रत्यक्षे रूपं स्पार्शनप्रत्यक्षे स्पर्शः कारणमन्वयव्यतिरेकात् बहिरिन्द्रियजन्यद्रव्यप्रत्यक्षत्वमात्रे किं कारणमिति चे
न्न किंचित् आत्मावृत्तिशब्दभिन्नविशेषगुणवत्त्वं वा प्रयोजकमस्तु रूपस्य कारणत्वे लाघवमिति चेन्न वायोस्त्वगिन्द्रियेणाग्रह
णप्रसंगात् इष्टापत्तिरिति चेन्न स्पर्शवत्त्वस्य वा कारणमस्तु प्रभायाश्च प्रत्यक्षे विशेषापत्तिरेव किं न स्यान्न स्यात् प्रभां पश्यामीति
वदामि स्पृशामीति प्रत्ययस्य सत्वाद्वायोरपि प्रत्यक्षत्वं भवत्येव बहिरिन्द्रियप्रत्यक्षमात्रे न रूपस्य न वा स्पर्शस्य कारणत्वं वायुप्रभ
योरेकत्वादिग्रहणं तत्र च क्वचिद्द्वित्वादिकमपि क्वचित् संख्यापरिमाणानुग्रहे दोषाभावादित्याहुः त्वचो योगो मनसा ज्ञानकारणम् २७ त्व
ङ्मनःसंयोगो ज्ञानमात्रे कारणमित्यर्थः किं तत्र प्रमाणं सुषुप्तिकाले त्वचं त्यक्त्वा पुरीतति वर्त्तमाने न मनसा ज्ञानाजननमिति
न तु सुषुप्तिकाले किं ज्ञानं भविष्यति अनुभवरूपं स्मरणरूपं वा नाद्यः अनुभवसामग्र्यभावात् तथाहि प्रत्यक्षे चक्षुरादीना
सह मनःसंयोगस्य हेतुत्वात् तदभावादेव न चाक्षुषादिप्रत्यक्षम् ज्ञानादेरभावादेव न मानसं प्रत्यक्षं ज्ञानाद्यभावे चात्मनोऽपि १२

नन्वत्र कार्याभावे कारणाभाव स्य प्रयोजकतया गगनादौ बहिरिन्द्रियजन्यप्रत्यक्षाभावे रूपाभाव स्पर्शाभावयोः प्रयोजकत्वकल्पने गौरवात् तादृशप्रत्यक्षे रूपत्वेन हेतुतां कल्पयित्वा रूपत्वावच्छिन्नाभावत्वेनैव बहिरिन्द्रियजन्यप्रत्यक्षाभावे प्रयोजकत्वमुचितमित्यत आह आत्मावृत्तीति आत्मनि अवृत्ति आत्मावृत्तीति तेन शब्दभिन्नेति कालादौ व्यभिचार २८ विशेषेति = २ = ॥

संयोगो आलोकोद्भूतरूपयोः

आलोकोद्भूतरूपयोः

योग्यगुणसंबन्धे तेन च मनसस्त्वक्संयोगविशेषस्य [illegible] ज्ञानारम्भकस्तु [illegible] ज्ञानाभावः प्रसज्यते = १

ननु उद्भूतस्पार्शनानंगीकाराप्रस्पार्शनद्वारणाय स्पर्शाय स्य समवेत स्पार्शनं प्रति त्वक्संयुक्तस्पार्शनवति समवायत्वेन हेतुत्वस्य वाच्यतया वायोः स्पार्शनानंगीकारो नोचितः अथ वा वायुगतसंख्यापरिमाणयोस्त्वचाग्रहणप्रसंगात् अत आह वायुप्रभयोरिति प्रभो
पादानहेतुत्वेनार्थं यद्यपि तत्र एवेति तथा च वायुगतसंख्यादिग्रहे इष्टापत्या वायोः स्पार्शनानंगीकारे बाधकाभाव इति भावः क्वचिदिति सजातीयसंवलनाभावे इत्यर्थः आदिना परिमाणग्रहः तद्ग्रहे द्रव्यस्याप्येकत्वावच्छेदेन त्वगिन्द्रियसन्निकर्षस्थले बोध्यः ननु सजाती
यसंवलने दृश्यमानेषु वायवावच्छेदेन त्वगिन्द्रियसन्निकर्षाभावे कथं वायुगतद्वित्वपरिमाणबोधः अत आह दोषादिति सजातीयसंवलनादिरूपाद्दोषादित्यर्थः आकृतिप्रत्येनाऽस्वरसः तद्बीजं तु वायोः प्रत्यक्षतासंदेहे लाघवात् तन्मते प्रत्यक्षत्वावच्छिन्नं प्रति
रूपत्वेनैव कारणत्वमुचितम् न च वायुप्रत्यक्षतासंदेहाधीनव्यभिचारसंदेहस्य प्रतिबन्धकस्य सत्वात् कथं कारणताग्रह इति वाच्यम् लाघवतर्कभाववृत्तितस्यैव व्यभिचारसंदेहस्य प्रतिबन्धकतया प्रकृते च सर्वांतलाघवतर्कस्य सत्वेन तद्भ
वविशिष्टव्यभिचारसंदेहाभावस्य सत्वात् पक्षोक्तम् प्रभायाः प्रत्यक्षे विशेषापत्तिः इत्यत्र [illegible] विना उपरिदेशे विहंगमस्तादिप्रत्यक्षानुपपत्तेः = ४ =

=२ एवं च सुषुप्त्यव्यवहितपूर्वक्षणे तत्त्वचित्रात्ममनःसंयोगरूपासमवायिकारणनाशात् तज्ज्ञानोत्पत्त्यभावात् असमवायिकारणस्य कार्यसहभावेन हेतुत्वात् यदि च कार्यनाशजनकनाशप्रतियोगित्वरूपासमवायिकारणस्य कार्यसहभावेन हेतुत्वमिति मन्यते तथापि सुषुप्त्यव्यवहितप्राक्कालोत्पन्नज्ञानध्वंसे सुषुप्तिकाले प्रयत्नाप्रतिबन्धात् त्वङ्मनःसंयोगादेर्हेतुत्वम् विजातीयात्ममनःसंयोगहेतुत्वेनैव तदुत्पत्तेरुपपत्तेः न चैवं ज्ञाने तदात्ममनःसंयोगस्य त्वङ्मनःसंयोगस्य वा हेतुत्वमित्यत्र विनिगमकाभावः त्वङ्मनःसंयोगादेरवच्छेदकतासंबन्धेन हेतुतापेक्षया समवायेनात्ममनःसंयोगस्य हेतुत्वे लाघवात् त्वङ्मनःसंयोगस्य हेतुत्वे चात्मत्वादिसामग्र्याः सार्वत्रिकप्रतिबन्धकत्वानङ्गी‐
इत्याद्याचार्यैरिति सुषुप्त्याज्ञानमत्र विवक्षितम् =१
स्यात् =२=

(left margin) उद्बोधकस्य फलवलकल्प्यत्वात् =२=

नुपपत्तमिति व्याप्तिज्ञानाभावादेव नानुमितिः सादृश्यज्ञानाभावान्नोपमितिः पदज्ञानाभावान्न शाब्दबोधः स्मृत्यनुभवसामग्र्य‐
भावान्नानुभवः उद्बोधकाभावान्न स्मरणम् मैवम् सुषुप्तिप्राक्काले उत्पन्नेच्छादिप्रत्यक्षे स्वतः संबन्धेनात्मनः सुखदुःखादिसंयोगात् न
त्वगिन्द्रियत्वेमानाभावः सुषुप्तिप्राक्काले निर्विकल्पकमेव नियमेन जायते इत्यत्रापि प्रमाणाभावात् अथ ज्ञानमात्रे त्वङ्म‐
नःसंयोगस्य यदि कारणत्वं न स्यात् रसनचाक्षुषादिप्रत्यक्षकाले चाक्षुषत्वं स्यात् विषयत्वक्संयोगस्य त्वङ्मनःसंयोगस्य च
सत्त्वात् परस्परप्रतिबन्धादेकमपि वा न स्यादिति अत्र केचित् पूर्वोक्तत्वङ्मनोयोगस्य हेतुत्वे सिद्धे चाक्षुषादिसामग्र्याः स्पा‐ (margin) प्रत्यक्षेत्यर्थः
र्शनादिप्रतिबन्धकत्वमनुभवानुरोधात् कल्प्यत इति अत्रेदं सुषुप्त्यनुरोधाच्चर्ममनःसंयोगस्य ज्ञानहेतुत्वं कल्प्यम् चाक्षुषा‐
दिप्रत्यक्षकाले त्वङ्मनःसंयोगाभावान्न चाक्षुषप्रत्यक्षमिति मनोग्राह्यं सुखं दुःखमिच्छा द्वेषो मतिः कृतिः मनोजन्यप्रत्यक्षवि‐
षय इत्यर्थः मतिर्ज्ञानं कृतिर्यत्नः एवं सुखत्वादिकमपि मनोग्राह्यम् एवमात्मापि मनोग्राह्यः किं तु मनो मात्रस्य गोचरः
मनेन पूर्वं शङ्कितात्मनोक्तं ज्ञानं यन्निर्विकल्पाख्यं तदतीन्द्रियमिष्यते चक्षुःसंयोगाद्यनन्तरं घट इत्याकारकं घटत्वादिवि‐ (margin) =७ विशेषणेति
शिष्टज्ञानं न संभवति पूर्वं विशेषणस्य घटत्वादेर्ज्ञानाभावात् विशिष्टबुद्धौ विशेषणज्ञानस्य कारणत्वात् तथा च प्रथ‐
मतो घटघटत्वयोर्वैशिष्ट्यानवगाह्येव ज्ञानं जायते तदेव निर्विकल्पकं तच्चानुप्रत्यक्षम् तथा हि वैशिष्ट्यानवगाहिज्ञानस्य
प्रत्यक्षत्वं न संभवति घटमहं जानामीति प्रत्ययात् तत्र ज्ञानविषयीभूयमानं ज्ञाने घटस्तत्र घटत्वं प्रकारः स एव वि‐
शेषणमित्युच्यते विशेषणे यद्विशेषणं तदेव विशेषणतावच्छेदकमित्युच्यते विशेषणतावच्छेदकप्रकारकं ज्ञानं विशि‐
ष्टवैशिष्ट्यावगाहिज्ञाने कारणं निर्विकल्पके च घटत्वादिकं न प्रकारः तेन च घटत्वादिविशिष्टघटवैशिष्ट्यज्ञानं ज्ञाने न सं‐
भवति घटत्वाद्यप्रकारकं च घटादिविशिष्टज्ञानं न संभवति जात्यतिरिक्तपदार्थज्ञानस्य किंचिद्धर्मप्रकारकत्वनियमा‐
त् महत्त्वं षड्विधे हेतुः द्रव्यप्रत्यक्षे महत्त्वं समवायसंबन्धेन कारणम् द्रव्यसमवेतगुणकर्मप्रत्यक्षे स्वाश्रयसमवायसं‐

(left margin) वैशिष्ट्यानिरूपकं सर्वं विषयप्रत्यक्षमेवेत्यर्थः वैशिष्ट्यं सार्वत्रिकं विषयता निरूप्यते घटघटत्वयोर्वैशिष्ट्यं वैशिष्ट्यप्रकारतास्त्यत्र तत् तयोर्वैशिष्ट्यं मानिकविषयता नियततया =६= नापीत्यवगाहित्वे नैव ज्ञानं घटत्वस्यानुभव सिद्धत्वादित्यर्थः =५=

(right margin) =७ विशेषणेति कदाचिद्घटत्वप्रकारकं घटत्वप्रकारकं कदाचिज्जातिमानिति जातित्वेन घटत्वप्रकारकं ज्ञानं जायते इत्यनुभवसाक्षिकम्। तद्विशेषस्तु घटत्वांशे निष्प्रकारकं घटत्वप्रकारकं इत्यतो नाशज्ञानतत्ते न घटत्वेऽस्तीति प्रकारकं घटविशिष्टबुद्धौ घटत्वांशेऽप्रकारकत्वाविनाशीति तादृशघटत्वस्य मतेन हेतुत्वस्य वा प्रकारान्तरेऽपि द्वितीयावृत्तिः =७=

कर्मसामान्या। विषया=

शुक्लत्वादि जातिव्याप्यकोद्भूतत्वमस्ति अनुद्भूतत्वमप्यस्ति
शुक्लोद्भूतत्वं हि उद्भूतत्वं शुक्लत्वव्याप्यमस्ति न त्वनुद्भूतत्वं [illegible]
त्वव्यापकमुद्भूतत्वं शुक्लत्वव्याप्यम् एवं नीलोद्भूतत्वनीलत्वयोर्व्या
प्यव्यापकभावे [illegible] तथा च व्याप्यव्यापकजात्योर्न संकरः = ८

प्रत्येकसमवायकारणतावच्छेदकत्वे व्यभिचारात् करणमेव
तुल्यविधारणाय कारणतावच्छेदकत्वात् = ५=

यत्र पृथिवीत्वं तत्र घ्राणेन्द्रियत्वस्याभावः [illegible] यत्र रसनादावि
न्द्रियत्वं तत्र पृथिवीत्वस्याभावः पृथिवी तन्निन्द्रियत्वं च घ्राणेन्द्रिये = २

मु.व.
१२
13

बंधेन द्रव्यसमवेतसमवेतानां गुणत्वादीनां ग्रहे स्वाश्रयसमवेतसमवायसंबंधेन कारणमिति इन्द्रियं करणमत
म् ५९ अत्रापि द्विविधस्मरणमुपजायते इन्द्रियत्वं न जातिः पृथिवीत्वादिना सांकर्यात् इन्द्रियत्वं तु शब्देतरोद्भूतविशेष
गुणानाश्रयत्वे सति ज्ञानकारणमनःसंयोगाश्रयत्वम् आत्मादिवारणाय सत्यन्तम् उद्भूतविशेषगुणस्य श्रोत्रे सत्त्वा
च्छब्देतरेति विशेषगुणस्य रूपादेश्चक्षुरादावपि सत्त्वादुद्भूतेति उद्भूतत्वं न जातिः शुक्लत्वादिना संकरात् न च शुक्लत्वा
दिव्याप्यं नानैवोद्भूतत्वमिति वाच्यम् उद्भूतरूपत्वादिना चाक्षुषादौ जनकत्वानुपपत्तेः किं तु शुक्लत्वादिव्याप्यमनुद्भूत
त्वं नाना तदभाववत्त्वमुद्भूतत्वम् तादृशोद्भूतत्वं चाक्षुसंयोगादिषु त्वगादावस्त्यतो विशेषेति कालादीवारणाय वि
शेषणदलम् इन्द्रियावयवविषयसंयोगस्यापि ज्ञानं प्रति जनकत्वादिन्द्रियावयववारणाय कालादेरपि भा
वस्यत्वे सन्निकर्षघटकतया कारणीभूतचक्षुःसंयोगाश्रयस्य कालादेर्वारणाय मनःपदम् ज्ञानाकरणमित्यपि त
द्वारणाय करणमिति असाधारणकारणं करणम् असाधारणत्वं व्यापारवत्त्वम् विषयेन्द्रियसंबंधो व्यापारः सोपि
षड्विधः व्यापारः सन्निकर्षः षड्विधः तदुदाहरणद्वारा वदन्नाह द्रव्यग्रहस्तु संयोगात्संयुक्तसमवायतः ५८ द्रव्येषु
समवेतानां तथा तत्समवायतः तत्रापि समवेतानां द्रव्यग्रहस्त्विन्द्रियसंयोगजन्यः द्रव्यसमवेतग्रहे इन्द्रियसंयु
क्तसमवायजन्यः एवमग्रेपि वर्तुलत्वं स्पर्शचाक्षुषप्रतिचक्षुःसंयोगः कारणम् द्रव्यसमवेतचाक्षुषप्रतिचक्षुःसं
युक्तसमवायः द्रव्यसमवेतसमवेतचाक्षुषप्रति चक्षुःसंयुक्तसमवेतसमवायः एवमन्यत्रापि विशिष्यैव कार्यकारण
भावः परे तु पृथिवीपरमाणौ नीले नीलत्वं पृथिवीपरमाणौ पृथिवीत्वं च चाक्षुषं कथं न जायते तत्र च परंपरयोद्भूतरूप
[illegible] समहत्त्व[illegible]स्य च विद्यमानत्वात् तथा हि नीलत्वं जातिरेकैव घटनीले परमाणुनीले च वर्तते तथा च महत्त्व
संबंधो घटनीलमादायवर्तते रूपसंबंधस्तु परमाणुमादाय वर्तते एवं पृथिवीत्वेपि घटादिकमादाय महत्त्वसंबंधो वा

तन्नीलपरमाणुनीलं च = साश्रयहंतिलं = १

इन्द्रियावयवार्थावयव
योः सन्निकर्षेपि ज्ञानका
रणता अयत्नसिद्धि
वायवेगमतो मनः
पदम् नवीनमते मनःप
दप्रयोजनमाह कालाद
वपि समवायनवद्य
प्रभावादीनां कालेसत्त्वे
पि न तत्प्रत्यक्षं यो प्रत्यक्ष
लक्षणभावतोरूपाभाव
वर्युता प्रभावे न तत्त्वहारण
येति = ७ =

त्वक्संयोगाद
दर्शनं तथाच
हेतनरोद्भूत
त्वः

द्रव्यसमवेतसमवेतवृत्ति
लौकिकविषयितासंबंधे
न प्रत्यक्षमिन्द्रियसंयुक्त
समवेतसमवायजन्य
मित्यर्थः = ५२
न तु द्रव्यग्रहत्वेन इन्द्रियस
न्निकर्षसत्वेन लौकिक प्रभा
संयोगाद्वाक्षुषापत्तिरेव
मंधकारे घटचक्षुःसंयोगा
द्वित्यतआह चक्षुरिति = ५
महत्त्व
स्वाश्रयसमवायसम
वेतत्वसंबंधेन = २
उद्भूत

द्रव्यवृत्तिलौकिकविषयि
तासंबंधेन प्रत्यक्षमित्यर्थः = ६

स्वाश्रयसमवेत
समवायेन
ग
२

तन्त्वेवमात्मसमवायत्वरोधेन मनःसंयुक्तसमवायोगस्पृत्तगनादिस्तत्त्वरोधेन मनः
संयुक्तसमवायस्य प्रत्यासत्तित्वे पि चक्षुरादिसंयोगतत्संयुक्तसमवायपरंपरा [illegible]
चक्षुरादिसंयुक्तसमवेतसमवायेन [illegible] तस्याह परंपरेति = [illegible]

रूप उद्भूत महत्त्व स्पर्श
स्वाश्रयसंनिकर्ष स्वाश्रयसमवेतसंनिकर्ष

एकत्वादेः संबन्धस्य त्वम रेणौ अभावात्
योगेनैव तत्स्पर्शत्वप्रमतः संयोगस्य प्रत्या
सत्तित्वमावश्यक =

उद्भूतरूपावच्छिन्नमहत्त्वावच्छिन्नेति चक्षुःसंयुक्तपदार्थेऽकदेशे संयोगेऽन्वेति = १

ष्वः एवं वायोस्तदीयस्पर्शादेः समवायाच्चाक्षुषप्रत्यक्षं स्यात् तस्मादुद्भूतरूपावच्छिन्नमहत्त्वावच्छिन्नं च चक्षुःसंयुक्तसमवायस्य
द्रव्यसमवेतप्रत्यक्षे तादृशचक्षुःसंयुक्तसमवेतसमवायस्य द्रव्यसमवेतसमवेतप्रत्यक्षे कारणत्वं वाच्यम् इत्थं च परमा
णुनीलादौ न नीलत्वादिप्रत्यक्षः परमाणौ चक्षुःसंयोगस्य महत्त्वावच्छिन्नत्वाभावात् एवं वाय्वादौ न सत्तादिचाक्षुषम् तत्र
चक्षुःसंयोगस्य रूपानवच्छिन्नत्वात् एवं यद्यपि स्पर्शत्वावच्छेदेनालोकसंयोगः चक्षुःसंयोगस्य यावच्छेदेन तत्र च द्रव्यमहा
भावादालोकसंयोगावच्छिन्नत्वं च चक्षुःसंयोगे विशेषणं त्वं बोध्यम् एवं द्रव्यस्पार्शनप्रत्यक्षे त्वक्संयोगः कारणं द्रव्यसमवे
तस्पार्शनप्रत्यक्षे त्वक्संयुक्तसमवायः द्रव्यसमवेतसमवेतस्पार्शनप्रत्यक्षे त्वक्संयुक्तसमवेतसमवायः अत्रापि महत्त्वा
वच्छिन्नत्वे उद्भूतस्पर्शावच्छिन्नत्वं च पूर्ववदेव बोध्यम् एवं गन्धप्रत्यक्षे घ्राणसंयुक्तसमवायः रसप्रत्यक्षे रसनसंयुक्तसम
वायः गन्धसमवेतस्य घ्राणजप्रत्यक्षे घ्राणसंयुक्तसमवेतसमवायः रससमवेतरासनप्रत्यक्षे रसनसंयुक्तसमवेतस
मवायः कारणम् शब्दस्य समवायतः तद्वृत्तीनां समवेतसमवायेन प्रत्यक्षः शब्दप्रत्यक्षे च श्रोत्रावच्छिन्नसमवायः शब्द
समवेतश्रावणप्रत्यक्षे श्रोत्रावच्छिन्नसमवेतसमवायः अत्र सर्वत्रैव लौकिकप्रत्यक्षे बोध्यम् वक्ष्यमाणमलौकिकप्र
त्यक्षमिन्द्रियसंयोगादिं विनापि भवति एवमात्मप्रत्यक्षे मनःसंयोगः आत्मसमवेतप्रत्यक्षे मनःसंयुक्तसमवायः आ
त्मसमवेतसमवेतप्रत्यक्षे मनःसंयुक्तसमवेतसमवायः कारणम् विशेषणतया तद्वदभावानां ग्रहो भवेत् अभावप्र
त्यक्षे समवायप्रत्यक्षे चेन्द्रियसंबद्धविशेषणता हेतुः वैशेषिकमते तु समवायो न प्रत्यक्षः यद्यपीन्द्रियसंबद्धविशेष
णता नानाविधा तथा हि भूतलादौ घटाद्यभावः संयुक्तविशेषणतया गृह्यते संख्यादौ रूपाद्यभावः संयुक्तसमवे
तविशेषणतया संख्यात्वादौ रूपत्वाद्यभावः संयुक्तसमवेतसमवेतविशेषणतया शब्दाद्यभावः केवलश्रोत्रावच्छि
न्नविशेषणतया कादौ खत्वाद्यभावः श्रोत्रावच्छिन्नसमवेतविशेषणतया एवं कत्वादौ खत्वाद्यभावः श्रोत्रावच्छिन्नसम

तथा च महत्त्वावच्छिन्नचक्षुःसंयुक्तसमवेतसमवायस्य त्रसरेणौ अभावात् तद्वाह्यचाक्षुषप्रत्यक्षे संयुक्तसमवायस्य सिद्धिः = २ =

परमाणुवृत्तित्वकस्पर्शनिरूपणस्पार्शनस्पार्शनवारणाय महत्त्वावच्छिन्नत्वं परमाणुवृत्तिसंनिकर्षात्स्पार्शनवारणायोद्भूतस्पर्शावच्छिन्नेति = ६ = उद्भूत

सकलप्रत्यक्षाणां सर्वदा दृष्टप्रत्यक्षापत्तिरतः श्रोत्रावच्छिन्नेति = ८ =

वच्छिन्नत्वाभावात्

मानस

मानस

वान्

संबन्धप्रत्यक्षे यावदाश्रयप्रत्यक्षस्य हेतुत्वात् कथमन्यथा घटाकाशसंयोगोऽपि प्रत्यक्षः
न च समवायस्य सर्वाश्रयाः प्रत्यक्षाः परमाण्वादेरयोग्यत्वात् = ४ =

यदि स्याडुपलभ्येत तर्हि एवं यत्र प्रसज्यते प्रत्यक्षं तत्समवायस्य विशेषणतया भवेत् ५

मु॰ व॰ २८

वेतसमवेतनविशेषणतया एवं कपालावच्छिन्नाभावे घटत्वाभावादिर्विशेषणविशेषणतया घटाभावादौ पटाद्यभावः स्वेषु
के विशेषणविशेषणतया एवमन्यदप्यूह्यम् तथापि विशेषणतात्वेनैकैव सा गण्यते अन्यथा षोढा प्रत्यासत्तिरिति विभा
गो व्याहन्येतेति यदि स्यादुपलभ्येतेत्येवं यत्र प्रसज्यते ६१ अन्यथा समवायस्य विशेषणतया भवेत् अभावप्रत्यक्षे
योग्यानुपलब्धिः कारणम् तथाहि भूतलादौ घटादिज्ञाने घटाभावादिकं न ज्ञायते तेनाभावोपलंभे प्रतियोग्युपलंभा
भावः कारणम् तत्र योग्यताप्यपेक्षिता सा च प्रतियोगिसत्त्वप्रसंजनप्रसंजितप्रतियोगिकत्वरूपा तदर्थः तत्प्रतियो स्य॰
गिनो यद्यदेः सत्त्वप्रसञ्जनप्रसंजितउपलंभरूपप्रतियोगिकस्य सउपलंभाऽभावोऽभावप्रत्यक्षे हेतुः तथाहि यत्राऽलोक
संयोगादिकं वर्त्तते तत्र यद्यत्र घटः स्यात्तर्ह्युपलभ्येतेत्यापादयितुं शक्यते तत्र घटाभावादिः प्रत्यक्षो भवति अन्धकारे तु ना॰
पादयितुं शक्यते तेन घटाभावादेरन्धकारे न चाक्षुषप्रत्यक्षम् स्पार्शनप्रत्यक्षं तु भवत्येव आलोकसंबंधं विनापि स्पार्शन
प्रत्यक्षस्यापादयितुं शक्यत्वात् गुरुत्वादिकं तु यद्यपि योग्यं तदभावस्तु न प्रत्यक्षः गुरुत्वादिप्रत्यक्षस्यापादयितुमशक्य
त्वात् वायौ रूपाभावः पाषाणे सौरभाभावः गुडे तिक्ताभावः श्रोत्रे शब्दाभावः आत्मनि सुखाद्यभाव एवमादयस्तत्त
दिन्द्रियैर्गृह्यन्ते तत्तत्प्रत्यक्षस्यापादयितुं शक्यत्वात् संसर्गाभावप्रत्यक्षे प्रतियोगिनो योग्यता अन्योन्याभावप्रत्यक्षे त्वधिकर॰
णयोग्यत्वमपेक्षितमतः स्तंभादौ पिशाचादिभेदो चाक्षुषप्रत्यक्ष एव प्रत्यक्षं लौकिकालौकिकभेदेन द्विविधम् तत्र लौकिक लौकिक॰
प्रत्यक्षे षोढा सन्निकर्षा उक्ताः अलौकिकसन्निकर्षान्निर्दिशति अलौकिकस्तु व्यापारस्त्रिविधः परिकीर्तितः ६२ व्या
पारः सन्निकर्षः अलौकिकस्तु व्यापारस्त्रिविधः परिकीर्तितः ६२ सामान्यलक्षणो ज्ञानलक्षणो योगजस्तथा सामान्यल ॐ
क्षणा यस्येत्यर्थः तत्र लक्षणपदेन यदि स्वरूपमुच्यते तदा सामान्यस्वरूपा प्रत्यासत्तिरित्यर्थो लभ्यते तच्चेन्द्रियसंबद्धविशेष्य २८
कज्ञाने प्रकारीभूतं बोध्यम् तथाहि इन्द्रियसंयुक्तो धूमादिस्तद्विशेष्यकं धूम इति ज्ञानं यत्र जातं तत्र ज्ञाने धूमत्वं प्रकारः स॰

सामान्यलक्षणेति॰

द्धूमत्वेन सन्निकर्षेण धूमान्तरस्येवं रूपं सकलधूमविषयकं ज्ञानं जायते अत्र यदीन्द्रियसंबद्धमेवोच्यते प्रकारीभूतं।
तदा धूलीपटले धूमभ्रमानन्तरं सकलधूमविषयकं ज्ञानं न स्यात् तत्र धूमत्वेन सहेन्द्रियसंबंधाभावात् मन्मते तु इन्द्रि
यसंबद्धं धूलीपटले तद्विशेष्यकं धूम इति ज्ञाने तत्प्रकारीभूतं धूमत्वं प्रत्यासत्तिः इन्द्रियसंबंधस्तु लौकिको ग्राह्यः ।
इदं च बहिरिन्द्रियस्थले मानसस्थले तु ज्ञानप्रकारीभूतसामान्यसन्निकर्षः समानानां भावः सामान्यं तच्च क्वचिन्नि
त्यं धूमत्वादि क्वचिच्चानित्यं घटादि यत्रैको घटः संयोगसंबंधेन भूतले समवायेन कपाले वा ज्ञातस्तदनन्तरं च सर्वेषां
तद्घटवतां भूतलादीनां कपालादीनां वा ज्ञानं भवति तत्रेदं बोध्यम् परं तु सामान्यं येन संबंधेन ज्ञायते तेन संबंधेनाधि
करणानां प्रत्यासत्तिः किं तु तद्घटनाशानन्तरं तद्घटवतः स्मरणं जाते तत्सर्वेषां तद्घटवतां भानं न स्यात् सामान्यस्य त
दानीमभावात् किं चेन्द्रियसंबद्धविशेष्यकं घट इति ज्ञानं यत्र जातं तत्र परदिने इन्द्रियसंबंधं विनापि तादृशज्ञानप्रकारी
भूतसामान्यस्य सत्त्वात् सकलघटविषयकं ज्ञानं कुतो न जायते तस्मात् सामान्यज्ञानं प्रत्यासत्तिर्न तु सामान्यमित्याह आस
त्तिराश्रयाणां तु सामान्यज्ञानमिष्यते ६२ प्रत्यासत्तिरित्यर्थः तथा च सामान्यलक्षणा इत्यत्र लक्षणशब्दस्य विषयपरत्वमर्थः ।
तेन सामान्यविषयकं ज्ञानं प्रत्यासत्तिरिति लभ्यते ननु चक्षुःसंयोगादिकं विनापि सामान्यज्ञानं यत्र वर्तते तत्र घटादीनां
प्रत्यक्षं स्यादत आह तदिन्द्रियजतद्धर्मबोधसामग्र्यपेक्ष्यते अस्यार्थः यदा बहिरिन्द्रियेण सामान्यलक्षणया ज्ञानं जननी
यं तदा यत्किंचिद्धर्मिणि तत्सामान्यस्य तदिन्द्रियजन्यज्ञानसामग्र्यपेक्षिता सा च सामग्री चक्षुःसंयोगालोकादिकम् तेना
न्धकारादौ चक्षुरादिना तादृशज्ञानं न जन्यते ननु ज्ञानलक्षणाप्रत्यासत्तिर्ज्ञानरूपा सामान्यलक्षणापि ज्ञानरूपा तद
नयोर्भेदो न स्यादत आह विषयी यस्य तस्यैव व्यापारो ज्ञानलक्षणः ६३ सामान्यज्ञानलक्षणाप्रत्यासत्तिर्हि तदाश्रयस्य ज्ञा
नं जनयति ज्ञानलक्षणाप्रत्यासत्तिस्तु यद्विषयकं ज्ञानं तस्यैव प्रत्यासत्तिरिति अस्यायमर्थः प्रत्यक्षे सन्निकर्षं विना भा।

कथं स्यादिति चन्दनखण्डस्य चाक्षुषे जायमाने उपस्थितसौरभभानं न स्यात् सौ
रभांशे चक्षुःसन्निकर्षाभावात् सौरभत्वप्रकारकलौकिकप्रत्यक्षसामग्र्याः
सहकारिण्या विरहेण सौरभस्य भानं न संभवतीति भावः = २ =

यद्यपीति सुरभिचन्दनमित्यादौ सौरभादेर्भानं सामान्यलक्षणयैव संभवति सौरभत्वप्रकारकलौकिकप्रत्यक्ष
सौरभत्वावच्छिन्नप्रकारकप्रत्यक्षान्यतरसामग्रीसहकारेणैव सामान्यलक्षणायाः फलजनकत्वाङ्गीकारात् प्र
कृते च द्वितीयसामग्र्याः सहकारिण्याः सत्त्वेऽपि सत्त्वात् इत्यभिप्रायेणाह यद्यपीति = ६ =

ननु धूमत्वज्ञानरूपसामान्यलक्षणायाः स्वविषयधूमत्वा
श्रयत्वसंबंधेन धूलीपटले ऽभावेन सामान्यलक्षणया ऽनुव्य
वसाये धूलीपटलभानाऽसंभवात् = १ =

सामान्यलक्षणाकिं

मु. वृ.
२५

15

एवं धूमत्वेन धूलीपटले यद्ज्ञानं तेन यद्धूलीपटलस्या ऽनुव्यवसाये भानं ज्ञानलक्षणयैव ८

तत्संभवति तथा च धूमत्वेन सकलधूमानां वह्नित्वेन सकलवह्नीनां च भानं कथं भवेत् तदर्थं सामान्यलक्षणा स्वीक्रिय
ते न च सकलवह्निधूमभानाभावे का क्षतिरिति वाच्यम् प्रत्यक्षधूमे वह्निसंबंधस्य गृहीतत्वादन्यधूमस्यानुपस्थितत्वाद्
धूमो वह्निव्याप्यो न वेति संशयानुपपत्तेः मन्मते तु सामान्यलक्षणया सकलधूमोपस्थितौ कालान्तरीयदेशान्तरीयधूमे व
ह्निव्याप्यत्वसंदेहः संभवति न च सामान्यलक्षणास्वीकारे प्रमेयत्वेन सकलप्रमेयज्ञाने जाते सार्वज्ञ्यापत्तिरिति वाच्यम् प्रमे
यत्वेन सकलप्रमेयज्ञानेऽपि विशिष्य सकलपदार्थानामज्ञातत्वेन सार्वज्ञ्याभावात् एवं ज्ञानलक्षणायाश्च स्वीकारे सुर
भिचन्दनमिति ज्ञाने सौरभस्य भानं कथं स्यात् यद्यपि सामान्यलक्षणयापि सौरभस्य भानं संभवति तथापि सौरभत्व
स्य भानं ज्ञानलक्षणया ॥ योगजो द्विविधः प्रोक्तो युक्तयुञ्जानभेदतः युक्तस्य सर्वदा भानं चिन्तासहकृतोऽपरः ६५ योगि
नो द्विविधाः युक्ता युञ्जानाश्च यतो योगजधर्मस्यापि द्वैविध्यम् युक्तस्य तावद्योगजधर्मसहायेन मनसा आकाशपरमा
ण्वादिनिखिलपदार्थगोचरं ज्ञानं सर्वदा भवितुमर्हति द्वितीयस्य चिन्ताविशेषोऽपि सहकारीति ॥ इति प्रत्यक्षम् ॥ ॥
अनुमितिं व्युत्पादयति व्यापारस्तु परामर्शः करणं व्याप्तिधीर्भवेत् अनुमायां ज्ञायमानमनुमितौ व्याप्तिज्ञानं करणं
परामर्शो व्यापारः तथा हि येन पुरुषेण महानसादौ धूमे वह्नेर्व्याप्तिर्गृहीता पश्चाच्च स एव पुरुषः क्वचित्पर्वतादौ अनव
च्छिन्नधूमरेखां पश्यति तदनन्तरं धूमो वह्निव्याप्य इत्येवंरूपं व्याप्तिस्मरणं तस्य भवति पश्चाच्च वह्निव्याप्यधूमवान
यं पर्वत इति ज्ञानं भवति स एव परामर्श इत्युच्यते तदनन्तरं पर्वतो वह्निमानिति ज्ञानं जायते तदेवानुमितिः प्राचीना
वदन्ति व्याप्यत्वेन ज्ञायमानं धूमादिकं लिङ्गमनुमितिकरणं तद्दूषयति ज्ञायमानं लिङ्गं तु करणं न हि ६७ लिङ्गस्यानु
मितिकरणत्वे युक्तिमाह अनागतादिलिङ्गेन न स्यादनुमितिस्तदा यद्यनुमितौ लिङ्गं करणं स्यात्तदा अनागतेन विनष्टे
न वा लिङ्गेनानुमितिर्न स्यात् अनुमितिकरणस्य लिङ्गस्य तदानीमभावादिति व्याप्यस्य पक्षवृत्तित्वधीः परामर्श उच्यते ६८

ज्ञानलक्षणयैवेति तदानीं सौ
रभत्वांशे धर्मान्तरस्याऽप्रहीतत
या सामान्यलक्षणया तज्ज्ञानाऽसं
भवात् = २ =

ध्याना द्यभावेऽपि

मूलं

स्मरणात्मकव्याप्तिज्ञानस्य प
र्वे सत्त्वान्न व्यभिचारः = ४ =

लिङ्गमनुमितिकरणमिति यत्तु
विशेषपरामर्शमात्रेण हेतुरपि तल्लि
ङ्गपरामर्शः तथा च विशिष्टका
रणतावच्छेदकविशेषणतापिकार
णताया ह्रासः तस्य मास्तु लिङ्गस्य
लिङ्गपरामर्शस्य वा हेतुत्वे सर्वत्र वि
निगमनाविरहादुभयोर्हेतुतासि
द्धिस्तत्र च व्यापारभावानुपपत्ति
र्नोस्य कारणता किन्तु लिङ्गस्यैवे
त्याशयः = २ =

चा.

योगाभ्यासजनितो
धर्मविशेषः श्रुतिपु
राणादिप्रतिपादितस्त
दिः युक्तयुञ्जानरूपयोगि
द्वैविध्यात् द्वैविध्यं
विमर्शः इति पाठान्तरम् =

करणे निर्दिष्टे एव व्यापारे
जिज्ञासोदयादुल्लेखश्च नि
र्दिष्टप्रमितिकरणं प्रदर्शय
यति व्याप्तिज्ञानमिति नत्र
व्यापारत्वं तज्जन्यत्वे सति तज्ज
न्यजनकत्वं तच्च परामर्शे संभ
वति वह्निव्याप्यधूमवानयं प
र्वत इति परामर्शस्य व्याप्तिज्ञानजन्य
त्वात् आह च महानसीयवह्नि
धूमव्याप्तिज्ञानस्य तदर्शनमात्र
त्वेन व्यभिचारात्तन्नष्टत्वपार
वति तथा दीक्षादिना = ७ =

मुं
२५

न च परामर्शरूपव्यापारसंबंधेन तदानीं लिङ्गमस्त्येवेति वाच्यम् अतीतादिलिङ्गस्य परामर्शजनकतया परामर्शस्य तद्व्यापार
त्वेऽपि तत्र तत्सम्बन्धस्य लिङ्गस्य हेतुत्वे तेन व्यापारेणापि तस्यानुमितिप्रसङ्गः तत्स्वरूपीयत्वनिवेशे गौरवमस्यान्ते
सामानाधिकरण्यप्रत्यासत्त्या हेतुहेतुमद्भावे नैतादृशदोषाभावात् तत्स्वरूपीयत्वनिवेशे तिलादेव मित्यपि बोध्यम् = १० =

अयमालोकोधूमोचेतिसन्देहस्थलेयावाप्यता वच्छेदकप्रकारकनिर्णयाभावेपीत्यर्थः = ६ =

पक्षविशेष्यकत्वमेवसर्वत्रानुमितौनियतमिति नवीनमतमाह द्विविधादपीति पक्षविशेष्यकव्याप्य विशेषणकोभयपरामर्शादपीत्यर्थः वस्तुतस्तूभयानुरोधात्पक्षविशेष्यकपरामर्शस्यैव हेतुत्वम् अ न एव वह्निव्याप्यधूमवान्व्याप्य इत्याकारकपक्षविशेष्यकपरोक्षो न घटः सर्वसंमत इति ध्येयम् = २ =

= ६ = तत्रव्याप्यतावच्छेदकप्रकारकंज्ञानंकल्प्यमतोलाघवाच्चेति व्याप्यतावच्छेदकप्रकारकत्वापेक्षयाव्याप्तिप्रकारकत्वस्यलघुत्वात् = ६ =

व्याप्तिविशिष्टस्य पक्षेण सह वैशिष्ट्यावगाहिज्ञानमनुमितेर्जनकं तत्र व्याप्यः पक्ष इति ज्ञानम् पक्षो व्याप्यवानिति ज्ञानं वा अनुमितिस्तत्र पक्षे व्याप्य इति ज्ञानात् पक्षे साध्यमित्याकारिका पक्षो व्याप्यवानिति ज्ञानात् पक्षः साध्यवानिति द्विविधादपि परामर्शात्पक्षः साध्यवानित्येवानुमितिरित्यन्ये न तु वह्निव्याप्यधूमवान्पर्वत इति ज्ञानं विनापि यत्र धूमवानिति ज्ञानं ततो धूमो वह्निव्याप्य इति स्मरणं तत्र ज्ञानद्वयादेवानुमितेर्दर्शनाद्व्याप्तिविशिष्टवैशिष्ट्यावगाहिज्ञानं सर्वत्र न कारणं किं तु व्याप्यतावच्छेदकप्रकारकपक्षधर्मताज्ञानत्वेन कारणत्वमास्तु एवं च क्लृप्तत्वान्न विशिष्टज्ञानकल्पना गौरवाच्चेति चेन्न व्याप्यतावच्छेदकाज्ञानेपि वह्निव्याप्यवानिति ज्ञानादनुमित्युत्पत्तेर्लाघवाच्च व्याप्तिप्रकारकपक्षधर्मताज्ञानत्वेनैव हेतुत्वम् किं च धूमवान्पर्वत इति ज्ञानादनुमित्यापत्तिः व्याप्यतावच्छेदकीभूतधूमत्वप्रकारकस्य पक्षधर्मताज्ञानस्य सत्त्वात् न च गृह्यमाणव्याप्यतावच्छेदकप्रकारकपक्षधर्मताज्ञानस्य हेतुत्वं वाच्यम् चैत्रस्य व्याप्तिग्रहे मैत्रस्य पक्षधर्मताज्ञानादनुमित्यापत्तेः यदि तु तत्पुरुषीयगृह्यमाणव्याप्यतावच्छेदकप्रकारकतत्पुरुषीयपक्षधर्मताज्ञानं तत्पुरुषीयानुमितौ हेतुरित्युच्यते तदानन्तकार्यकारणभावः मन्मते तु समवायसंबन्धेन व्याप्तिप्रकारकपक्षधर्मताज्ञानं समवायसंबन्धेनानुमितिं जनयतीत्यर्थे नानन्तकार्यकारणभावः यदि तु व्याप्तिप्रकारकज्ञानं पक्षधर्मताज्ञानं च स्वतन्त्रं कारणमित्युच्यते तदा कार्यकारणभावद्वयं वह्निव्याप्यो धूम आलोकवान्पर्वत इति ज्ञानादप्यनुमितिः स्यादिति इत्थं च ज्ञानद्वयं तु व्याप्तिविशिष्टज्ञानं कल्प्यते फलमुखगौरवस्यादोषत्वादिति व्याप्यो नाम व्याप्त्याश्रयः तत्र व्याप्तिः केत्यत आह व्याप्तिः साध्यवदन्यस्मिन्नसंबन्ध उदाहृता वह्निमान्धूमादित्यादौ साध्यो वह्निः साध्यवान्महानसादिः तदन्यो जलह्रदादिः तद्वृत्तित्वं धूमस्येति लक्षणसमन्वयः धूमवान्वह्नेरित्यादौ साध्यवदन्यस्मिन्नयःपिण्डादौ वह्नेः सत्त्वान्नातिव्याप्तिः येन संबन्धेन साध्यं तेनैव संबन्धेन साध्यवान्बोध्यः अन्यथा समवा

(Left margin:) नवलत्तु तदा व्याप्यतावच्छेदकप्रकारकत्वमपि सिद्धं कल्पनालाघवं मे मीमांसकानामतः किं चेति = ७ =

(Left margin:) चैत्रस्य गृह्यमाणव्याप्यतावच्छेदकप्रकारकपक्षधर्मताज्ञानस्य मैत्रस्य स्यात्

(Left margin:) तत्पुरुषीयस्य लिखितविशिष्टज्ञानकस्य नागेश वंश्या यमते हेतुत्वमतआह इत्यं चेति = ४ =

(Right margin:) व्याप्यतावच्छेदकप्रकारकपक्षधर्मताज्ञानत्वेन लाभघुमतसिद्धं तत्र सर्वत्र व्याप्यतावच्छेदकताकलापित्यर्थः नतु ज्ञानद्वयेपि विशिष्टज्ञानं कल्पनीयमतो न व्यभिचार इत्यत आह विशिष्टज्ञानमिति = ५

(Right margin:) साध्येति

इत्यत्र यत इति इत्थं चेनतत्पुरुषीयत्वनिवेशः नैव व्याप्तिप्रकारकपक्षधर्मताज्ञानत्वेन पक्षधर्मताविषयकव्याप्तिप्रकारकज्ञानत्वेन वा हेतुत्वेऽव्यभिचारेण हेतुत्वेन च तद्ग्राहकं व्याप्यं तस्मादाह अनुमितिः स्यादिति न्याय नये व्याप्तिप्रकारकतानिरूपितहेतुप्रकारतानिरूपितपक्षविशेष्यताशालिज्ञानत्वेन हेतुत्वात् तादृशज्ञानाभावात् धूमो वह्निव्याप्यो धूमवान्पर्वत इति ज्ञानादनुमित्यापत्तिः व्याप्तिप्रकारतानिरूपितधूमविशेष्यतायाः पर्वतविशेष्यतानिरूपितप्रकारतात्मकत्वादिति भावः ५

अथ: पित्तादृत्तित्वं वह्नेस्तद्वृत्तित्वता वह्नित्वाभावो नास्ति ॥ ५

तत्र च विशिष्टाधिकरणतानि ... तद्धेतुतावच्छेदक ... साध्यतावच्छेदकत्वेन तदवच्छेदकत्वं व्याप्तिरिति भावः = २ =

... साध्यवदन्य ... = १

साध्यवदन्यवृत्तित्वेति साध्यतावच्छेदकावच्छिन्नसाध्यवदन्यवृत्तित्वार्थः ... साध्यतावच्छेदक ...

पु० व०
१९ 16

यत्संबंधेन वह्निमान् वह्नेरवयवस्तस्यो महानसादित्वे धूमस्य विद्यमानत्वादव्याप्तिप्रसंगात् साध्यवदन्यवृत्तिसाध्य
वत्तावच्छिन्नप्रतियोगिताकभेदो वाच्यः तेन यत्किंचिद्वह्निमतो महानसादेर्भिन्नेपि धूमस्य सत्वेपि न क्षतिः येन सं
बंधेन हेतुता तेनैव साध्यवदन्यावृत्तित्वं बोध्यं तेन साध्यवदन्यस्मिन् धूमावयवे धूमस्य समवायसंबंधेन सत्वेपि न क्ष
तिः साध्यवदन्यावृत्तित्वं च साध्यवदन्यवृत्तित्वाभावः तेन धूमवान् वह्नेरित्यत्र साध्यवदन्यह्रदादिवृत्तित्वाभा
वेपि नातिव्याप्तिः अत्र यद्यपि द्रव्यं गुणकर्मान्यत्वविशिष्टसत्वादित्यादौ विशिष्टसत्तायाः सत्तायाश्चैक्यात्साध्यवदन्य
स्मिन् गुणादाववृत्तित्वं नास्तीत्यव्याप्तिः हेतुतावच्छेदकरूपेणावृत्तित्वं बोध्यम् प्रकृते च विशिष्टसत्तात्वरूपहेतुतावच्छेद
कत्वान्नाव्याप्तिः हेतुतावच्छेदकं च स्वमनवच्छेदकमिति फलितोर्थः नन्वेवं केवलान्वयिनि ज्ञेयत्वादौ साध्ये साध्यवदन्यस्याप्र
प्रसिद्धत्वादव्याप्तिः किंच सत्तावान् जातेरित्यादौ साध्यवदन्यस्मिंश्च सामान्यादौ हेतुतावच्छेदकसंबंधेन समवायेन हेतोरप्रसि
द्धत्वादव्याप्तिरत आह अथवेति हेतुमन्निष्ठविरहाप्रतियोगिना साध्येन हेतोरैकाधिकरण्यं व्याप्तिरित्यर्थः हेतुमति निष्ठा
वृत्तिर्यस्य सः तथाविधो विरहोऽभावः तथा च हेत्वधिकरणवृत्तिर्योऽभावस्तदप्रतियोगिना साध्येन सह हेतोः सामानाधिकरण्यं ।
व्याप्तिः अत्र यद्यपि वह्निमान् धूमादित्यादौ हेत्वधिकरणपर्वतादौ घटाभावप्रतियोगित्वं न वह्न्यादेरस्तीत्यव्याप्तिः न च सा
मानाधिकरण्यं वह्निधूमयोरेव व्याप्तिरिति वाच्यम् तद्धर्मरूपेणोभयाभावसत्वादेकसत्वेपि द्वयं नास्तीति प्रतीतेर्गुणवान् द्र
व्यत्वादित्यादावव्याप्तेश्च तथापि साध्यतावच्छेदकप्रतियोगितानवच्छेदकं यत् साध्यतावच्छेदकमिति सिद्धम्" ननु तथा
पि रूपत्वव्याप्यजातिमान् पृथिवीत्वादित्यत्र साध्यतावच्छेदिका रूपत्वव्याप्यजातयः तासां च शुक्लत्वादिरूपजातीनां नी
लघटादौ तदभावप्रतियोगितावच्छेदकत्वमस्तीत्यव्याप्तिरिति चेन्न तत्र परंपरया रूपत्वव्याप्यजातित्वस्यैव साध्यताव
च्छेदकत्वात् नहि तादृशधर्मावच्छिन्नाभावः क्वापि पृथिव्यामस्ति रूपत्वव्याप्यजातिमात्रस्य सत्वात् तथा च रूपत्व
प्रतियोगितानवच्छेदकं यत् साध्यसामानाधिकरण्यमिति वाच्यम् "तथा च हेतुमन्निष्ठाभावप्रतियोगितानवच्छेदक ४८ :

परंपरया रूपत्वव्याप्यजातित्वं वह्निस्थ = १

इति वाच्यमिति ... सामानाधिकरण्यं ... प्रतियोगितानवच्छेदक ... = १

साध्य समवायेन = २ ... इति शेषः = १

हाप्ता० दौसाध्ये ॥ २

हेतुसमानाधिकरणात्यन्ताभावप्रतियोगितावच्छेदकतावच्छेदकसाध्यतावच्छेदकतावच्छेदकताकत्व वह्नित्वसाध्यसामानाधिकरण्यं व्याप्तिरिति विकार ॥ तत्तावच्छेदकगोरवाद्वक्ष्यमः ॥ २ ॥

मतान्तरमाह साधनव्याप्तिज्ञान साकारणताभेदात् ॥ २ ॥

तद्व्याप्यजातेरभावप्रतियोगितावच्छेदकत्वेपि जातित्वस्य प्रतियोगितावच्छेदकत्वाभावान्नाव्याप्तिः एवं द्रव्यत्वमान् संयोगादित्यादावपि संयोगस्य जात्यत्वमेव साध्यतावच्छेदकमिति नाव्याप्तिः साध्यादिभेदेन व्याप्तिभेदान्नाह यत्र स्थले साध्यतावच्छेदकतावच्छेदकं प्रतियोगितावच्छेदकतावच्छेदकमित्येवं लक्षणघटकमित्यपि वदन्ति हेत्वधिकरणं च हेतुतावच्छेदकविशिष्टाधिकरणं बोध्यम् तेन द्रव्यत्वगुणकर्मान्यत्वविशिष्टसत्तादिमान् जात्यादिसत्ताधिकरणगुणादिनिष्ठाभावप्रतियोगित्वेपि द्रव्यत्वस्य नाव्याप्तिः हेतुतावच्छेदकसंबंधेन हेत्वधिकरणं बोध्यम् तेन समवायेन धूमाधिकरणतदवयवनिष्ठाभावप्रतियोगित्वेपि वह्नेर्नाव्याप्तिः अभावस्य प्रतियोगिव्यधिकरणो बोध्यः तेन कपिसंयोगी एतद्वृक्षत्वादित्यत्र मूलावच्छेदेन तद्वृक्षे कपिसंयोगाभावप्रतियोगित्वेपि कपिसंयोगस्य नाव्याप्तिः न च प्रतियोगिव्यधिकरणत्वम् यदि प्रतियोग्यनधिकरणहत्तित्वं तदा तत्रैवाव्याप्तिः प्रतियोगिनः कपिसंयोगस्यानधिकरणे गुणादौ वर्तते यो भावस्तस्यैव वृक्षे मूलावच्छेदेन सत्त्वात् यदि प्रतियोग्यधिकरणाहत्तित्वं तदा संयोगी सत्त्वादित्यादावतिव्याप्तिः सत्ताधिकरणगुणादौ यः संयोगाभावस्तस्य प्रतियोग्यधिकरणद्रव्याहत्तित्वादिति वाच्यम् हेत्वधिकरणे प्रतियोग्यनधिकरणवृत्तित्वविशिष्टस्य विवक्षितत्वात् स्वप्रतियोग्यनधिकरणीभूतहेत्वधिकरणवृत्त्यभाव इति निष्कर्षः प्रतियोग्यनधिकरणं प्रतियोगितावच्छेदकावच्छिन्नानधिकरणं बोध्यम् तेन विशिष्टसत्ताबान् जातेरित्यादौ जात्यधिकरणगुणादौ विशिष्टसत्ताभावप्रतियोगिसत्ताधिकरणत्वेपि न क्षतिः एवं च वह्निमान् धूमादित्यादौ धूमाधिकरणे समवायेन वह्निविरहेपि न क्षतिः ननु प्रतियोगितावच्छेदकावच्छिन्नस्य यस्य कस्यचिदनधिकरणत्वम् तत्सामान्यस्य वा यत्किंचित्प्रतियोगितावच्छेदकावच्छिन्नानधिकरणत्वं वा विवक्षितम् आद्ये कपिसंयोगी एतद्वृक्षत्वादित्यत्राव्याप्तिः कपिसंयोगाभावस्य प्रतियोगितावच्छेदकावच्छिन्नो घटादौ वर्तमानस्तदनधिकरणं च वृक्षस्तत्र विद्यमानस्य प्रतियोगिव्यधिकरणाभावप्रसिद्धिः सर्वस्यैवाभावस्य वृक्षे

अत्र च साध्यतावच्छेदकसंबंधेन प्रतियोग्यनधिकरणत्वं बोध्यम् तेन ज्ञानवान् सत्त्वादित्यादौ सत्ताधिकरणघटादेर्विषयतासंबंधेन ज्ञानाधिकरणत्वेपि न क्षतिः ॥ ४ ॥

नन्वाच विषयतासंबंधेन ज्ञानाभावोऽनतिप्रसिद्धः कथं ज्ञानाभावो न गृह्यते किं तु घटाभावः

दण्डी

हेतुतावच्छेदकसंबंधेन स्वाश्रयसंयोगेन

वाच्य

प्रतियोग्यधिकरणाहत्तित्वम् ॥ ४ ॥

संयोगी सत्त्वादित्यत्र संयोगाभावस्य

वह्निमान् धूमादित्यत्र प्रतियोगितावच्छेदकावच्छिन्नानधिकरणत्वं व्याप्तिः ॥ ५ ॥

तत्सामान्यस्य प्रतियोगितावच्छेदकावच्छिन्नसामान्यस्य यत्किंचित्प्रतियोगितावच्छेदकावच्छिन्नसामान्यस्य चेत्यर्थः ॥ ३ ॥

स्वव्याप्यजातिम् जातिरित्यत्र ॥ २ ॥

अधिकरणभेदेन भावाभेदात् ॥ ८ ॥

सर्वत्रैव तत्तदभावस्य प्रतियोगितावच्छेदकावच्छिन्नत्वेन संभवादिति भावः ॥

॥ॐ॥ 17 शु॰ चं॰

त्वविशिष्टसाध्याभावात्मकप्रतियोगिसमानाधिकरणत्वात् नचवह्निमान्धूमादित्यादौ हृदाभावादेः साध्याभावात्मकप्रतियोगिसिद्धिम्हरणत्वं यद्यपि पर्वतादेः

त्वयापि साध्यतावच्छेदकसंबंधेनत्वप्रतियोगिव्यधिकरणत्वमस्त्येवेति प्रतियोगिव्यधिकरणाभावाप्रसिद्धिरितिवाच्यम् हृदाभावेवर्तते यो वह्न्यभावस्तद्रूपा

भावात्मकतया हृदाभावस्य वह्निरूपप्रतियोगितदधिकरणत्वं पर्वतादौ निर्वह्मणः प्रतियोगिव्यधिकरणत्व स्याप्रसिद्धत्वात् यदिवा हृदाभावादौ वह्न्यभावादिभिन्नत्वस्य

त्वेन तथापि धूमाभाववान्वह्न्यभावादित्यादौ व्याप्तिः साध्याभावच्छेदकसंबंधः स्वरूपसंबंधस्तेन सर्वेषामभावस्य सर्वेषामभावत्वविशिष्टस्याभाववत्त्व धूमाभावाधिकरण

कप्रति॰ नियोग्यधिकरणत्वात् हेत्वधिकरणत्वेपीति इत्यादौ तत्कपिसंयोगाभाववानात्मत्वादित्यादौ व्याप्तिः नचात्महेति कपिसंयो

गाभावाभावः कपिसंयोगस्तस्य गुणत्वात् तत्प्रतियोगितावच्छेदकं गुणत्वमात्राभावत्वमपि तद्वच्छिन्नानधिकरणत्वं तद्धे

त्वधिकरणत्वसामानाधिकरण्येन यहि प्रतियोगितावच्छेदकावच्छिन्नानधिकरणत्वं हेत्वमत्त्वाहेतुप्रतियोगितानाश्रय

त्वमपिविवक्षितत्वात् नच कालोदरवाच्यकालपरिमाणादित्यत्र प्रतियोगिव्यधिकरणाभावाप्रसिद्धिः हेत्वधिकरणस्य म

हाकालस्य जगदाधारतया सर्वेषामेवाभावानां साध्यतावच्छेदकसंबन्धेन कालिकविशेषणतया प्रतियोग्यधिकरणत्वात्

तत्र केचित् महाकालभेदविशिष्टघटाभावस्तत्प्रतियोगिव्यधिकरणो महाकालस्य घटाधारत्वेपि महाकालभेदविशिष्ट

घटानाधारत्वात् महाकाले महाकालभेदाभावात् वस्तुतस्तत्प्रतियोगितावच्छेदकसंबंधेन प्रतियोगव्यधिकरणीभूतहेत्व

धिकरणस्याभावप्रतियोगितासामान्ये यत्संबंधावच्छिन्नत्वोभयाभावसत्त्वेन संबन्धेन तद्धर्मावच्छिन्नस्य तद्धेतुव्यापकत्वं बोध्यम्

व्यापकसामानाधिकरण्यं व्याप्तिः इत्थं च कालोदरवाच्यकालपरिमाणादित्यादौ संयोगसंबंधेन घटाभावप्रतियोगितावच्छेद

नधिकरणे हेत्वधिकरणे महाकाले वर्तमान एव संयोगेन घटाभावस्तत्प्रतियोगितायां कालिकसंबंधावच्छिन्नत्वघटत्वाव

च्छिन्नत्वोभयाभावसत्त्वान्नाव्याप्तिः न तु प्रमेयवह्निमान्धूमादित्यादौ प्रमेयवह्नित्वावच्छिन्नस्याप्रसिद्धेः गुरुधर्मस्यानवच्छेदक

त्वादितिचेन्न कम्बुग्रीवादिमान्नास्तीति प्रतीत्या कम्बुग्रीवादिमत्त्वावच्छिन्नप्रतियोगिताकत्वविषयीकरणेन गुरुधर्मस्याप्यवच्छे

दकत्वस्वीकारात् लघुधर्मसमनियतगुरुधर्मस्यानवच्छेदकत्वात् घटादिहेतुसमानाधिकरणस्योभयाभावप्रतियोगितानव

च्छेदकसाध्यतावच्छिन्नहेतुत्वं व्याप्तिः यत्नोभयाभावस्याप्रसिद्धत्वाभावात् तत्प्रतियोगिवैयधिकरण्यं न निवेश्यते॥ तेन

लाघवमप्यत्र वं वेदितव्यमिति संक्षेपः पक्षसत्त्वमित्यत्र पक्षत्वं किं तदाह सिसाधयिषया सिद्धिर्यत्र न तिष्ठति सप

क्षस्तत्र हेतुरित्वनुमानादत्र मितिर्भवेत् ७॰ सिसाधयिषाविरहविशिष्टायाः सिद्धेरभावः पक्षता तदाच्यतत्र तदर्थः सिसाधयि

मभावीयकालिकविशेषणतावटकसामानाधिकरण्यसंबंधेनमहाकालभेदविशिष्टघटाभावादित्यर्थः सामानाधिकरण्यघटकीभूतविशेषणविशेषसंबंधाभ्यां यदि कं बु ग्रीवादिमान्नास्तीत्यादेः कंबुग्रीवादिमत्त्वप्रतियोगिकाभावएव विषयो

यत्रविशेषणविशेष्योभयवत्त्वं तत्रैव विशिष्टाधिकरणस्योपगमादितिभावः ॥११॥ [illegible] संक्षेपइति ॥२॥

वत्र कंबुग्रीवादिमत्त्वेन प्रतियोगितावच्छेदकत्वमपि [illegible] प्रतियोगिता [illegible]

[illegible] साध्यतावच्छेदकसंबंध [illegible] साध्यतावच्छेदकं तत्र [illegible] व्याप्तिः [illegible]

= सत्त्वं विशेषणविशेष्योभयाभावप्रयुक्तस्य सत्त्वं विशेष्याभावमात्रप्रयुक्तस्योक्तविशिष्टाभावस्य सत्त्वादिति भावः =३ सत्त्वं विशेषणाभावप्रयुक्तस्य सत्त्वात्तथ्याभावप्रयुक्तस्य
विशिष्टाभावस्यासत्त्वात् =२ सिद्धेः सत्वेन तदभावरूपपक्षताया अभावात् =४ सिसाधयिषाविरहवैशिष्ट्यं च सिद्धौ एककालावच्छेदेनैकात्म्यवृत्तित्वं तेन सिसाधयिषाकालीनसिद्धेः का-
लिकसंबंधेन सिसाधयिषाविरहविशिष्टत्वेपि न क्षतिः परामर्शरूपकारणसत्त्वे सिद्धिरूपविरोधिसत्त्वेपि यत्रानुमितिः स्यात्तत्रोत्तेजकत्वं वाच्यं

विनापिसंदेह

विषयतासंबंधेन अनुमितेः सिसाधयिषावलात् सिसाधयिषायाः

षामावेनपक्षताविनापिसिसाधयिषांविनगर्जितेनमेघानुमानात् अत एव साध्यसंदेहोपिनपक्षतांऽविनगर्जितेनतदनु
मानात् सिद्धौसत्यामपिसिसाधयिषासत्वेनुमितिर्भवत्येव अतः सिसाधयिषाविरहविशिष्टत्वं सिद्धौविशेषणम्
तथाच यत्रसिद्धिर्नास्तितत्रसिसाधयिषायांसत्यामसत्यामपिपक्षता यत्रसिसाधयिषास्तितत्रसिद्धौसत्यामसत्याम
पिपक्षता यत्रतुसिद्धिरस्तिसिसाधयिषानास्तितत्रपक्षता सिसाधयिषाविरहविशिष्टसिद्धेः सत्वात् नेत्र यत्रप-
रामर्शानंतरंसिद्धिस्ततः सिसाधयिषा तत्रसिसाधयिषाकालेपरामर्शनाशादनुमितिः यत्रसिद्धिपरामर्शसिसाधयिषाः
क्रमेणभवंति तत्रसिसाधयिषाकालेसिद्धेर्नाशात्प्रतिबंधकाभावादेवानुमितिः यत्रसिसाधयिषासिद्धिपरामर्शा-
स्तत्रपरामर्शकालेसिसाधयिषैवनास्ति एवमन्यत्रापिसिद्धिकालेपरामर्शकालेचनसिसाधयिषायोग्यविभुविशे-
षगुणानांयोगपद्यनिषेधात् नन्वेवंसिसाधयिषाविरहविशिष्टत्वंसिद्धेर्विशेषणमितिचेन्न यत्रवह्निव्याप्यधूमवान्
पर्वतोवह्निमानितिप्रत्यक्षंस्मरणंवाततःसिसाधयिषातत्रपक्षतासंपत्तयेतद्विशेषणस्यावश्यकत्वादिति अत एवंबोध्य
म् यादृशयादृशसिसाधयिषासत्वेसिद्धिसत्वेपिलिंगकानुमितिस्तादृशतादृशसिसाधयिषाविरहविशिष्टसि-
द्ध्यभाववत्त्वंलिंगकानुमितौपक्षता तेनसिद्धिपरामर्शसत्वेयत्किंचिज्ज्ञानंजायतामितीच्छायामपिनानुमितिर्वह्नि
व्याप्यधूमवान्पर्वतोवह्निमानितिप्रत्यक्षसत्वेप्रत्यक्षातिरिक्तंज्ञानंजायतामितीच्छायांतुभवत्येव एवंचपराम
र्शसत्वेआलोकेनवह्निमनुमिनुयामीतीच्छायामपिनानुमितिः सिसाधयिषाविरहकालेयादृशसिद्धिसत्वेनानु
मितिस्तादृशसिद्धिर्विशिष्यैवतत्तदनुमितौप्रतिबंधिकावक्तव्या तेनपर्वतस्तेजस्वीपाषाणमयोवह्निमानितिज्ञा-
नसत्वेप्यनुमितेर्नविरोधः परंतुपक्षतावच्छेदकसामानाधिकरण्येनसाध्यसिद्धावपितदवच्छेदेनानुमितिदर्शना
त्पक्षतावच्छेदकावच्छेदेनानुमितिंप्रतिपक्षतावच्छेदकावच्छेदेनसिद्धिरेव [illegible] प्रतिबंधिकापक्षतावच्छेदकसामा

तत्तत्सामानाधिकरण्येन सिद्धिः

परामर्शसिसाधयि
षासिद्धयः क्रमेण एवं
सिद्धिसिसाधयिषापरामर्शाः ए
वं सिसाधयिषापरामर्शसिद्धयः =

तेन तत्र इच्छाया उत्तेजकत्वे
पक्षतेतरकालीने
यत्किंचिज्ज्ञाने =

प्रत्यक्षसामग्र्याः
सत्वेस्यापियोग्यं

नाशात्

सिसाधयिषाकालीनसिद्धि
परामर्शाः

अनुमितिः
तल्लिंगकत्वप्रवेशस्य
फलमाह =

मानयदानुपाद ने प्रकृतेऽदकारकेऽ देनाऽनुमितेरपि सामानाधिकरण्याद्व्याहितया तत्र प्रवृत्तेऽप्रतीतेः = पक्षविशेषणकसाध्यप्रकारक निश्चयत्वेन = ५

सु.व.
१८ 18

नाधिकरणेनानुमितिप्रतिबन्धित्वमिद्धिमात्रं विरोधि इदं तु बोध्यम् यत्रायं पुरुषो न वेति संशयानन्तरं पुरु-
षत्वव्याप्यकरादिमानिति ज्ञानं तत्रासत्यामनुमित्सायां पुरुषत्वस्य प्रत्यक्षं भवति न त्वनुमितिः अतो-
नुमित्साविरहविशिष्टसमानविषयकप्रत्यक्षसामग्री कामिनीजिज्ञासादिवत् स्वातन्त्र्येण प्रतिबंधि-
का एवं परामर्शानन्तरं विनाप्रत्यक्षेच्छां प्रत्यक्षादिप्रत्यक्षत्वानुपपत्तेः प्रत्यक्षेच्छाविरहविशिष्टानुमितिसा-
मग्री भिन्नविषयकप्रत्यक्षे प्रतिबन्धिका। प्रसंगाद्धेत्वाभासान्विभजते। अनैकान्तिको विरुद्धश्चाप्यसिद्धः
प्रतिपक्षितः कालात्ययापदिष्टश्च हेत्वाभासश्च पञ्चधा। तेषु लक्षणं तु यद्विषयकत्वेन ज्ञानस्यानुमितिवि-
रोधित्वं तत्त्वम् तथा हि व्यभिचारादिविषयकत्वेन ज्ञानस्यानुमितिविरोधित्वे दोषाः यद्विषयकत्वं च याद-
शविशिष्टविषयकत्वं बोध्यम् तेन बाधभ्रमस्यानुमितिविरोधित्वेऽपि तत्र पर्वतो वह्न्यभाववानिति विशिष्ट-
स्याप्रसिद्धत्वादिति न हेत्वन्तरे दोषः नैव वह्न्यभाववद्व्याप्यपाषाणमयत्ववानिति परामर्शकाले वह्निव्याप्यधूमस्या-
भासत्वेन स्यात् तत्र वह्न्यभाववद्व्याप्यवान् पर्वत इति विशिष्टस्याप्रसिद्धत्वादिति वाच्यम् इष्टापत्तेः अन्यथा बाधव्या-
प्यनिश्चये दोषत्वानापत्तेः तस्मात्तत्र वह्न्यभाववद्व्याप्यपाषाणमयत्ववानिति परामर्शकाले वह्निव्याप्यधूमस्याभा-
सत्वं भ्रमादनुमितिप्रतिबंधमात्रं हेत्वन्तरं तदुद्धरति इत्थं च साध्याभाववद्वृत्तित्वादिर्हेत्वादिके दोषः न हेतौ च हेतो-
र्येन केन संबंधेनेति न व्याः परे तु यद्विषयकत्वेन ज्ञानस्यानुमितिविरोधित्वं तद्वत्त्वं हेत्वाभासत्वं सत्प्रतिप-
क्षविरोधिव्याप्यादिकमेव तथा तद्वत्त्वं च हेतौ स्वरूपसंबंधेन नचैवं पर्वतो वह्निमान् धूमादित्यादौ बाधभ्रमे स-
पक्षे साध्याभावविषयकत्वेनानुमितिविरोधित्वे ज्ञाने स्वरूपसंबंधेन तद्वत्त्वस्याप्रसिद्ध्या तद्धेतावपि बाधितत्वा-
पत्तिरिति वाच्यम् तत्र ज्ञानस्य संबंधत्वाकल्पनात् अत्र सत्प्रतिपक्षितत्वव्यवहारेण तेन कल्पनात् तत्र च व

बाधभ्रमकालीनेष हेतौ   प्रतिपरामर्शकालीने भ्रमादिमद्धेतौ   ज्ञानस्य संबन्धत्व

धितात्ववहाराभावादित्याहुः अनुमितिविरोधित्वं चानुमितितत्कारणज्ञानान्यतरविरोधित्वम् तेन व्यभिचारिणि ज्ञाप्याप्ति-
दोषज्ञाने च यद्धेतुविषयकं तद्धेतुकानुमितौ प्रतिबन्धकत्वे तेकेचे व्यभिचारज्ञाने हेत्वन्तरेणानुमितिसत्त्वेपि तद्भावा-
द्यनवगाहित्वाद्व्यभिचारज्ञानस्यानुमितिविरोधित्वाभावेपि न क्षतिरिति सहेतुः पः पक्षसाध्यपक्षकहेतोर्यावन्तो दो-
षास्तावद्रूपान्यत्वं तत्र हेत्वाभासत्वम् पञ्चैकथनं तु तत्संभवस्थलाभिप्रायेण। आद्यः साधारणस्त्वसाधारणकोऽपरः
१ तथैवानुपसंहारी त्रिधा। एवं साधारणाद्यन्यतमत्वमनैकान्तिकत्वम् साधारणः साध्यवदन्यवृत्तिः तेन च व्याप्तिग्रहप्रति-
बन्धः क्रियते असाधारणः साध्यासमानाधिकरणो हेतुस्तेन साध्यसामानाधिकरण्यग्रहः प्रतिबध्यते अन्ये तु सपक्षाद्
विरसाधारणः सपक्षश्च निश्चितसाध्यवान् इत्यवशाद्धानित्यः शब्दत्वादित्यादौ यदा पक्षे साध्यनिश्चयस्तदा नासाधारण्यं
तत्र हेतुनिश्चयादिरूपविवक्षा अनुपसंहारी चात्यन्ताभावाप्रतियोगिसाध्यकादिः अनेनान्वयव्यतिरेकव्याप्तिज्ञानप्रतिब-
न्धः क्रियते विरुद्धस्तु साध्यव्यापकीभूताभावप्रतियोगी अयं च साध्याभावग्रहसामग्रीत्वेन प्रतिबन्धकः सत्प्रतिपक्षितस्तु प्रति-
हेतुः साध्याभावसाधकः अत्र तु हेतुरेवेति विशेषः साध्याभावसाधकपरहेतुः साध्यसाधकत्वेनोपन्यस्यत इति अत एव विरो-
धोपस्थापकत्वाद्विशेषः सत्प्रतिपक्षः साध्याभावव्याप्यवान् पक्षः अत्र हीनताप्रामाण्यक साध्यव्याप्यवत्तोपस्थितिका-
लीनाग्रहीतप्रामाण्यकं तदभावव्याप्यवत्तोपस्थितिविषयः सत्प्रतिपक्षः अत्र च परस्पराभावव्याप्यवत्ताज्ञानात्परस्परानुमि-
तिप्रतिबन्धः फलम् अत्र केचित् यथा ह्रदाभावव्याप्यवत्ताज्ञाने विद्यमानेपि ह्रदस्य चक्षुःसंयोगसन्निकर्षज्ञानं जायते य-
था वा शङ्खे पीतत्वाभावव्याप्यशङ्खत्ववत्ताज्ञानेपि सति पित्तादिदोषे पीतः शङ्ख इति धीर्जायते एवं कोटिद्वयव्याप्यदर्शनेपि को-
टिद्वयस्फुरणरूपः संशयो भवति तथा सत्प्रतिपक्षस्थले संशयरूपानुमितिर्भवत्येव यत्र चैककोटिव्याप्यदर्शनं तत्राधिक-
बलतया द्वितीयकोटिमानप्रतिबन्धान्न संशयः फलबलेनाधिकबलसम्भवलाभः कल्प्यत इत्याहुः तन्न तदभावव्याप्य-
२ वत्ताज्ञाने सति तदुपनीतभानविशेषशाब्दबोधादेरन्यत्र लौकिकसन्निकर्षाजन्यदोषविशेषाजन्यज्ञानमात्रेण प्रतिब-

वायुर्गन्धवान्स्नेहादित्यत्र सर्वहेत्वाभाससंभवः द्वौ

असाधारणत्वं हेतोः सपक्षव्यावृत्तत्वं निश्चयवत्त्वे निश्चितसाध्यवति पक्षेऽसाधारणादिदूषणाभावे हेत्वाभासत्वानुपपत्तिरित्यर्थः

सत्प्रतिपक्षस्य संशयजनकत्वे दूषकतावीजं नानुमितिप्रतिबन्धकत्वेन तदभावव्याप्यज्ञानस्यानुमितिप्रतिबन्धकत्वे मानाभावादित्यतः कोशकारमतं दूषयितुमुपन्यस्यति २ अनुमितिं प्रति तदभावव्याप्यवत्ताज्ञानस्य प्रतिबन्धकत्वे मानाभावः

शिलं च साध्ये तिलः शाद्भूतत्वादित्यादौ तु साध्यसाध्यप्र ०

केवलान्वयिसाध्यके सत्त्वयव्याप्तिलाभे देवानुमितिरितिभावः

ननु यद्युभयभासकत्वेऽप्यभ्यर्णत्वं तदापि त्वद्दिशेषसत्त्वेपि पीतत्वस्य शङ्खतोभयस्मात्तदुभयोर्भानापत्तिरित्यत आह फलबलेनेति तथाच पीतत्वसात्ताकारस्यैवानुभविकत्वात् शङ्खत्वस्य पित्तरूपदोषस्य प्रतिबन्धकत्वं कल्पयितुं पीतसाक्षात्कारसामग्र्या अधिकबलत्वमेव हेतुत्वदोषसत्त्वपि स्यात् ... सामग्र्योः समबलत्वमेव कल्प्यत इति भावः = २

मु० व०
१९
19

दोषविशेषाजन्ये

न्धकतालाहवात् ननु पुनीतभानविशेषेशान्तःगोधे च एवं कन्ततिबन्धकतागौरवात् तथा च प्रतिबन्धकसत्त्वात्कथमनुमितिः न हि लौकि
कसन्निकर्षस्थले भ्रमत्वमिव संप्रतिपत्तस्थले संशयाकारानुमितिः प्रामाणिकी येनानुमितिभिन्नत्वेनापि विशेषणीयम् यत्र च को
टिद्वयव्याप्यवत्ताज्ञानं तत्रोभयत्राप्रामाण्यज्ञानात्संशयः नान्यथा अगृहीताप्रामाण्यकस्यैव विरोधित्वात्तस्य प्रतिबन्धकत्वादिति
अप्रसिद्धिस्वाश्रयासिद्ध्याद्यन्यतमः आश्रयासिद्धिः पक्षे पक्षतावच्छेदकस्याभावः यत्र काञ्चनमयः पर्वतो वह्निमानिति साध्यते तत्र पर्व
तो न काञ्चनमय इति ज्ञाने विद्यमाने काञ्चनमयपर्वते परामर्शप्रतिबन्धः फलम् स्वरूपासिद्धिस्तु पक्षे व्याप्यतामितस्याभावः अत्र च ह्र
दो द्रव्यधूमवत्त्वादित्यादौ पक्षे व्याप्यतामितस्य हेतोरभावे ज्ञाते पक्षे व्याप्यहेतुमत्ताज्ञानरूपस्य परामर्शस्य प्रतिबन्धः फलम् साध्याप्रसि
द्ध्यादयस्तु व्याप्यत्वासिद्धिभेदा एव साध्ये साध्यतावच्छेदकाभावः साध्याप्रसिद्धिः एतज्ज्ञाने जाते च काञ्चनमयवह्निमानित्यादौ सा
ध्यतावच्छेदकविशिष्टसाध्यपरामर्शप्रतिबन्धः फलम् एवं हेतौ हेतुतावच्छेदकाभावः साधनाप्रसिद्धिः यथा काञ्चनमयधूमादित्यादौ
अत्र च हेतुतावच्छेदकविशिष्टहेतुज्ञानस्याभावात्तद्धेतुकस्य व्याप्तिज्ञानाद्यभावः फलम् एवं वह्निमान्नीलधूमादित्यादौ गुरुतया नीलधू
मत्वस्य हेतुतावच्छेदकत्वमिति व्याप्यत्वासिद्धिरित्यपि वदन्ति बाधस्तु पक्षे साध्याभावादिः एतस्य चानुमितिप्रतिबन्धः फलम् तद्ध
र्मिकतदभावनिश्चयो लौकिकसन्निकर्षाजन्यदोषविशेषाजन्यतद्धर्मिकतज्ज्ञानमात्रविरोधी न तु संशयसाधारणं पक्षे साध्यसंदे
हत्वज्ञानमनुमितिकारणम् न हि विरोधितया च बाधसंप्रतिपक्षयोर्हेत्वाभासत्वमिति नियमः अप्रसिद्धसाध्यकानुमित्युपपत्तेः साध्यसं
शयादिकं विनाप्यनुमितिस्वीकाराच्च एवं साध्याभावज्ञानप्रमात्वज्ञानमपि न प्रतिबन्धकं भ्रमात्वाभावाङ्कोरवाच्च अन्यथा संप्रतिपक्षादावपि
तदभाववद्व्याप्यवत्ताज्ञानत्वेन प्रमात्वविषयकत्वेन प्रतिबन्धकतापत्तेः किन्तु भ्रमत्वज्ञानानास्कन्दितबाधबुद्धेः प्रतिबन्धकता तत्र भ्रमत्व
शङ्काविरहेण प्रामाण्यज्ञानं क्वचिदुपयुज्यते न च बाधस्थले पक्षे हेतुसत्त्वे व्यभिचारः पक्षे हेत्वभावे स्वरूपासिद्धिरेव दोष इति वाच्यम् त
थापि बाधज्ञानस्य व्यभिचारज्ञानादेर्भेदात् किञ्च परामर्शात्पूर्वं बाधबुद्धिसत्त्वे व्यभिचारज्ञानादेः किञ्चित्करत्वाद्बाधस्यानुमितिप्रति
बन्धकत्वं वाच्यम् एवं च यत्र सन्निकृष्टवह्निस्तत्र दो गन्धव्याप्यपृथिवीत्ववत्ताज्ञानं तत्र बाधस्यैव प्रतिबन्धकत्वं वाच्यम् न च पक्षे हेतौ
व्यसत्त्वात्कथं बाध इति वाच्यम् एतदवच्छेदकदेशकालावच्छेदेनानुमितेरनुभवसिद्धत्वादिति बाधस्तदाप्यभिन्नाये हेत्वाभासास्तु व्याप्यास

अनुमितिकारणी
भूतज्ञानविषयत्व
ज्ञानविशिष्टत्वम्
...

पक्षविशेष्यकसाध्याभावज्ञानप्रमात्वनिश्चयोऽनुमितिप्रतिबन्धकस्तदभावः कारणमतस्ताद — तदभावादे — व्यभिचारज्ञानेऽनुमितौ ... प्रतिबन्धकं किन्तु परामर्शप्रतिबन्धकात्तथा च ... परामर्शेऽतः कालीनव्यभिचारज्ञान
प्राप्रमात्वमिदया पश्चात्प्राचीनमतं दूषयति ॥६

पक्षे साध्यसन्देहत
कार्यानुमित्यादिः
तत्रासाध्यसंशय
...
व्यभिचारविरुद्धः

साध्याभाववाप्यव्यापकज्ञानस्य साध्यज्ञानविरोधित्वेमानाभावादिति भावः =२

तदानीमपि केवलान्वयिपक्षताक(संशयरूप)स्वरूपस्यानुपसंहारित्वस्य सत्तेरभावादित्यर्थः तथा च तत्रानुपसंहारित्वस्य सत्त्वात्तस्य व्याप्तिज्ञानानुत्पादप्रयोजकत्वाभावाद्धेत्वाभासत्वानुपपत्तिरिति भावः =८

पि न साध्यपक्षवान्न भवति अन्यथा हेत्वाभासाधिक्यप्रसङ्गात् बाधव्याप्यः सत्प्रतिपक्षो भिन्न एवं स्वतन्त्रेच्छेन मुनिना पृथगुपदेशात् सत्प्र
तिपक्षव्याप्यस्तु न पृथगिति बोध्यमतिप्रसङ्गात् ७२ यः सपक्षे विपक्षे च भवेत्साधारणस्तु सः सपक्षविपक्षवृत्तिः साधारण इत्यर्थः सपक्षो
निश्चितसाध्यवान् विपक्षः साध्यवद्भिन्नः विरुद्धवारणाय सपक्षविपक्षवृत्तित्वमुक्तम् वस्तुतो विपक्षवृत्तित्वमेव वाच्यम् विरुद्धस्य सा
धारणत्वेपि दूषकताबीजस्य भिन्नतया तस्य पार्थक्यात् यस्तूभयस्माद्व्यावृत्तः स त्वसाधारणो मतः ७३ सपक्षविपक्षव्यावृत्त इत्यर्थः
सपक्षः साध्यवत्तया निश्चितः विपक्षः साध्याभाववत्तया निश्चितः शब्दो नित्यः शब्दत्वादित्यादौ यदा शब्दे नित्यत्वसन्देहस्तदा सपक्षत्वं
घटादीनामेव तद्वृत्ति च शब्दत्वमिति तदा तदसाधारणम् यदा तु शब्दे नित्यत्वनिश्चयस्तदा नासाधारणम् इदं प्राचां मते नवीनमते
तु पूर्वमुक्तमेव तथैवानुपसंहारी केवलान्वयिपक्षकः सर्वमभिधेयं प्रमेयत्वादित्यादौ सर्वस्यैव पक्षत्वात् सामानाधिकरण्यग्रहस्या
भावान्नानुमितिः इदं तु न सम्यक् पक्षैकदेशे सहचारग्रहेपि तेनेरभावात् अस्तु वा सहचारग्रहस्तावता व्याप्तिज्ञानस्यासिद्धेरेव न तद्धेत्वा
भासत्वं तस्य तथापि केवलान्वयिसाध्यकत्वेनानुमितिप्रतिबन्धकम् यः साध्यवति नैवास्ति स विरुद्ध उदाहृतः ७४ एवकारेण साध्यवत्तावच्छेदेन
हेत्वभावो बोधितः तथा च साध्यव्यापकीभूताभावप्रतियोगित्वं तदर्थः असिद्धं विभजते आश्रयासिद्धिराद्या स्यात्स्वरूपासिद्धिरप्यथ व्या
प्यत्वासिद्धिरपरा स्यादसिद्धिरतस्त्रिधा ७५ पक्षासिद्धिर्यत्र पक्षो भवेन्मणिमयो गिरिः ह्रदो द्रव्यं धूमवत्त्वादत्रासिद्धिरथापरा ७६ व्याप्यत्वासि
द्धिरपरा नीलधूमादिके भवेत् पक्षासिद्धिराश्रयासिद्धिरित्यर्थः अपरा स्वरूपासिद्धिरित्यर्थः नीलधूमेति नीलधूमत्वं गुरुतया न हेतुतावच्छेद
कं स्वसमानाधिकरणव्याप्यतावच्छेदकधर्मान्तरघटितस्यैव व्याप्यतावच्छेदकत्वात् धूमप्रागभावत्वसङ्ग्रहाय स्वसमानाधिकरणेति विरु
द्धयोः परामर्शे हेतोः सत्प्रतिपक्षता ७७ कपिसंयोगतदभावव्याप्यवत्तापरामर्शेपि न सत्प्रतिपक्षितत्वमत उक्तं विरुद्धयोरिति तथा च स्व
साध्यविरुद्धसाध्याभावव्याप्यवत्तापरामर्शकालीनसाध्यव्याप्यवत्तापरामर्शविषय इत्यर्थः साध्यशून्यो यत्र पक्षस्त्वसौ बाध उदाहृतः उत्प
त्तिकालीनघटे गन्धादिर्यत्र साध्यते ७८ पक्षः पक्षतावच्छेदकविशिष्ट इत्यर्थः तेन घटे गन्धसत्त्वेपि न क्षतिः एवं मूलावच्छिन्नो वृक्षः कपिसं
योगीत्यत्रापि बोध्यम् ॥ इति श्रीविश्वनाथपञ्चाननविरचितायां सिद्धान्तमुक्तावल्यामनुमानं समाप्तम् ॥ उपमितिं व्युत्पादयति । ग्रा
मीणस्य प्रथमतः पश्यतो गवयादिकम् सादृश्यधीर्गवादीनां या स्यात्सा करणं मतम् ७९ वाक्यार्थस्यातिदेशस्य स्मृतिर्व्यापार उच्यते गव
यादिपदानां तु शक्तिधीरुपमाफलम् ८० यत्रारण्यकेन केनचिद्ग्रामीणाय गोसदृशो गवयपदवाच्य इत्युक्तं पश्चाद्ग्रामीणेन क्वचिदरण्यादौ

व्यभिचारज्ञाने साधारण्य(?)ज्ञानं प्रतिबन्धकं विरुद्धस्य सामानाधिकरण्यग्रहे प्रतिबन्धकत्वे

असाधारणः साध्यसामानाधिकरण्ये हेतुरिसाद्धि(?)तोक्तमित्यर्थः

सहचारग्रहस्य

सहचारग्रहविषयकत्वा
त्स्यानुमितिप्रतिबन्धकत्वे
सहचारग्रहस्य हेत्वाभास
त्वं स्यात् तच्च नेष्यते अतः सह
चारग्रहस्य स्वरूपसत्त्व
नानुमितिविरोधित्वात्

धूमाभाववद्वृत्तित्वस्य मानधूमवत्त्वात् धूमप्रागभावात्

मु॰ व॰
२॰
20

गवयो हस्तस्तु गोसादृश्यदर्शनं यज्ज्ञानं तदुपमितिकरणम् तदनन्तरं गोसदृशो गवयपदवाच्य इत्यतिदेशवाक्यार्थस्मरणं यज्जायते तदेव व्या
पारः तदनन्तरं तत्र गवयो गवयपदवाच्य इति ज्ञानं यज्जायते तदुपमितिः न तु यं गवयपदवाच्य इत्युपमितिर्गवयान्तरे शक्तिग्रहाभावप्रसङ्गात् ।
इत्युपमानम् ॥ शाब्दबोधप्रकारं दर्शयति पदज्ञानं तु करणं द्वारं तत्र पदार्थधीः शाब्दबोधः फलं तत्र शक्तिधीः सहकारिणी ८१ पदज्ञानं ति
ति न तु ज्ञायमानं पदं करणं पदाभावेपि मौनिश्लोकादौ शाब्दबोधात् पदार्थधीरिति पदजन्यपदार्थस्मरणं व्यापारः अन्यथा पदज्ञानवतः प्रत्यक्षा
दिना पदार्थोपस्थितावपि शाब्दबोधापत्तेः तत्रापि हि पदजन्यत्वं वाच्यम् अन्यथा घटपदात् समवायसम्बन्धेनाकाशस्मरणे जाते आकाशस्या
पि शाब्दबोधापत्तेः वृत्तिश्च शक्तिलक्षणान्यतरसंबन्धः अत एव शक्तिज्ञानस्योपयोगः शक्तिग्रहाभावे पदज्ञानेपि तत्सम्बन्धेन स्मरणानुपपत्तेः
पदज्ञानस्य हि संबन्धज्ञानविधया पदार्थस्मारकत्वम् शक्तिश्च पदेन सहार्थस्य संबन्धः सा चास्मात्पदादयमर्थो बोद्धव्य इतीश्वरेच्छारूपा आधुनि
केनाम्नि शक्तिरस्त्येव एकादशेहनि पिता नाम कुर्यादितीश्वरेच्छायाः सत्त्वात् आधुनिकसङ्केतिते तु न शक्तिरिति संप्रदायः नव्यास्तु ईश्वरेच्छा न
शक्तिः किं त्विच्छैव तेनाधुनिकसङ्केतितेपि शक्तिरस्त्येवेत्याहुः शक्तिग्रहस्तु व्याकरणादितः तथा हि शक्तिग्रहं व्याकरणोपमानकोशाप्तवा
क्याद्व्यवहारतश्च वाक्यस्य शेषाद्विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः धातुप्रकृतिप्रत्ययादीनां शक्तिग्रहो व्याकरणाद्भवति क्वचित्तु सति
बाधके त्यज्यतेपि यथा वैयाकरणैराख्यातस्य कर्तरि शक्तिरुच्यते चैत्रः पचतीत्यादौ कर्त्रा सह चैत्रस्याभेदान्वयः तत्तु गौरवात्त्यज्यते किन्तु कृ
त्तौ शक्तिर्लाघवात् कृतिश्चैत्रादौ प्रकारीभूय भासते न च कर्तुरनभिधानाच्चैत्रादिपदोत्तरं तृतीया स्यादिति वाच्यम् कर्तृसङ्ख्यानभिधानस्य तत्र
तन्त्रत्वात् सङ्ख्याभिधानयोग्यश्च कर्मत्वाद्यनवरुद्धः प्रथमान्तपदोपस्थाप्यः कर्मत्वादीनामस्वेतरविशेषणत्वसामर्थ्याविवक्षितत्वमित्यर्थः तेन चैत्र
इव मैत्रो गच्छतीत्यत्र चैत्रादेर्वारणं स्तोकं पचतीत्यादौ स्तोकादेर्वारणं न चैत्रे सङ्ख्यान्वयः यत्र कर्मादौ न विशेषणत्वे तात्पर्यं तद्वारणाय प्रथमान्तेति
यद्वा धात्वर्थातिरिक्ताविशेषणत्वं प्रथमदलार्थः तेन चैत्र इव मैत्रो गच्छतीत्यत्र चैत्रादेर्वारणं स्तोकं पचतीत्यादौ स्तोकादेर्वारणाय द्वितीयं दल
म् तस्य द्वितीयान्तपदोपस्थाप्यत्वाद्वारणम् एवमाख्यातेपि न शक्तिर्गौरवात् यथा गच्छतीत्यादौ तु व्यापारे आश्रयत्वे वा लक्षणा जानातीत्या
दौ त्वाश्रयत्वे नश्यतीत्यादौ तु प्रतियोगित्वे निरूढलक्षणा उपमानाद्यथा शक्तिग्रहस्तथोक्तम् एवं कोशादपि शक्तिग्रहः सति बाधके क्वचित्त्य
ज्यतेपि यथा नीलादिपदानां नीलरूपादौ नीलादिविशिष्टे च कोशेन शक्तिरुक्ता तथापि नीलादावेव शक्तिः नीलादिविशिष्टे तु लक्ष
णा एवमाप्तवाक्यादपि यथा कोकिलः पिकपदवाच्य इत्यादिशब्दात् पिकपदादिशक्तिग्रहः एवं व्यवहारादपि यथा प्रयोजकवृद्धेन घटमा

गुणवचनानां तु पोर्लिङ्गे वृत्तिर्लिङ्गेन मतुब्लोपे तद्वति विशिष्टार्थबोधसंभवेऽपि लक्षणैव स्यापि वृत्तिः =२

गुणे शुक्लादयः पुंसि गुणिलिङ्गास्तु तद्वतीति कोशस्योभयत्र शक्तिग्राहकत्वादिति भावः २= नीलादिमत्त्वापेक्षया नीलत्वादिजातेर्लघुतया शक्यतावच्छेदकत्वादिति भावः =२

कार्यतान्वितविषयकशाब्दत्वावच्छिन्नं प्रति पदत्वेन कारणतेति कार्यकारणभावः पर्यवसितः इत्येवं कार्यान्वितपदानामानुभविकी शक्तिः इत्यर्थः ८ इत्यर्थः
तत्र व्यवहारेण तन्नयनादि नाऽनुमिते घटानयनादिधर्मिककार्यताज्ञाने पदानां कारणत्वकल्पनं तत्र गौरवात् लाघवेन एवं सा तात्पर्यया वा कार्यतान्वितविष-
यकशाब्दत्वव्यापकीभूतकार्यताविषयकशाब्दत्वावच्छिन्नजनककार्यत्वावाचकत्वे उदाहृतभावात् कस्य कोशादितः शक्तिग्रह इति प्रमाकरादेः पूर्वमतमित्यर्थः यति
कार्यतान्वितविषयकबोधं प्रति पदानां हेतुत्वाद् इव =५ केवलत्वावच्छिन्ने २ इत्यर्थं चेत्यादिना =२

कार्यता बोधं प्रति पदानां तत्र कार्यतापत्तिरिति तात्पर्यं तत्र कार्यतान्वितघटादौ
[illegible]

वचेत्युक्तं तन्न न्यायोऽनुपहतेन वृद्धानां मध्यमवृद्धपार्श्वस्थो बालो वदनानन्तरं कार्यं दृष्ट्वा नवेति पदप्रयोज्यमिदमवधार-
यति तत्पश्चाद्घटेन यगामानयेत्यादिवाक्यादावापोद्वापाभ्यां घटादिपदानां कार्यान्वितघटादौ शक्तिं गृह्णाति इत्यञ्च भूतले नी-
लो घट इत्यादिशाब्दबोधः घटादिपदानां कार्यान्वितघटादौ शक्तिं [illegible] बोधे सामर्थ्यावधारणात् कार्यताबोधं प्रति
च लिङादीनां सामर्थ्यात् तदभावात् शाब्दबोधस्तिकोऽचित् तत्र प्रथमतः कार्यान्वितघटादौ शक्त्यवधारणेऽपि लाघवेन पश्चात् स्वप-
रिभागो चिन्त्यात् [illegible] स्तेजोऽन्तःकरणातेऽपि तात्पर्यादेव एव प्रमादमालिन्यात् ... एवं दुःखेऽपि तन्मात्रकारणत्वेन वृत्ति-
शेषात् तच्छाब्दबोधं निर्णीयते देवेन यातशाब्दमवधारयति तच्च व्यभिचारात् कार्यान्वितेन शक्तिः न च तत्र तं पश्चात् स्यादिशाब्दान्व-
मध्याहारार्थकत्वाभावात् चेत्तथाऽस्तेजातोऽस्त्वश्यादौ तदभावाच्च इत्थं च लाघवादन्वितघटे निरूपितशक्तिमत्वाद्घटपदस्य घटमात्रे श-
क्तिमवधारयति वाक्यशेषादपि शक्तिग्रहो यथा यवमयश्चरुर्भवतीत्यत्र यवपदस्य दीर्घशूकविशेषे आर्याणां प्रयोगः कङ्गौ म्लेच्छा-
नां तत्र हि वसन्ते सर्वसस्यानां जायते पत्रशातनम् मोदमानाश्च तिष्ठन्ति यवाः कणिशशालिनः यत्रान्या ओषधयो म्लायन्ते तत्रैते मोद-
मानास्तिष्ठन्तीति वाक्यशेषाद्दीर्घशूके यवशक्तिर्निर्णीयते कङ्गौ तु शक्तिभ्रमात्प्रयोगः नानाशक्तिकल्पने गौरवात् इत्यादि परेतु विनि-
गमकाभावान्नानाशक्तिकल्पनम् विनिगमनाचैकत्रपक्षपातिनी युक्तिः एवं विवरणादपि शक्तिग्रहः विवरणं तु तत्समानार्थकप-
दान्तरेण तदर्थकथनम् यथा घटोऽस्तीत्यस्य कलशोऽस्तीत्यनेन विवरणेन घटपदस्य कलशे शक्तिग्रहः एवं पचतीत्यस्य पाकं करोती-
त्यनेन विवरणेनाख्यातस्य यत्नार्थकत्वं कल्प्यते एवं प्रसिद्धपदसान्निध्यादपि शक्तिग्रहः यथेह सहकारतरौ मधुरं पिको रौती-
त्यादौ पिकपदस्य कोकिले शक्तिग्रह इति तत्र जातावेव शक्तिर्न तु व्यक्तौ व्यभिचारादानन्त्याच्च व्यक्तिं विना जातिभानस्यासम्भवाद्व्यक्ते-
रपि भानमिति केचित् तन्न शक्तिं विना व्यक्तिभानानुपपत्तेः न च व्यक्तौ लक्षणा अनुपपत्तिप्रतिसन्धानं विनापि व्यक्तिबोधात् न
च व्यक्तिशक्तावानन्त्यम् सकलव्यक्तावेकस्या एव शक्तेः स्वीकारात् न चाननुगमः गोत्वादेरेवानुगमकत्वात् किञ्च गोः शक्येति
शक्तिग्रहो यदि तदा व्यक्तौ शक्तिः यदि गोत्वं शक्यमिति शक्तिग्रहस्तदा गोत्वप्रकारकपदार्थस्मरणं शाब्दबोधश्च न स्यात् समान-

जातिभासकसामग्र्या एव व्यक्तिभासकत्वादित्याशयः व्यक्तिविशेष्यकजातिप्रकारकशाब्दबोधे जातिविषयकशक्तिज्ञानस्य हेतुत्वात् =२ इत्यस्य पदजन्यपदार्थोपस्थितेः शाब्दबोधं प्रति हेतुतया व्यक्तिशक्तिं विना
[illegible] इत्याशयः = लक्षणेति [illegible] इत्याशयः = [illegible]
[illegible] इत्याशयः =२ [illegible] विषयकशक्तिज्ञानं [illegible]
[illegible] इत्याशयः =२ [illegible]
[illegible] किं वेति २=

मीमांसकमतमाह [illegible] कार्यान्वितविषयक शाब्दत्वव्यापकीभूत कार्यताविषयक शाब्दत्वावच्छिन्नेति [illegible] इत्यादिपदे = ८

तत्र कोशस्यापि [illegible] इत्याशयः =

[illegible] इत्याशयः =५

[illegible] इत्याशयः =१

यत्रान्या [illegible] इत्याशयः =

[illegible]

गोत्वेशक्यत्वविशिष्टशक्तिग्रहस्य गोत्वविशेष्यकत्वेन गोत्वप्रकारकत्वाभावात् गोत्वप्रकारकस्मरणशाब्दबोधयोरनुपपत्तिरित्यर्थः = १

21

मु.व. २१

प्रकारकत्वेन शक्तिज्ञानस्य पदार्थस्मरणं शाब्दबोधं प्रति च हेतुत्वात् किन्तु गोत्वेऽपि यदि शक्तिग्रहस्तदा गोत्वत्वं शक्यतावच्छेद
अवयवसंस्थानम् = कं वाच्यम् गोत्वत्वं च गोवृत्तित्वसमवेतत्वे सति सकलगोसमवेतत्वम् तथा च गोत्वजातीनां शक्यतावच्छेदके तु प्रवेशात् नवेवं गौरव
म् तस्मात् गोत्वजात्याकृतिविशिष्टे तत्तद्व्यक्तिबोधान्यथानुपपत्त्या कल्प्यमाना शक्तिर्व्यक्तावेव विश्राम्यतीति भावः पदम् तच्चतुर्विधं यौ
कचिद्रूढं १ गिकं रूढं च योगरूढं रूढयौगिकं रूढम् यत्रावयवार्थ एव बुध्यते तद्यौगिकम् यथा पाचकादिपदम् यत्रावयवशक्तिनैरपेक्ष्ये
ण समुदायशक्तिमात्रेणानुबुध्यते तद्रूढम् यथा गोपदं मण्डलादिपदम् यत्र त्ववयवशक्तिविषये समुदायशक्तिरप्यस्ति तद्योगरूढम् य
था पङ्कजादिपदम् तथा हि पङ्कजपदमवयवशक्त्या पङ्कजनिकर्तृरूपमर्थं बोधयति समुदायशक्त्या च पद्मत्वेन रूपेण पद्मं बोधयति
रूढ्यर्थस्य सन्निहितोपस्थितिकत्वात् = ८ ति न च केवलावयवशक्त्या पङ्कजपदेऽप्रयोगः स्यादिति वाच्यम् रूढिज्ञानस्य केवलयौगिकार्थबोधे प्रतिबन्धकत्वादिति प्राञ्चः वस्तु
तस्तु समुदायशक्त्युपस्थितपद्मेऽवयवार्थपङ्कजनिकर्तृत्वान्वयबोधस्य अन्वयितासन्निधानात् यत्र तु रूढ्यर्थस्य बाधः प्रतिसन्धीयते तत्र लक्ष
णया कुमुदादेर्बोधः यत्र कुमुदत्वेन रूपेण बोधे न तात्पर्यं ज्ञानं पद्मत्वस्य च बाधस्तत्रावयवशक्तिमात्रेण निर्वाहः स्यात् यत्र तु स्थल
पद्मत्वेनैव = पद्मादावयवार्थबाधस्तत्र समुदायशक्त्या पद्मत्वेन रूपेण बोधः यदि तु स्थलपद्मं विजातीयमेव तदा लक्षणैव यत्र तु रूढ्यर्थयौ
गिकार्थयोः स्वातन्त्र्येण बोधस्तद्यौगिकरूढम् यथोद्भिदादिपदम् तत्र हि रूढ्या भेदनकर्त्ता तरुगुल्मादिरपि बुध्यते यागविशेषोऽपीति
ल लक्षणा शक्यसंबन्धस्तात्पर्यानुपपत्तिः गङ्गायां घोषः इत्यादौ गङ्गापदस्य शक्यार्थप्रवाहरूपे घोषस्यान्वयानुपपत्तिस्तात्पर्यानुपप
त्तिर्वा यत्र प्रतिसन्धीयते तत्र लक्षणया तीरस्य बोधः सा च शक्यसम्बन्धः तथा हि प्रवाहरूपशक्यार्थसम्बन्धस्य तीरे गृहीतत्वात्तीरस्य
स्मरणं ततः शाब्दबोधः परं तु यद्यन्वयानुपपत्तिर्लक्षणाबीजं स्यात्तदा यष्टीः प्रवेशयेत्यत्र लक्षणा न स्यात् यष्टिषु प्रवेशस्यान्वयस्या
नुपपत्तेरभावात् तेन प्रवेशे भोजनतात्पर्यानुपपत्त्या यष्टिधरेषु लक्षणा एवं काकेभ्यो दधि रक्ष्यतामित्यादौ काकपदस्य दध्युपघा २१
तके लक्षणा सर्वतो दधि रक्षाया तात्पर्यविषयत्वात् एवं छत्रिणो यान्तीत्यादौ छत्रिपदस्यैकसार्थवाहित्वेन लक्षणा इयमेवाजह
त्स्वार्था लक्षणोच्यते एकसार्थवाहित्वेन रूपेण छत्रितदन्ययोर्बोधात् यदि चान्वयानुपपत्तिर्लक्षणाबीजं स्यात्तदा कचित् गङ्गापद

जात्याकृतिविशिष्टव्यक्तावेव = च न कालजातिविशिष्टव्यक्तावेव शक्तिः =

कुमुदत्वेन च बोधे तात्पर्यम् =

रूढ्यर्थतावच्छेदकपद्मत्वजातेस्तत्राभावे न रूढ्यान्वयबोधनासंभवात् =

सन्नीरेकविहायपदस्य समस्यार्थेन लक्षणेति नियमो न स्यात् गुणाद्वारकश्च सम्बन्धो गौणी यथा गौर्वाहीक इति एवं वाक्येनापि सम्बन्धं
न लक्षणोपेवतत्सिद्धेः सामर्थ्यानुपपत्तेः सम्बन्धं शब्दबोधं शक्यार्थसम्बन्धो यदि नीरत्वेन रूपेण गृहीतस्तदा नीरत्वेन तीरबोधः य
दि तु गङ्गातीरत्वेन रूपेण गृहीतस्तदा तेनैव रूपेण स्मरणाच्छाब्दबोधः अत एव लक्ष्यतावच्छेदके न लक्षणा तत्प्रकारकपदार्थबोधस्य तत्र लक्ष
णां विनाप्युपपत्तेः यस्त्वेवं शक्यतावच्छेदके विशक्तिर्न स्यात् तत्प्रकारकपदार्थस्मरणं प्रति तत्तत्पदस्य सामर्थ्याभिमतस्यैव तत्वादिति
विभावनीयम् यत्र शक्यार्थस्य परम्परासम्बन्धरूपा लक्षणा सा लक्षितलक्षणेत्युच्यते यथा द्विरेफादिपदे रेफद्वयसम्बन्धो भ्रमरपदे ज्ञा
यते भ्रमरपदस्य च सम्बन्धो भ्रमरे ज्ञायते तत्र लक्षितलक्षणा किन्तु लाक्षणिकं पदं नानुभावकम् [illegible] तात्पर्यस्य [illegible] बोधकं प
दान्तरं कारणम् [illegible] तत्स्वार्थ [illegible] प्रतिपदानां सामर्थ्यावधारणात् [illegible] भावा
[illegible] सम्बन्धरूपा लक्षणापि नास्ति यत्र तु गम्भीरायां नद्यां घोष इत्यत्र नदीपदस्य नदीतीरे लक्षणा गम्भीरपदार्थस्य तु [illegible] सहाभेदा
न्वयः कुविदेकदेशान्वयस्यापि स्वीकृतत्वात् पदार्थः पदार्थेनान्वेतीति न तु पदार्थैकदेशेनेति नियमेन यदि तत्रैकदेशान्वयो न स्वीक्रियते
तदा तु नदीपदस्य गम्भीरनदीतीरे लक्षणा गम्भीरपदं तात्पर्यग्राहकम् बहुव्रीहावप्येवम् तत्र हि चित्रगुपदादौ यद्येकदेशान्वयः स्वीक्रियते
तदा गोपदस्य गोमति लक्षणा गवि चित्राभेदान्वयः यदि चैकदेशान्वयो न स्वीक्रियते तदा गोपदस्य चित्रगोमति लक्षणा चित्रपदं तात्प
र्यग्राहकम् एवमारूढवानरो वृक्ष इत्यादौ वानरपदे वानरारोहकमिति लक्षणा आरूढपदं तात्पर्यग्राहकम् एवमन्यत्रापि बोध्यम् त
त्पुरुषे तत्पूर्वपदे लक्षणा तथाहि राजपुरुष इत्यादौ राजादिपदार्थेन पुरुषादिपदार्थस्य साक्षादेवान्वयः निपातातिरिक्तनामार्थयोर्भेदे
नान्वयबोधस्याव्युत्पन्नत्वात् अन्यथा राजा पुरुष इत्यादावपि तथान्वयबोधः स्यात् नीलो घट इत्यादौ चाभेदान्वयात् [illegible] अभेदान्वया
न्निपातातिरिक्तेति नञ्घटो नास्तीत्यादौ भेद एव प्रतीयते [illegible] किं नियामकमिति चेत् इदम् यत्र न
विभक्तिके प्रतियोगि [illegible] भेदान्वयसाकाङ्क्षता [illegible] संसर्गाभावप्रत्ययः नीलो घट इत्यादौ नामा
र्थयोरभेदसम्बन्धेनान्वय इति न च राजपुरुष इत्यादौ [illegible] विभक्तेः स्मरणं कल्प्यमिति वाच्यम् [illegible] विभक्तेरपि तत्र बोधोदयात्
तस्माद्राजपदादौ राजसम्बन्धिनि लक्षणा तस्य च पुरुषेण सहाभेदान्वयः द्वन्द्वे तु धवखदिरौ छिन्धीत्यादौ धवः खदिरश्च विभक्त्यर्थे हि

सू॰च॰
२२

22

प्रकारेणाबुध्यते तत्र न लक्षणा न च साहित्येन लक्षणेति वाच्यम् साहित्यस्य योरपि हन्तृदर्शनात् नैवैकक्रियान्वयित्वरूपं साहित्यमस्ती
ति वाच्यम् क्रियाभेदेऽपि धवखदिरौ पश्य छिन्धीत्यादौ तथा दर्शनात् साहित्यानन्तभावाच्च अत एव राजपुरोहितौ सायुज्यकामो यजे
यातामित्यत्र लक्षणाभावाद्द्वन्द्वस्थले ऽपि तस्मात् साहित्यादिकं नार्थः किं तु वास्तवो भेदो यत्र तत्र द्वन्द्वः न च नीलघटयोरभेदस्तत्रादौ
कथमिति वाच्यम् तत्र नीलपदस्य नीलत्वेन घटपदस्य घटत्वेन लक्षणा अभेदस्य च प्रयाभेदस्य पर्याप्तत्वात् समाहारद्वन्द्वे तु यदि समा
हारो ऽप्यन्वयी तदा स उच्यते न दाहिनकुलमित्यादौ परपदे ऽहिनकुलसमाहारे लक्षणा सर्वपदतात्पर्यग्राहकम् न च भेरीमृदङ्गं वादये वादन कर्मत्वम् =
त्यत्र कथं समाहारस्यान्वयस्तस्यापेक्षा तु द्विविशेषरूपस्य वादनासम्भवादिति वाच्यम् परम्परासम्बन्धेन तदन्वयात् एवं पञ्चनदी मा
दावपि परे तत्र अहिनकुलमित्यादौ वहिनकुलसमुच्चयते प्रत्येकमेकत्वान्वयः समाहारसंज्ञा च यत्रैकत्वं नपुंसकत्वं च प्राणितूर्येत्यादि
सूत्रेणोक्तं तत्रैवान्यत्रैकवचनमसाधु इत्याहुः पितरौ श्वशुरावित्यादौ पितृपदे स्वजनकदम्पत्योः श्वशुरपदे स्वस्त्रीजनकदम्पत्योर्लक्षणा
एवमन्यत्रापि वृद्धारस्मादौ न लक्षणा उदरत्वेन रूपेण नानाह्रदोपस्थितिसम्भवात् कर्मधारयस्थले तु नीलोत्पलमित्यादावभेदसम्बन्धे
न नीलपदार्थ उत्पलपदार्थे प्रकारस्तत्र न लक्षणा अत एव निषादस्थपतिं याजयेदित्यत्र न तत्पुरुषो लक्षणागौरवात् किन्तु कर्मधारयो लक्ष
णाया अभावात् न च निषादस्य सङ्करजातीयस्य वेदानधिकारात् याजनासम्भव इति वाच्यम् निषादस्य विद्याप्रयुक्तेस्तत्र एव कल्पनीयत्वा
त् लाघवेन स्वार्थान्वयेन तदुपपत्त्या कल्पनायाः फलमुखगौरवत्वेनादोषत्वादिति उपकुम्भम् अर्धपिप्पलीत्यादौ परपदे तत्सम्बन्धि ति
लक्षणेन पूर्वपदार्थप्रधानतया चान्वयबोध इति एवं च समासेन क्वापि ... पदशक्त्यैव निर्वाहादिति आसत्तियोग्यताकाङ्क्षातात्पर्य
ज्ञानमिष्यते ऽत्र कारणं । आसत्तिज्ञानं योग्यताज्ञानमाकाङ्क्षाज्ञानं तात्पर्यज्ञानं च शाब्दबोधे कारणम् तत्रासत्तिपदार्थमाह सन्निधा
नं तु पदस्यासत्तिरुच्यते अव्यवधानेन योग्यपदयोरव्यवधानमासत्तिः तज्ज्ञानं शाब्दबोधे कारणम् क्वचिद्व्यवहितेऽप्यव्यवधानभ्रमा
च्छाब्दबोधस्तिके चित् वस्तुतस्त्वव्यवधानज्ञानस्यानपेक्षितत्वात् यत्पदार्थस्य यत्पदार्थेन सहान्वयो ऽपेक्षितस्तयोरव्यवधानेनोपस्थितिः २२
शाब्दबोधे कारणम् तेन गिरिर्भुक्तमग्निमान्देवदत्तेनेत्यादौ न शाब्दबोधः तात्पर्यगर्भासत्तिः नीलो घटो द्रव्यं पटस्त्वित्यत्रासत्तिभ्रमाच्छाब्दबोधः
आसत्तिभ्रमेणाशाब्दभ्रमाभावेऽपि न क्षतिः ननु यत्र कञ्जीकृत एवली ओसम्बी देवदत्तस्याह्युक्तं तत्रोत्तरपदस्मरणेन पूर्वपदस्मरणस्य नाशाद्व

वधानेनोत्तरपदस्मरणसम्भवदशायामेव प्रत्येकपदानुभवजन्यसंस्कारैश्चरमस्य तावत्पदविषयकस्मरणस्याव्यवधानेनोत्पत्तेः नानासंस्कारै
कैरेकप्रयत्नस्येव नानासंस्कारैरेकस्मरणस्यापि सम्भवात् तावत्पदसंस्कारसहितचरमवर्णज्ञानस्योद्बोधकत्वात् कथमन्यथा नानाव
र्णैरेकपदस्मरणम् परं तु तावत्पदार्थानां स्मरणादेकदैव एवैकेन न्यायात्तावत्पदार्थानां क्रियाकर्मभावेनान्वयरूपः शाब्दबोधो भवती
ति केचित् तदाप्यवान्तरः शिशवः कपोताः खले यथा सौ युगपत्पतन्ति तथैव सर्वे युगपत्पदार्थाः परस्परेणान्वयिनो भवन्तीति एतेनय
द्यदाकाङ्क्षितं योग्यं सन्निधानं प्रपद्यते तेन तेनान्वितः स्वार्थः पदैरेवावगम्यते तथा च खण्डशो वाक्यार्थबोधानन्तरं तथैव वाक्यार्थस्य सा
महावाक्यार्थबोधस्याङ्गः एतेन तावद्वर्णाभिव्यङ्ग्यः पदस्फोटोऽपि निरस्तः तत्तद्वर्णसंस्कारसहितचरमवर्णोपलम्भेन तद्व्यञ्जकेनैव बो
पपत्तेरिति इदं तु बोध्यम् यत्र द्वारमित्युक्ते तत्र पिधेहीत्यादिपदस्य ज्ञानादेव बोधः तत्र पिधानादिरूपार्थज्ञानात्पदजन्यत्वं तत्पदार्थोप
स्थितेस्तत्र शाब्दबोधे हेतुत्वात् किं च क्रियाकर्मपदानां तेन तेनैव सहाकाङ्क्षितत्वात् तत्र क्रियापदं विना कथं शाब्दबोधः स्यात् तथा च
छभयस्मादौ स्पृहयतीतिपदाध्याहारं विना च तदर्थानुपपत्तेः पदस्याध्याहारश्चावश्यकः योग्यतां निर्वक्ति पदार्थे तत्र तद्वत्ता योग्यता परि
कीर्तिता ८२ एकपदार्थे परपदार्थसम्बन्धो योग्यतेत्यर्थः तज्ज्ञानाभावाच्च वह्निना सिञ्चतीत्यादौ न शाब्दबोधः नन्वेतस्या योग्यताया
ज्ञानं शाब्दबोधात्पूर्वं न सम्भवति वाक्यार्थस्यापूर्वत्वादिति चेन्न तत्तत्पदार्थस्मरणे सति क्वचित्संशयरूपस्य क्वचिन्निश्चयरूपस्यापि यो
ग्यताज्ञानस्य सम्भवात् न चास्तु योग्यताज्ञानं शाब्दबोधे कारणं वह्निना सिञ्चतीत्यादौ सेके वह्निकरणत्वाभावरूपायोग्यतानिश्चयेन
प्रतिबन्धान्न शाब्दबोधः तदभावनिश्चयस्य लौकिकसन्निकर्षाजन्यदोषविशेषाजन्यतज्ज्ञानमात्रे प्रतिबन्धकत्वाच्छाब्दबोधं प्रत्यपि प्रति
बन्धकत्वं सिद्धम् योग्यताज्ञानविलम्बाच्च शाब्दबोधविलम्बोऽसिद्धः तस्मादाकाङ्क्षां निर्वक्ति यत्पदेन विना यस्याननुभावकता भवेत्
आकाङ्क्षा येन पदेन विना यत्पदस्यान्वयाननुभावकत्वं तेन पदेन सह तस्याकाङ्क्षेत्यर्थः क्रियापदं विना कारकपदं नान्वयबोधं जनयतीति
तेन तस्याकाङ्क्षा वस्तुतस्तु क्रियाकारकपदानां सन्निधानमासत्याचरितार्थम् परं तु घटकर्मताबोधं प्रति घटपदोत्तरद्वितीयारूपाकाङ्क्षा

23

मु. व.

नेकारणांतेनशब्दः कर्मत्वमानयनेकृतिरित्यादौनशाब्दबोधः अयमेति पुत्रो राज्ञः पुरुषोपसार्यतामित्यादौतु पुत्रेणासह
राजपदस्यतात्पर्यग्रहसत्वात्तेनैवान्वयबोधः पुरुषेणासहतात्पर्यग्रहेतुतेनसहान्वयबोधः स्यादेव ॥ तात्पर्यंतिर्वक्ति वक्तु
रिच्छातुतात्पर्यंपरिकीर्तितम् ८४ यदितात्पर्यज्ञानंकारणंनस्यात्तदासैन्धवमानयेत्यादौकचिदश्वस्यकचित्तुलवणा
शाब्दबोध इति नियमो न स्यात् नचतात्पर्यग्राहकाणांप्रकरणादीनांशाब्दबोधेकारणत्वमस्त्विति वाच्यम् तेषामननुग
मात् तात्पर्यज्ञानजनकत्वेन तेषामनुगमे तु तात्पर्यज्ञानमेव लाघवात्कारणमस्तु अन्यच वेदस्थले तात्पर्यज्ञानार्थ
मीश्वरः कल्प्यते नचतत्राध्यापकतात्पर्यज्ञानंकारणमिति वाच्यम् सर्गादावध्यापकाभावात् नचप्रलयएवना
स्ति अतः सर्गादिरिति वाच्यम् प्रलयस्यागमानुमानप्रतिपाद्यत्वात् इत्थं च शुकवाक्येपीश्वरीयतात्पर्यज्ञानंकारणम् विसं
वादिशुकवाक्ये तु शिक्षयितुरेवतात्पर्यज्ञानंकारणम् अन्ये तु नानार्थादौक्वचिदेव तात्पर्यज्ञानंकारणम् तथाच
शुकवाक्येविनैवतात्पर्यज्ञानं शाब्दबोधः वेदेत्वनादिमीमांसापरिशोधिततर्कैरर्थावधारणमित्याहुः इतिशाब्दबो
धप्रकरणम् एवमनुभवस्मरणभेदाद्द्वैविध्यमुक्त्वा तत्रानुभवप्रकारा प्रदर्शिताः स्मरणमनयास्मरणं न दर्शित
म् तत्र हि पूर्वानुभवः कारणम् अत्र केचित् अनुभवत्वेनकारणत्वेकिंतुज्ञानत्वेन अन्यथास्मरणात्तरस्मर।
णं न स्यात्समानप्रकारकस्मरणेन पूर्वसंस्कारस्य नष्टत्वात् मन्मते तु तेनैकस्मरणेन संस्कारान्तरद्वारा स्मरणात
रजन्मनेत्याहुः तन्न यत्रसमूहालम्बनात्तरं घटपटादीनांक्रमेणस्मरणंजनिष्ट सकलविषयकस्मरणं तु
नाभूत् तत्रफलस्य संस्कारनाशकत्वाभावात्कालस्य रोगस्य चरमस्मरणस्य वा संस्कारनाशकत्वं वाच्यम् तथाच
नक्रमिकस्मरणानुपपत्तिः नच पुनः पुनः स्मरणाद्दृढतरसंस्कारानुपपत्तिः उद्बोधकसमवधानस्यदार्ढ्यपदा
र्थत्वात् नच विनिगमनाविरहादेवज्ञानत्वेनापि जनकत्वंस्यादिति वाच्यम् विशेषधर्मेणाव्यभिचाराज्ञानत्वसामान्य।

धर्मेणान्यथासिद्धत्वात् कथमन्यथादृष्टस्य भ्रमिन्द्राद्द्रव्यत्वेन रूपेण न कारणत्वम् नचांतरालिकसुखगानां सं
स्कारनाशकत्वसंशयाद्व्यभिचारसंशय इति वाच्यम् अनंतसंस्कारतन्नाशकल्पनापत्त्या चरमसुखगस्यैव संस्कार
नाशकल्पनेन व्यभिचारसंशयाभावात् इदानीं क्रमप्राप्तं मनो निरूपयितुमाह साक्षात्कारे सुखादीनां करणं मन उच्यते
एतेन मनसि प्रमाणं दर्शितं तथाहि सुखसाक्षात्कारः सकरणकः जन्यसाक्षात्कारत्वात् चाक्षुषसाक्षात्कारवदित्यनु
मानेन करणस्य मनसः सिद्धेः नचैवं दुःखादिसाक्षात्काराणामपि करणांतराणि स्युरिति वाच्यम् लाघवादेकस्य स
कलसाक्षात्कारे करणतया सिद्धेः एवं सुखादीनामसमवायिकारणं तु योगाश्रयतया मनःसिद्धिर्बोध्या मनसोऽणुत्वे
प्रमाणमाह अयौगपद्याज्ज्ञानानां तस्याणुत्वमिहेष्यते ८५ ज्ञानानां चाक्षुषरासनादीनां यौगपद्यमेककालोत्पत्ति
र्नास्तीत्यनुभवसिद्धम् तत्र ज्ञाने इन्द्रियाणां सत्यपि विषयसन्निधाने यत्संबन्धादेकेन्द्रियेण ज्ञानमुत्पाद्यते यदसम्ब
न्धाभावाच्च परैर्नोत्पाद्यते तन्मनो विभुत्वे चासन्निधानेन संभवतीति न विभु मनः नच तदानीमदृष्टविशेषोद्बोधविल
म्बादेव ज्ञानविलम्ब इति वाच्यम् तथा सति चक्षुरादीनामपि कल्पनानुपपत्तेः नच दीर्घशष्कुलीभक्षणादौ नानाव
धानभाजां च कथमेकदा नानेन्द्रियज्ञानमिति वाच्यम् मनसोतिलाघवाज्झटिति नानेन्द्रियसम्बन्धान्नानाज्ञानो
त्पत्त्या उत्पलशतपत्रभेदादाविव यौगपद्यप्रत्ययस्य भ्रांतत्वात् न च मनसः संकोचविकासशालित्वादुभयोपपत्ति
रस्त्विति वाच्यम् नानावयवतन्नाशादिकल्पने गौरवात् लाघवान्निरवयवस्याणुरूपस्यैव मनसः कल्पनादिति संक्षे
ॐ पः इति द्रव्यपदार्थव्याख्या द्रव्यं निरूप्य गुणान्निरूपयति अथ द्रव्याश्रिता ज्ञेया निर्गुणा निष्क्रिया गुणाः गुणत्व
जातौ किं मानमिति चेत् इदं द्रव्यकर्मभिन्ने सामान्यवति या कारणता सा किंचिद्धर्मावच्छिन्ना निरवच्छेद्यकारणता।

याप्रसम्भवात् नहि रूपत्वादिकं सत्तावान्तरावच्छेदिकान्यूनातिरिक्तदेशवृत्तित्वात् तस्य तद्विशत्यन्तर्गतं किंचित्तु वाच्य
म् तदेव गुणत्वम् द्रव्याश्रिता इति यद्यपि द्रव्याश्रितत्वं न लक्षणं कर्मादावतिव्याप्तेः तथापि द्रव्यत्वव्यापकतावच्छेद
कसत्ताभिन्नजातिमत्त्वं तदर्थः भवति हि गुणत्वं द्रव्यत्वव्यापकतावच्छेदकं तद्वत्ता गुणानामिति कर्मत्वं द्रव्यत्वव्या
मु॰व॰ न द्रव्यत्वव्यापकतावच्छेदकं गगनादौ द्रव्यकर्मणोरभावात् द्रव्यत्वं च सामान्यत्वादिकं न जातिरिति न दोषः
२५ निर्गुणा इति यद्यपि निर्गुणत्वं कर्मादावपि तथापि सामान्यवत्त्वे सति निर्गुणत्वं बोध्यम् जात्यादीनां न सामान्य
वत्त्वं कर्मणो न कर्मान्यत्वे द्रव्यस्य न निर्गुणत्वं कर्मादावमिति न तत्रातिव्याप्तिः निष्क्रिया इति स्वरूपकथनेन तु ल
क्षणं गगनादावतिव्याप्तेः ॥ रूपं रसः स्पर्शगन्धौ परत्वमपरत्वकम् ८६ द्रवो गुरुत्वं स्नेहश्च वेगो मूर्त्तगुणा अमी वेगे
न स्थितिस्थापकोऽप्युपलक्षणीयः अमूर्त्तेषु न वर्तन्त इत्यर्थः लक्षणं तु मावदन्योन्यत्वमेवमग्रेऽपि धर्माधर्मौ भावना
च शब्दो बुद्ध्यादयोऽपि च ८७ एतेऽमूर्त्तगुणाः सर्वे विद्वद्भिः परिकीर्तिताः संख्यादयो विभागान्ता उभयेषां गुणा मताः
८८ मूर्त्तामूर्त्तगुणा इत्यर्थः लक्षणं तु मूर्त्तवृत्तित्वे सत्यमूर्त्तवृत्तिगुणत्वव्याप्यजातिमत्त्वं संख्यात्वादिकमादाय लक्ष
णसमन्वयः संयोगश्च विभागश्च संख्या द्वित्वादिका तथा द्विपृथक्त्वादयस्तद्वदेतेऽनेकाश्रिता गुणाः ८९ सं
योगविभागद्वित्वादीनि द्विवृत्तीनि त्रित्वचतुष्ट्वादिकं त्रिचतुरादिवृत्तीति बोध्यम् अतः शेषगुणाः सर्वे मता एकैको
कवृत्तयः रूपरसगन्धस्पर्शैकत्वपरिमाणैकपृथक्त्वपरत्वापरत्वबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नगुरुत्वद्रवत्व
स्नेहसंस्कारादृष्टशब्दा इत्यर्थः बुद्ध्यादिषट्कं स्पर्शान्ताः स्नेहः सांसिद्धिकोद्रवः अदृष्टभावनाशब्दा अमी वैशेषिका २८
गुणाः बुद्धिः सुखदुःखेच्छाद्वेषप्रयत्ना इत्यर्थः स्पर्शान्ताः रूपरसगन्धस्पर्शा इत्यर्थः द्रवो द्रवत्वं वैशेषिका विशेषा

गु र नो

एवं वैशेषिकाः स्वार्थैकवृ विशेषगुणा इत्यर्थः संख्यादिरपरत्वान्तो द्रवोऽसांसिद्धिकस्तथा गुरुत्ववेगौ सामान्यगुणा ए
ते प्रकीर्तिताः संख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वानीत्यर्थः संख्यादिरपरत्वान्तो द्रवत्वं स्नेह एव च।
९२ एते तु द्वीन्द्रियग्राह्याः चक्षुषा त्वचापि ग्रहणयोग्यत्वात् अथ स्पर्शान्तशब्दकाः बाह्यैकैकेन्द्रियग्राह्याः रूपा
दीनां चक्षुरादिग्राह्यत्वात् गुरुत्वादृष्टभावनाः अतीन्द्रिया विभुत्वेन ये स्युर्वैशेषिका गुणाः अकारणगुणोत्पन्ना ए
ते तु परिकीर्तिताः ९४ बुद्धिः सुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मभावनाशब्दा इत्यर्थः अकारणेति कारणगुणा
पूर्वका न भवन्तीत्यर्थः कारणगुणेन कार्यगुणा उत्पाद्यन्ते इति कारणगुणपूर्वकाः पादयोर्वक्ष्यते बुद्ध्यादयस्तु न
तादृशाः आत्मादेः कारणाभावात् अपाकजास्तु स्पर्शान्ता द्रवत्वं च तथाविधम् स्नेहवेगगुरुत्वैकपृथक्त्वपरिमा
स्थु: णकम् स्थितिस्थापक इत्येते स्युः कारणगुणोद्भवाः पाकजरूपादीनां कारणगुणपूर्वकत्वाभावात् पाकजा
इत्युक्तम् तथाविधमपाकजं नैकत्वमपि बोध्यम् संयोगश्च विभागश्च वेगश्चैते तु कर्मजाः ९६ कर्मजत्वं च
यद्यपि न साधर्म्यं घटादावतिव्याप्तेः संयोगजसंयोगेऽव्याप्तेश्च तथापि कर्मजन्यवृत्तिगुणत्वव्याप्यजातिमत्त्वं बोध्य
म् एवमन्यत्रापि बोध्यम् स्पर्शान्तपरिमाणैकपृथक्त्वस्नेहशब्दके भवेदसमवायित्वं घटादिरूपरसगन्धस्पर्शाः।
कपालादिरूपरसगन्धस्पर्शेभ्यो भवन्ति एवं कपालादिपरिमाणादीनां घटादौ समवायिकारणत्वं शब्दस्या
पि द्वितीयशब्दं प्रति एवं स्थितिस्थापकैकपृथक्त्वयोरपि बोध्यम् आत्मनः स्यान्निमित्तत्वम् अथ वैशेषिके गुणे।

25 रोः बुद्ध्यादीनामिच्छादिनिमित्तत्वादिति भावः उष्णस्पर्शगुरुत्वयोः वेगेपि च द्रवत्वे च संयोगादिद्वयेन तथा द्वित्वे वा।
कारणत्वं स्यात् असमवायिकारणत्वे निमित्तकारणत्वे च तथा हि उष्णस्पर्शः उष्णस्पर्शे समवायिपाकजे निमि
त्ते गुरुत्वे गुरुत्वपतनयोरसमवायि अभिघाते निमित्तं वेगो वेगस्पन्दयोरसमवायी अभिघाते निमित्तं द्रवत्वे
न्य॰व॰ द्रवत्वस्पन्दयोरसमवायी संग्रहे निमित्तम् भेरीदण्डसंयोगः शब्दे निमित्तं भेर्याकाशसंयोगोऽसमवायी वंशदल
२०५ द्वयविभागः शब्दे निमित्तं वंशदलाकाशविभागोऽसमवायीति । अथ प्रादेशिको भवेत् वैशेषिको विभुगुणः संयो
गादिद्वयेन तथा प्रादेशिकोऽव्याप्यवृत्तिः चरमशब्दोऽपि भवेत् रूपं द्रव्यादेरुपलम्भकम् रूपत्वादिजातिस्तु प्रत्यक्ष।
सिद्धा रूपशब्दोल्लेखिनी प्रतीतिरिति चेत् मा भूत् रूपशब्दप्रयोगस्तथापि नीलपीतादिनुगतो जातिविशेषोऽनुभव
सिद्ध एव रूपशब्दप्रयोगेपि नीलो वर्णः पीतो वर्ण इति शब्दोल्लेखिनी प्रतीतिरस्त्येव एवं नीलत्वादिकमपि प्रत्य
नी क्षसिद्धम् न चैकैकस्यैव नीलरूपादिव्यक्तेः यद्यन्यैकव्यक्तिवृत्तित्वात् नीलत्वादिकं न जातिरिति वाच्यम् नीलो
नष्टो रक्त उत्पन्न इत्यादिप्रतीतेर्नीलादेरुत्पादविनाशशालितया नानात्वात् अन्यथा पाकनीलनाशे जगदनी।
लतामापद्येत न च नीलसमवायरक्तसमवाययोरेव विनाशोत्पादविषयकोऽसौ प्रत्यय इति वाच्यम् प्रतीत्या।
समवायानुल्लेखनात् न च समवाये नील इति प्रत्ययबलाल्लाघवाच्चैक्यमिति वाच्यम् प्रत्ययस्य तज्जातीयत्ववि २०५
षयकत्वात् सैवेयं गूर्जरीतिवत् लाघवं तु प्रत्यक्षबाधितम् अन्यथा पटादीनामैक्यप्रसंगात् इत्यादिविनाश

वृत्तेः समवायाल्लक्षनत्वापत्तेरिति एतेन रसादिकमपि व्याख्यातम् चक्षुर्ग्राह्यमिति चक्षुर्ग्राह्यविशेषगुणाश्रयत्वमित्यर्थः ।
एवमग्रेऽपि द्रव्यादेरुपलम्भकमुपलब्धिकारणम् इदमेव विवृणोति चक्षुः पञ्चसहकारीत्यालोकादिकमनेका।
र्थाद्द्रव्यगुणकर्मसामान्यानां चाक्षुषप्रत्यक्षं प्रति तु हेतुरयं कारणानेकत्वं रूपं शुक्लनीलरक्तपीतकर्बुरादिभेदाद
नेकप्रकारकं भवति ननु कर्बुरं कथमिति चित्रं रूपं भवति इत्यं नीलपीताद्यारब्धावयविनश्चित्ररूपाप्रत्यक्षत्वप्र
संगात् नापि व्याप्यवृत्तिनीलादिरूपमन्यत्र पीताद्युच्छेदेनापि नीलोपलब्धिप्रसंगात् नाप्यव्याप्यवृत्तिनीलादि
कमुत्पद्यते व्याप्यवृत्तिविजातीयगुणानामव्याप्यवृत्तित्वविरोधात् तस्मान्नानाजातीयरूपैरवयविनि विजा
तीयं चित्ररूपमारभ्यते अत एवैकं चित्ररूपमित्यनुभवोऽपि नानारूपकल्पने गौरवात् इत्यं च नीलादीनां पीताद्यार।
म्भे प्रतिबन्धकत्वकल्पनादवयविनि नपीताद्युत्पत्तिः एतेन स्पर्शोऽपि व्याख्यातः रसादिकमपि नाव्याप्यवृत्ति यार्कि
तु नानाजातीयरसवदवयवैरारब्धेऽवयविनि रसाभावेऽपि न क्षतिः तत्र रसनावयवरसप्रत्यक्षस्यैव रसनेन्द्रियादीना
द्रव्यग्रहेऽसामर्थ्यात् अवयविनीतीरसत्वेऽपि क्षतेरभावात् नव्यास्तु तत्राव्याप्यवृत्त्येव नानारूपं नीलादेः पीतादि
प्रतिबन्धकत्वकल्पने गौरवात् अत एव लोहितो यस्तु वर्णेन मुखे पुच्छे च पाण्डुरः श्वेतः खुरविषाणाभ्यां स नी
लो वृष उच्यते इत्यादिशास्त्रमप्युपपद्यते नच व्याप्याव्याप्यवृत्तिविजातीयत्वयोर्विरोधः मानाभावात् नच लाघ
वादेकं रूपमनुभवविरोधात् अन्यथा घटादेरपि लाघवादेकं स्यादिति एतेन स्पर्शादिकमपि व्याख्यातमित्यपि वदं
ति

26

ति जलादिपरमाणौ नित्यमन्यत्सहेतुकम् जलपरमाणौ तेजःपरमाणौ च रूपं नित्यं पृथिवीपरमाणुरूपं तु न नित्यं त
त्र पाकेन नश्यत्त्वादित्यर्थः नहि घटस्य पाकानन्तरं तदवयवे श्यामरूपमुपलभ्यते नहि रक्तकपालस्य कपालिका नीला भवे
ति एवं क्रमेण परमाणावपि पाकसिद्धिः अन्यज्जले तेजःपरमाणुरूपमभिन्नं रूपं सहेतुकं जन्यमर्थः रसं निरूपयति ०२
मु॰व॰ २०६ रसस्तु रसनाग्राह्यो मधुरादिरनेकधा सहकारी रसज्ञाया नित्यतादि च पूर्ववत्॥ सहकारी रासनप्रत्यक्षे रसः का
रणमित्यर्थः पूर्ववत् जलपरमाणौ रसो नित्यः अन्यः सर्वोऽप्यनित्य इत्यर्थः॥ गन्धं निरूपयति ᳵ घ्राणस्यैवोपका घ्राणग्राह्यो
रकः सौरभश्चासौरभश्च स द्वेधा परिकीर्तितः॥ उपकार इति घ्राणजन्यप्रत्यक्षे कारणमित्यर्थः सर्वोऽपि गन्धोऽनि भवेद्गन्धो
०५ त्य एव स्पर्शं निरूपयति स्पर्शस्त्वगिन्द्रियग्राह्यस्त्वचः स्यादुपकारकः॥ उपकारक इति स्पार्शनप्रत्यक्षे स्पर्शः कार
णमित्यर्थः॥ अनुष्णाशीतशीतोष्णभेदात्स त्रिविधो मतः काठिन्यादि क्षितावेव नित्यतादि च पूर्ववत्॥ पृथिवीवाय्वोः
स्पर्शोऽनुष्णाशीतः जलस्पर्शः शीतः तेजःस्पर्श उष्णः कठिनसुकुमारस्पर्शौ पृथिव्यामेवेत्यर्थः कठिनत्वादिकं तु न संयो
गगतो जातिविशेषः चक्षुर्ग्राह्यतापत्तेः पूर्ववत् जलतेजोवायुपरमाणुस्पर्शो नित्यः तद्भिन्नस्पर्शास्त्वनित्या इत्यर्थः ०३
एतेषां पाकजत्वं तु क्षितौ नान्यत्र कुत्रचित्॥ एतेषां रूपरसगन्धस्पर्शानां पृथिव्यां हि रूपरसगन्धस्पर्शपरावृत्तिर
ग्निसंयोगादुपलभ्यते नहि शतधापि ध्मायमाने जले रूपादिकं परावर्तते नीरसौरभ्यमौष्ण्यं चान्वयव्यतिरेका मु॰ सृष्टं
भ्यामौपाधिकमेवेति निर्णीयते पवनपृथिव्योः शीतस्पर्शादिवत्॥ तज्ञायिपरमाणोः स्यात्पाको वैशेषिके नये ५॰

तत्रापि पृथिव्यामपि परमाणावेव पाक इति वैशेषिका वदंति तेषामयमाशयः अवयविनावष्टब्धेष्ववयवेषु
पाको न संभवति परं तु वह्निसंयोगेनावयविषु विनष्टेषु स्वतंत्रेषु परमाणुषु पाकः पुनश्च पक्वपरमाणुसंयो
गाद्द्व्यणुकादिक्रमेण पुनर्महावयविपर्यन्तमुत्पत्तिः तेजसामतिशयितवेगवशात्पूर्वव्यूहनाशोऽटिति जा अटू
ह्यांतरवैशद्यंचेति अथ द्व्यणुकादिविनाशमारभ्य कतिभिः क्षणैः पुनरुत्पद्य रूपादिमद्भवतीति शिष्यबुद्धिवै
शद्याय प्रक्रिया तत्र विभागजविभागानङ्गीकारे नवक्षणा तदंगीकारे तु विभागः किंचित्सापेक्षो विभागजन
येत् निरपेक्षस्य तस्य कर्मत्वं स्यात् तत्र संयोगविभागयोर्निरपेक्षं कारणं कर्मेति वैशेषिकं सूत्रम् सोत्तरभावि
भावानपेक्षत्वं तस्यार्थः अन्यथा कर्मणोऽप्युत्तरसंयोगजनने पूर्वसंयोगनाशापेक्षणादव्याप्तिः स्यादिति तत्र य
दि द्रव्यारम्भकसंयोगविनाशविशिष्टं कालमपेक्ष्य विभागजविभागः स्यात्तदा दशक्षणा अथ द्रव्यनाशविशि
ष्टं कालमपेक्ष्य विभागजविभागः स्यात्तदैकादशक्षणाः तथाहि अथ नवक्षणा वह्निसंयोगात्परमाणौ कर्म तत
ः परमाण्वंतरेण विभागस्ततः आरम्भकसंयोगनाशस्ततो द्व्यणुकनाशस्ततः परमाणौ श्यामादिनाशस्त।
तो रक्ताद्युत्पत्तिः ततो द्रव्यारम्भानुगुणा क्रिया ततो विभागस्ततः पूर्वसंयोगनाशस्तत आरम्भकसंयोगस्ततो
द्व्यणुकोत्पत्तिस्ततो रूपाद्युत्पत्तिः ननु श्यामादिनाशक्षणे रक्तोत्पत्तिक्षणे वा परमाणौ द्रव्यारम्भानुगुणा क्रि
यास्त्विति चेन्न अग्निसंयुक्ते परमाणौ उत्पन्नकर्मणस्तद्विनाशमन्तरेण गुणोत्पत्तिमन्तरेण च तत्र परमाणौ क्रिया

27

न्नत्वभावात् कर्मवति कर्मान्तरानुत्पत्तेः निर्गुणे द्रव्ये द्रव्यारम्भानुगुणक्रियानुपपत्तेश्च तथापि परमाणौ श्या
मादिनिवृत्तिसमकालं रक्ताद्युत्पत्तिः स्यादिति चेन्न एवं द्व्यणुकादिध्वंसस्यापि द्व्यणुकान्तरे हेतुत्वादिति नवक्षणा अ
मु॰ व॰ ष्टदशक्षणा सा चारम्भकसंयोगविनाशविशिष्टं कालमपेक्ष्य विभागेन विभागजनने सति स्यात् तथा हि
२८ वह्निसंयोगात् द्व्यणुकारम्भके परमाणौ कर्म ततो विभागस्ततस्त्वारम्भकसंयोगनाशस्ततो द्व्यणुकनाश
विभागजविभागौ ततः श्यामनाशपूर्वसंयोगनाशौ ततो रक्तोत्पत्त्युत्तरसंयोगौ ततो वह्निनोदनजन्यपरमा
णुकर्मनाशस्ततोऽदृष्टवदात्मसंयोगाद् द्रव्यारम्भानुगुणक्रिया ततो विभागस्ततः पूर्वसंयोगनाशस्तत
शि स्त्वारम्भकसंयोगस्ततो द्व्यणुकोत्पत्तिस्ततो रक्तोत्पत्तिः अथैकादशक्षणा वह्निसंयोगात् परमाणौ कर्म ततो विभा
गस्ततो द्रव्यारम्भकसंयोगनाशस्ततो द्व्यणुकनाशस्ततो द्व्यणुकनाशविशिष्टं कालमपेक्ष्य विभागजविभा
गश्यामनाशौ ततः पूर्वसंयोगनाशरक्तोत्पत्ती तत उत्तरदेशसंयोगस्ततो वह्निनोदनजन्यपरमाणुकर्मनाशः।
स्ततोऽदृष्टवदात्मसंयोगाद् द्रव्यारम्भानुगुणक्रिया ततो विभागस्ततः पूर्वसंयोगनाशस्ततो द्रव्यारम्भकसंयो
गस्ततो द्व्यणुकं ततो रक्ताद्युत्पत्तिः मध्यमशक्षावदेकस्मादग्निसंयोगाद्रूपनाशरक्तोत्पत्ती तावत्कालमेक २८
स्याग्नेरस्थिरत्वात् किञ्च नाशकस्यैव यद्युत्पादकत्वे दाहनष्टरूपादावग्निनाशे नीरूपमेव परमाणुः स्यात्।
उत्पादकस्यैव नाशकत्वे दारक्तोत्पत्तौ तदग्निनाशे रक्तेतररूपानुत्पत्तिः स्यात् अथ परमाणौ तत्तरे कर्मणि च न नान्यच समाप्ति

द्व्यणुकेपिगुणोत्पत्तिः तथाहि एकत्रपरमाणौकर्म ततो विभागस्ततस्तदारम्भकसंयोगनाशपरमाण्वन्तरकर्मणी ततो
द्व्यणुकनाशः परमाण्वन्तरकर्मजो विभागश्च इत्येकः कालस्ततः श्यामादिनाशो विभागाच्च पूर्वसंयोगनाश इत्येकः
कालः ततो रक्तोत्पत्तिर्द्रव्यारम्भकसंयोग इत्येकः कालः अथ द्व्यणुकोत्पत्तिरथ रक्तोत्पत्तिरिति पञ्चक्षणा द्रव्य
नाशसमकालपरमाण्वन्तरे कर्मचिन्तनात्षट्क्षणोत्पत्तिः तथाहि परमाणुकर्मणा परमाण्वन्तरविभाग
स्ततस्तदारम्भकसंयोगनाशस्ततो द्व्यणुकनाशपरमाण्वन्तरकर्मणी अथ श्यामादिनाशः परमाण्वन्तरे कर्मजा।
विभागश्च ततो रक्तोत्पत्तिः परमाण्वन्तरे पूर्वसंयोगनाशश्च ततः परमाण्वन्तरसंयोगस्ततो द्व्यणुकोत्पत्तिः अथ
रक्तोत्पत्तिरिति एवं श्यामनाशद्व्यणुकपरमाण्वन्तरकर्मचिन्तनात्सप्तक्षणा तथाहि परमाणौ कर्म ततः परमा
ण्वन्तरविभागस्ततस्तदारम्भकसंयोगनाशस्ततो द्व्यणुकनाशस्ततः श्यामनाशपरमाण्वन्तरकर्मणी ततो र
क्तोत्पत्तिः परमाण्वन्तरकर्मजविभागश्च ततः परमाण्वन्तरपूर्वसंयोगनाशस्ततः परमाण्वन्तरसंयोगस्त।
तो द्व्यणुकोत्पत्तिः ततो रक्तोत्पत्तिरिति एवं रक्तोत्पत्तिसमकालपरमाण्वन्तरकर्मचिन्तनादष्टक्षणा तथा
नैयायिकानां तु नये द्व्यणुकादावपीष्यते नैयायिकानां मते द्व्यणुकादावयविन्यपि पाको भवति तेषामयमा
शयः अवयविनां सच्छिद्रत्वाद्वह्नेः सूक्ष्मावयवैरन्तः प्रविष्टैरवयवेष्ववष्टब्धेष्वपि पाको न विरुध्यते अनन्तावय
वितन्नाशकल्पने गौरवं च इत्थं च सोयं घट इत्यादिप्रत्यभिज्ञापि संगच्छते यत्र तु न प्रत्यभिज्ञा तत्रावयविनाशो

28 पिसीक्रियतइति॰ संख्यांनिरूपयति गणनाव्यवहारेतुहेतुःसंख्याभिधीयते॰ गणनाव्यवहारासाधारणकारणं
संख्येत्यर्थः॰ नित्येषुनित्यमेकत्वमनित्येनित्यमिष्यते द्वित्वादयःपरार्द्धान्ताअपेक्षाबुद्धिजामताः अनेका।
मु.व. श्रयपर्याप्ताएतेतुपरिकीर्तिताः॰ नित्येषुपरमाण्वादिषुएकत्वंनित्यम् अनित्येघटादावेकत्वमनित्यमित्य
र्थः द्वित्वादयोव्यासज्यवृत्तिसंख्याअपेक्षाबुद्धिजन्याः अनेकेतियद्यपिद्वित्वादिसेवयःप्रत्येकंघटादाव
२८ पिवर्ततेतथापिएकोद्वावितिप्रत्ययाभावात् एकोनद्वावितिप्रत्ययसद्भावाच्चद्वित्वादीनांपर्याप्तिलक्षणःक
श्चित्सम्बन्धोनेकाश्रयोभ्युपेयते॰ अपेक्षाबुद्धिनाशाच्चतेषांनाशोनिरूपितः॰ प्रथममपेक्षाबुद्धिस्ततोद्वित्वो
त्पत्तिस्ततोविशेषणज्ञानंद्वित्वनिर्विकल्पकं ततोद्वित्वत्वविशिष्टप्रत्यक्षमपेक्षाबुद्धिनाशश्चततोद्वित्वनाश
इति यद्यपिज्ञानानांद्वित्वक्षणमात्रस्थायित्वंयोग्यविभुविशेषगुणानांस्वोत्तरवृत्तिगुणनाश्यत्वात्तथापि अपे
क्षाबुद्धेस्त्रिक्षणावस्थायित्वंकल्प्यते अन्यथानिर्विकल्पककालेऽपेक्षाबुद्धिनाशादनन्तरंद्वित्वस्यैवनाशः
स्यात् नतुद्वित्वप्रत्यक्षंतदानींविषयाभावात् विद्यमानस्यैवविषयस्यचक्षुरादिनाज्ञानजननोपगमात् त
स्माद्द्वित्वप्रत्यक्षादिकमपेक्षाबुद्धेर्नाशकंकल्प्यते नचापेक्षाबुद्धिनाशात्कथंतन्नाशइतिवाच्यम् कालान्त
रेद्वित्वप्रत्यक्षाभावात् अपेक्षाबुद्धिस्तदुत्पादिकातन्नाशात्तन्नाशइतिकल्पनात् अतएवतत्पुरुषीयापेक्षा २८
बुद्धिजन्यद्वित्वादिकंतेनैवगृह्यतइतिकल्प्यते नचापेक्षाबुद्धेर्द्वित्वप्रत्यक्षेकारणत्वमस्त्वितिवाच्यम् ला

त्वेवेन द्वित्वं प्रत्येव कारणत्वस्योचितत्वात् ॥ अतीन्द्रिये द्व्यणुकादावपेक्षाबुद्धिर्योगिनाम् ॥ अतीन्द्रिये सर्गादिका
लीनद्व्यणुकादावीश्वरीयापेक्षाबुद्धिः ब्रह्माण्डान्तरवर्तियोगिनामपेक्षाबुद्धिर्वा द्वित्वादिकारणमिति ॥ अपे
क्षाबुद्धिः केत्यत आह ॥ अनेकैकत्वबुद्धिर्या सापेक्षाबुद्धिरिष्यते ॥ अयमेकः अयमेकः इत्याकारिकेत्यर्थः ॥ परिमा
णं निरूपयति ॥ परिमाणं भवेन्मानव्यवहारस्य कारणम् ॥ अणु दीर्घं महद्ध्रस्वमिति तद्भेद ईरितः ॥ परिमितिः ।
व्यवहारासाधारणं कारणं परिमाणमित्यर्थः ॥ तच्चतुर्विधम् ॥ अणु महद्दीर्घं ह्रस्वं च ॥ इदं चातुर्विध्यमध्य
क्षसिद्धम् ॥ अणुत्वह्रस्वत्वे समनियते महत्त्वदीर्घत्वे समनियते ॥ अनित्ये तदनित्यं स्यान्नित्ये नित्यमिहेष्यते
१० संख्यातः परिमाणाच्च प्रचयादपि जायते ॥ अनित्ये तत्परिमाणम् ॥ नित्यमित्यत्र परिमाणमित्यनुषज्यते
जायते इत्यत्रापि परिमाणमित्यनुवर्तते ॥ अनित्यमिति पूर्वेणान्वेति ॥ तथा चानित्यं परिमाणं संख्याजन्यं प
रिमाणजन्यं प्रचयजन्यं चेत्यर्थः ॥ तत्र संख्याजन्यमुदाहरति ॥ द्व्यणुकादौ तु संख्याजन्यमुदाहृतम् ॥ ११ ॥ द्व्य
णुकस्य त्रसरेणोश्च परिमाणं प्रति परमाणुपरिमाणं द्व्यणुकपरिमाणं वा न कारणम् ॥ परिमाणस्य स्व ।
समानजातीयोत्कृष्टपरिमाणजनकत्वात् ॥ द्व्यणुकस्य परिमाणं तु परमाणावणुत्वपरिमाणापेक्षया नो
त्कृष्टम् ॥ त्रसरेणुपरिमाणं तु न सजातीयमतः परमाणोर्द्वित्वसंख्या द्व्यणुकपरिमाणस्य द्व्यणुके त्रित्व
संख्या च त्रसरेणुपरिमाणस्यासमवायिकारणमित्यर्थः ॥ परिमाणजन्यपरिमाणमुदाहरति ॥ परिमा ।

29

मु॰ व॰
२६

णोच्चयादौ न परिमाणजनकत्वेनोच्चयादि परिमाणं कपालादि परिमाणजन्यम्॰ प्रचयजन्यन्तु दाहेऽपि प्रचयं नि
वृत्ति प्रचयः शिथिलाख्यावयवसंयोगस्तेन जन्यते परिमाणं तूलकादौ नाशस्त्वाश्रयनाशात्॰ नाश इति श्र
यपरिमाणस्य नचावयविनाशः कथं परिमाणनाशकः सत्यप्यवयविनि त्रिचतुरादि परमाणुविश्लेषेण त
दुपचये वावयविनः प्रत्यभिज्ञाने परिमाणान्तरस्य प्रत्यक्षसिद्धत्वादिति वाच्यम् परमाणुविश्लेषे हि द्व्यणु
कस्य नाशोऽवश्यमभ्युपेयस्ततस्त्र्यणुकनाशः एवं क्रमेण महावयविनो नाशस्यावश्यकत्वात् सति च नाश
केऽनभ्युपगममात्रेण नाशस्यापलपितुमशक्यत्वात् कुर्वीतादाववयवोपचयेऽसमवायिकारणनाशस्याव
श्यकत्वादवयविनाशस्यावश्यकः नच पटाविनाशेऽपि तन्त्वन्तरसंयोगात्परिमाणाधिक्यं न स्यादिति वाच्यम्
तत्रापि वेमाद्यभिघातेन नासमवायिकारणतन्तुसंयोगनाशात्पटनाशस्यावश्यकत्वात् किंच तन्त्वन्तरस्य
तत्पटावयवत्वे पूर्वं तत्पटं न स्यात् तत्तन्त्वन्तररूपकारणाभावात् तन्तोरवयवत्वाभावे च न तेन परिमाणा
धिक्यं संयुक्तद्रव्यान्तरवत् तस्मात्तन्त्वन्तरसंयोगे सति पूर्वपटनाशस्ततः पटान्तरोत्पत्तिरिति अवशं सौ
कार्यमवयविनः प्रत्यभिज्ञानं तु साजात्येन दीपकलिकावत् नच पूर्वतन्तुवपवन्तन्त्वन्तरसहकारात्पूर्व
पटे सत्येव पटान्तरमारम्भतामिति वाच्यम् मूर्तयोः समानदेशताविरोधात् तत्र पटद्वयासम्भवात् एक २६
दा नानाद्रव्यस्य तत्रानुत्पत्तिसम्भवोपि तत्त्वात् पूर्वद्रव्यस्य प्रतिबन्धकस्य विनाशे द्रव्यान्तरोत्पत्तिरित्यवश्यम

मुपेयत्वात्॥ पृथक्त्वं निरूपयति संख्यावत्तु पृथक्त्वं स्यात्पृथक्प्रत्ययकारणम्॥ पृथक्प्रत्ययासाधारणकार।
णं पृथक्त्वम् नित्यतादिकं संख्यावत् यथा नित्येष्वेकत्वं नित्यमनित्येष्वनित्यमेकत्वं तु आश्रयद्वि
तीयक्षणोत्पद्यते आश्रयनाशान्नश्यति तथैकपृथक्त्वमपि द्वित्वादिवत् द्विपृथक्त्वादिकमपीत्यर्थः।
नन्वयमस्मात्पृथगित्यादावन्योन्याभावो भासते तत्कथं पृथक्त्वं गुणान्तरं स्वीक्रियत इति नचात्रास्तु पृथ
क्त्वं नत्वन्योन्याभाव इति वाच्यम् रूपं न घट इति प्रतीत्यनापत्तेः नहि रूपे घटावधिकं पृथक्त्वं गुणान्तरमस्ति
न वा घटे रूपावधिकं पृथक्त्वमस्ति येन परंपरासम्बन्धः कल्प्यत इत्यत आह॥ अन्योन्याभावतो नास्य च
रितार्थत्वमिष्यते अस्मात्पृथगिदं नेति प्रतीतिर्हि विलक्षणा॥ नञ्शब्दे वैलक्षण्यमेव न तत्त्वर्थे वैलक्षण्यमि
ति चेन्न विनार्थभेदं शब्दात्पृथगिति वक्तुं न पदं इत्यत्रापि पंचमी स्यात् तस्मात् सदर्थकयोगे पंचमी सोऽर्थो नञ।
र्थान्योन्याभावतो भिन्नो गुणान्तरं कल्प्यत इति॥ संयोगं निरूपयति अप्राप्तयोस्तु या प्राप्तिः सैव संयोग ईरितः॥०३
तं विभजते॥ कीर्तितस्त्रिविधस्त्वेष आद्योऽन्यतरकर्मजः उभयस्पन्दजन्यो भवेत्संयोगजोऽपरः॥ पृथक्संयो
गः॥ आद्यः श्येनशैलादिसंयोगः परिकीर्तितः मेषयोः सन्निपातो यः स द्वितीय उदाहृतः कपालतरुसं
योगात्संयोगस्तरुकुम्भयोः तृतीयः स्यात्कर्मजोऽपि द्विधैव परिकीर्तितः अभिघातो नोदनं च शब्दहेतुरि
हादिमः शब्दाहेतुर्द्वितीयः स्यात्॥ सन्निपातः संयोगः द्वितीय उभयकर्मजः तृतीयः संयोगजसंयोग इत्य

०५

30

मु॰व॰ ३

धिः तृतीयः स्यादिति पूर्वेणान्वयः आदिममभिधत्ते द्वितीयो नोदनाख्यः संयोग इति विभक्तप्रत्ययासाधारणं
कारणं विभागस्तन्निरूपयति विभागोऽपि त्रिधा भवेत् एककर्मोद्भवस्त्वाद्यो द्वयकर्मोद्भवोऽपरः विभागजस्तृ
तीयः स्यात्तृतीयोऽपि द्विधा भवेत् हेतुमात्रविभागोत्थो हेत्वहेतुविभागजः ॥६॥ तदुदाहरणं श्येनशैलविभा
गादिकं स्वयं बोध्यम् तृतीयोऽपि विभागजः कारणमात्रविभागजन्यः कारणाकारणविभागजन्यश्चेति
आद्यस्तावद्यत्र कपाले कर्म ततः कपालद्वयविभागस्ततो द्रव्यारम्भकसंयोगनाशस्ततो द्रव्यनाशस्तेनैव कपा
लविभागेन सकर्मणः कपालस्याकाशादिविभागो जन्यते ततस्त्वाकाशादिसंयोगनाशः तत उत्तरदेशसं
योगस्ततः कर्मनाश इति न च तेनैव कर्मणा कथं देशान्तरविभागो न जन्यत इति वाच्यम् एकस्य कर्मणा आ
रम्भकसंयोगप्रतिद्वन्द्विविभागजनकत्वस्यानारम्भकसंयोगप्रतिद्वन्द्विविभागजनकत्वस्य च विरोधात्
अन्यथा विकसत्कमलकुड्मलभङ्गप्रसङ्गात् तस्माद्यदीदमनारम्भकसंयोगप्रतिद्वन्द्विविभागं जनयेत्
तदारम्भकसंयोगप्रतिद्वन्द्विविभागं न जनयेत् न च कारणविभागेनैव द्रव्यनाशात्पूर्वं कुतो देशान्तर
विभागो न जन्यत इति वाच्यम् आरम्भकसंयोगप्रतिद्वन्द्विविभागवतोऽवयवस्य सति द्रव्ये देशान्तरविभा
गासम्भवात् द्वितीयस्तावत् यत्र हस्तक्रियया हस्ततरुविभागस्ततः शरीरेऽपि विभक्तप्रत्ययो भवति तत्र च ३
शरीरतरुविभागो हस्तक्रिया न कारणं व्यधिकरणत्वात् शरीरे तु क्रिया नास्त्येव अवयविकर्मणो यावद

वयवकर्मनियतत्वात् अतस्तत्र कारणाविभागोनु कार्याकार्यविभागोजन्यत इति अत एव विभागो गुणान्तरम् अन्य
थाशरीरे विभक्तप्रत्ययो न स्यात् अतः संयोगनाशेन विभागो नान्यथासिद्धो भवति॥ परापरव्यवहारनिमित्ते परत्वा
परत्वे निरूपयति परत्वं चापरत्वं च द्विविधं परिकीर्तितम् दैशिकं कालिकं चापि मूर्त एव तु दैशिकम् परत्वं दे
शसंयोगभूयस्त्वज्ञानतो भवेत् अपरत्वं तदल्पत्वबुद्धितः स्यादितीरितम्॥२२ दैशिकपरत्वं बहुतरदेशसंयो
गान्तरितत्वज्ञानादुत्पद्यते एवं तदल्पीयस्त्वज्ञानादपरत्वमुत्पद्यते अत्रावधित्वार्थं पञ्चम्यपेक्षा यथा पाटलि
पुत्रात्काशीमपेक्ष्य प्रयागः परः उरूहेत्रमपेक्ष्य प्रयागोऽपर इति॥ तयोरसमवायी तद्दिक्संयोगस्तदाश्रये॥ त
योर्दैशिकपरत्वापरत्वयोरसमवायी असमवायिकारणम् तदाश्रये दैशिकपरत्वापरत्वाश्रये॥ दिवाक
रपरिस्पन्दभूयस्त्वज्ञानतो भवेत्॥२३ परत्वमपरत्वं तु तदीयाल्पत्वबुद्धितः अत्रत्वसमवायी स्यात्संयोगः॥
कालपिण्डयोः॥२४ अत्र परत्वापरत्वे च कालिके ग्राह्यम् यस्य सूर्यपरिस्पन्दापेक्षया यस्य सूर्यपरिस्पन्दो॥
धिकः स ज्येष्ठः यस्य न्यूनः स कनिष्ठः कालिकपरत्वापरत्वे जन्यद्रव्येष्वेव अत्र कालिकपरत्वापरत्वयोः॥ ०७
अपेक्षाबुद्धिनाशेन तेषां नाशो निरूपितः इति॥ कालिकदैशिकपरत्वापरत्वानाम् क्रमप्राप्तां बुद्धिं निरूपय
ति बुद्धेः प्रपञ्चः प्रागेव प्रायशो विनिरूपितः २५ अथावशिष्टोऽप्यपरः प्रकारः परिदर्श्यते अप्रमा च प्रमा चे
ति ज्ञानं द्विविधमिष्यते॥२६ तत्राप्रमां निरूपयति तच्छून्ये तन्मतिर्या स्यादप्रमा सा निरूपिता॥ तदभाववति

तत्प्रकारकंज्ञानंभ्रमइत्यर्थः॥ तत्रायंचविपर्यासःसंशयोपिप्रकीर्तितः॥ तत्प्रपंचः अप्रमाप्रपंचः॥ आद्योदेहेआ
त्मबुद्धिःशंखादौपीततामतिः भवेन्निश्चयरूपासा॥ आद्योविपर्यासइत्यर्थः॥ शरीरादौनिश्चयरूपंयदात्मत्वप्रका
रकंज्ञानंगौरोहमित्याकारकम् एवंशंखादौपीतःशंखःइत्याकारकंयज्ज्ञानंनिश्चयरूपंतद्भ्रमइत्यर्थः॥ संश
मु.वृ. योथप्रदर्श्यते २९ किंस्विन्नरोवास्थाणुर्वेत्यादिबुद्धिस्तुसंशयः॥ किंस्विदितिवितर्केनिश्चयलक्षणमाह ५
३१ तदभावाप्रकाराधीस्तत्प्रकारातुनिश्चयः॥ तदभावाप्रकारकंतत्प्रकारकंज्ञानंनिश्चयइत्यर्थः॥ संशयंल
क्षयति॥ समःसंशयोमतिर्यास्यादेकत्राभावभावयोः॥ एकधर्मिकविरुद्धभावाभावप्रकारकंज्ञानंसंशयइत्य
र्थः॥ साधारणादिधर्मस्यज्ञानंसंशयकारणम्॥३०॥ उभयसाधारणोयोधर्मस्तज्ज्ञानंसंशयकारणम् यथा
उच्चैस्तरत्वंस्थाणुपुरुषसाधारणंज्ञात्वायंस्थाणुर्नवेतिसंदिग्धे एवमसाधारणधर्मज्ञानमपिकारणम्
यथाशब्दत्वंनित्यानित्यव्यावृत्तमपिशब्दे गृहीत्वाशब्दोनित्योनवेत्यादिसंदिग्धे वि प्रतिस्तुशब्दोनित्योनवेत्यादि
शब्दात्मिकानसंशयकारणंशब्दव्याप्तिज्ञानादीनांनिश्चयमात्रजनकत्वस्वाभाव्यात् किंतुतत्रशब्देनको
टिद्वयज्ञानेजन्यते संशयस्तुमानसएवेति एवंज्ञानेप्रामाण्यसंशयाद्विषयसंशयइति एवंव्याप्यसंश
यादपिव्यापकसंशयइत्यादिकंबोध्यम् किंतुसंशयेधर्मिज्ञानंधर्मीन्द्रियसन्निकर्षोवाकारणमिति ३ ३१
दोषोप्रमायाजनकःप्रमायास्तुगुणोभवेत्॥ अप्रमांप्रतिदोषःकारणम् प्रमांप्रतितुगुणाःकारणम्॥

अत्रापि पित्तादिदोषाणामननुगतात्तेषां कारणत्वमन्वयव्यतिरेकादेव सिद्धं गुणस्य प्रमाजनकत्वे तु अनुमाना
त्सिद्धम् यथा प्रमा ज्ञानसामान्यकारणभिन्नकारणजन्या जन्यज्ञानत्वादप्रमावत् नच दोषाभाव एव कार
णमस्त्विति वाच्यम् पीतः शंखः इति ज्ञानस्थले पित्तदोषसत्त्वाच्छ्वेतप्रमानुत्पत्तिप्रसङ्गात् विनिगमना
विरहादनन्तदोषाभावकारणत्वमपेक्ष्य गुणकारणताया न्याय्यत्वाच्च नच गुणसत्त्वेपि पित्तेन प्रतिबन्धा-
च्छंखे न श्वेतत्वज्ञानमतः पित्तादिदोषाभावानां कारणत्वमवश्यं वाच्यम् तथाच किं गुणस्य हेतुत्वकल्पनेने
ति वाच्यम् तथाप्यन्वयव्यतिरेकाभ्यां गुणस्यापि हेतुत्वसिद्धेः एवं भ्रमं प्रति गुणाभावः कारणमित्य-
स्यापि सुवचत्वात् ननु दोषाः के इत्याकाङ्क्षायामाह पित्तदूरत्वादिरूपो दोषो नानाविधो मतः क्वचित्पी
तादिभ्रमे पित्तदोषः क्वचिच्चन्द्रादेः स्वल्पपरिमाणत्वग्रहे दूरत्वदोषः क्वचिद्वंशोरगभ्रमे मण्डूकवसाञ्ज
नमित्येवं दोषाणामननुगतत्वादेव भ्रान्तिजनका इत्यर्थः अथ के गुणा इत्याशंकायां प्रत्यक्षादौ क्रमेण गु
णान्दर्शयति प्रत्यक्षे तु विशेष्येण विशेषणवता समम् सन्निकर्षो गुणस्तु स्यात् प्रत्यक्षे विशेषणवद्विशे
ष्यसन्निकर्षो गुणः अथ त्वनुमितौ पुनः पक्षे साध्यविशिष्टे तु परामर्शो गुणो भवेत् अनुमितौ साध्यवति
साध्यव्याप्यवैशिष्ट्यज्ञानं गुणः एवमग्रेपि ज्ञेयम् शक्ये सादृश्यबुद्धिस्तु भवेदुपमितौ गुणः शाब्दबोधे योग्य
तायास्तात्पर्यस्यार्थस्य वा प्रमा गुणः स्यात् अप्रमा त्रिधा ? भ्रमोभिन्ने तु ज्ञानमत्रोच्यते प्रमा नन्वयं यत्र प्रमाणं स्यात्।
७० ७३

32
रजतेत्वयोरिमेरजतेइतिज्ञानेज्ञातेनरजतत्वांशेपिप्रमात्वंस्यात् तत्रज्ञानस्यभ्रमभिन्नत्वाभावात् अतआह अ
थवातत्प्रकारकंयज्ज्ञानंतद्विशेष्यकम् तत्प्रमा नतुतद्विशेष्यकत्वेसतितत्प्रकारकंज्ञानंप्रमेत्यर्थः अथैवं
स्यरनेवपिप्रमात्वंस्यात्ततः किमितिचेन्नयासतितत्प्रकारकत्वस्यापिप्रमाणान्तरत्वस्यादितिचेन्न यथार्थानुभ
मु·वः वकरणस्यैवप्रमाणत्वेनविवक्षितत्वात् इदंनवाच्यम् येनसम्बन्धेनतद्वत्तातेनसम्बन्धेनतद्विशेष्यकत्व
३२ तेनसम्बन्धेनतत्प्रकारकत्वंवाच्यम् तेनकपालादौसंयोगादिनाघटादिज्ञानेनातिव्याप्तिः एवंसतिनि
र्विकल्पकंप्रमानस्यात् तस्यसप्रकारकत्वाभावादतआह नप्रमानापिभ्रमःस्यान्निर्विकल्पकम् ३५
प्रकारतादिशून्यंहिसंबंधानवगाहितत् ननुवृक्षेकपिसंयोगज्ञानंभ्रमःप्रमाचस्यादितिचेन्न प्रतियो
गिव्यधिकरणसंयोगाभाववतिसंयोगज्ञानस्यभ्रमत्वात् नचकपिसंयोगाभावावच्छेदकावच्छेदेनसंयो
गज्ञानंभ्रमोनस्यात् तत्रसंयोगाभावस्यप्रतियोगिसमानाधिकरणत्वादितिवाच्यम् तत्रसंयोगाभावाव
च्छेदकावच्छेदेनसंयोगज्ञानस्यभ्रमत्वात् लक्षणस्याननुगमात्लक्षणाननुगमेपिनक्षतिः प्रमात्वंनस्वतो
ग्राह्यंसंशयानुपपत्तितः मीमांसकमतेप्रमात्वंस्वतोग्राह्यमिति तत्रगुरुमतेज्ञानस्यस्वतःप्रकाशरूपत्वा
त्तज्ज्ञानप्रामाण्यंतेनैवगृह्यतइति भट्टानांमतेज्ञानमतीन्द्रियंज्ञानजन्याज्ञाततात्प्रत्यक्षानयाचज्ञानमनु ३२
मीयते मुरारिमिश्रमतेअनुव्यवसायेनज्ञानंगृह्यतेसर्वेषांमतेपितज्ज्ञानविषयकज्ञानेनतज्ज्ञानप्रामाण्यं

गृह्यते विषयनिरूपणं हि ज्ञानमतो ज्ञानवित्तिवेद्यो विषयः तथा च ज्ञाने गृह्यमाणे तत्र घटत्वप्रकारकत्वं
गृह्यते इति तद्वाप्यनुमतम् तथा च सति घटविशेष्यकत्वं ज्ञाते न गृह्यते विशेष्ये घटत्ववैशिष्ट्यस्याग्रही
त्ववद् तत्वात् घटविशेष्यकत्वग्रहे बाधकाभावादिति तन्मतं दूषयति न स्वतो ग्राह्यमिति संशयेति यदि ज्ञा
नस्य प्रामाण्यं स्वतो ग्राह्यं स्यात्तदानभ्यासदशायां ज्ञाने प्रामाण्यसंशयो न स्यात् तत्र हि यदि ज्ञानं ज्ञा
तं तदा तन्मते प्रामाण्यं ज्ञातमेवेति कथं संशयः यदि च ज्ञानं न ज्ञातं तदा धर्मिज्ञानाभावात्कथं संशय
स्तस्माज्ज्ञाने प्रामाण्यमनुमेयम् तथा हि इदं ज्ञानं प्रमा संवादिप्रवृत्तिजनकत्वात् यन्नैवं तन्नैवं य
था प्रमा इदं पृथिवीत्वप्रकारकं ज्ञानं प्रमा गन्धवति पृथिवीत्वप्रकारकज्ञानत्वात् एवमिदं जलत्व
प्रकारकं ज्ञानं प्रमा स्नेहवति जलत्वप्रकारकं ज्ञानत्वादित्यर्थं तत्र प्रामाण्यग्रहो वाच्यः सोप्यनुमित्वेन
देशेतिफलमनुस्वीकारणामनुस्वीचानवस्थेति चेन्न अगृहीताप्रामाण्यकज्ञानस्यैव तिस्मुय न च हेतु
ज्ञाने कथं ज्ञातमिति वाच्यम् पृथिवीत्वप्रकारकत्वस्य स्वतो ग्राह्यत्वात् तत्र गन्धग्रहे गन्धवद्विशेष्य
कत्वस्यापि स्वग्रहत्वात् तत्प्रकारकत्वावच्छिन्नतद्विशेष्यकत्वं परं न गृह्यते संशयानुरोधात् न च प्रमा
त्वस्य साध्यप्रसिद्धिः कथमिति वाच्यम् इदं ज्ञानं प्रमात्वस्य स्वतो ग्राह्यत्वात् न च प्रकारकभेदेन प्रामाण्य
भेदात् घटत्ववति प्रकारादेः कथं प्रसिद्धिरिति वाच्यम् घटत्वप्रकारकत्वस्य सविशेष्यकत्वस्य च स्वतो ग्रा

33 स्थत्वात् घटस्य चक्षुर्वैमुपस्थितत्वात् घटविशेष्यकं घटत्वप्रकारकमिति ज्ञाने बाधकाभावः व्यवसायेपरं
तत्वग्रहेपि तत्र संशयसामग्रीसत्वे संशयस्यैवोपपत्तेः किंचाभ्यासदशायां प्रमीयात्व्यवसायादिना प्रा
माण्यस्य स्वत एव ग्रहसम्भवात्प्रथमानुव्यवसाये एवं तत्प्रकारकत्वमिति कल्प्यते संशयानुरोधात् अ
न्या·व· थप्रामाण्यानुमितौ प्रामाण्याग्रहे तत्स्याविषयनिश्चयरूपत्वमतस्तद्ग्रहो वाच्यः सोप्यनुमित्यन्तरेणा
३२ एवं प्रामाण्यानुमितिजनकहेतुज्ञानादेर्विषयनिश्चयरूपत्वात् यत्रतु प्रामाण्यसंशयस्तत्रैव परं प्रा
माण्यानुमितेरपेक्षा यावदाशंकं प्रामाण्यानुमितिरिष्यत एव सर्वत्रतु न संशयः क्वचित्कोनुपस्थि
ते क्वचिद्विशेषदर्शनादितः क्वचिद्विषयांतरसंचारादिति संक्षेपः ननु सर्वेषां ज्ञानानां यथार्थत्वात् प्रा
मालक्षणे तद्वद्विशेष्यकत्वे विशेषणं व्यर्थम् नच रंगे रजतार्थिनः प्रवृत्तिर्भ्रमजन्या न स्यात् नव मते भ्र
मस्याभावादिति वाच्यम् तत्रहि दोषाधीनस्य पुरोवर्तिनि स्वतंत्रोपस्थितरजतभेदाग्रहस्य हेतुत्वात्
सत्यरजस्थले तद्विशिष्टज्ञानस्य सत्वात् तदेव कारणम् अस्तु वात्रापि रजतभेदाग्रह एव कारणम् न
चान्यथाख्यातिः संभवति रजतप्रत्यक्षकारणस्य रजतसन्निकर्षस्याभावात् रंगे रजतबुद्धेरनुपप
त्तेरिति चेन्न सत्यरजतस्थले प्रवृत्तिं प्रति विशिष्टज्ञानस्य हेतुतायाः क्लृप्तत्वात् अन्यत्रापि तत्कल्पना ३२
त् नच संवादिप्रवृत्तौ तत्कारणं विसंवादिप्रवृत्तौ तु भेदाग्रहः कारणमिति वाच्यम् लाघवेन प्रवृत्ति।

मोचेतस्यहेतुत्वकल्पनात् इदंचरङ्गे रजतत्वविशिष्टबुद्ध्यनुरोधेनज्ञानलक्षणाप्रत्यासत्तिकल्पनेपि
नक्षतिः फलमुखगौरवस्यादोषत्वात् किञ्चयत्ररङ्गरजतयोरिमेरजतेरङ्गे इतिवाज्ञानेज्ञातेतत्रन
कारणबाधोपि अपिचयत्ररङ्गरजतयोरिमेरजतरङ्गे इतिज्ञानंतत्रोभयत्रप्रवृत्तिनिवृत्तीस्यातां।
रङ्गे रंगभेदाग्रहेरजतेरजतभेदाग्रहेचव्यभिचारवारणभयात् तन्मतेरङ्गेरङ्गभेदाग्रहस्यरजतेरजतभेदा
ग्रहस्यचसत्वाद्दोषादेवंरंगेरजतेभेदाग्रहस्यरजतेरङ्गभेदाग्रहस्यचसत्वात् किंचानुमितिंप्रतिभेदा
ग्रहस्यहेतुत्वेपक्षेदेवह्निव्याप्यधूमवद्भेदाग्रहादनुमितिर्निराबाधा यदिचविशिष्टज्ञानंकारणंतदायो।
गोलकेवह्निव्याप्यधूमज्ञानमनुमित्यनुरोधादायातितेनेयमुभयतःपाशारज्जुः इदंचान्यथाख्यातौ।
प्रत्यक्षमेवप्रमाणंरंगेरजतत्वावेदिषमित्यनुव्यवसायादितिसंक्षेपः पूर्वंव्याप्तिरुक्तानतुग्रहोपायस्तनद
र्शितस्तंदर्शयति व्यभिचारास्याग्रहोयत्रसहचारग्रहस्तथा हेतुर्व्याप्तिग्रहेतर्कः क्वचिच्छंका।
निवर्तकः व्यभिचाराग्रहःसहचारग्रहश्चव्याप्तिग्रहेकारणमित्यर्थः व्यभिचारग्रहस्यव्याप्तिग्रहेप्रति
बन्धकत्वात्तदभावःकारणम् एवमन्वयव्यतिरेकाभ्यांसहचारग्रहस्यापिहेतुताभूयोदर्शनंतुनकारणं
व्यभिचारास्फूर्तौसकृद्दर्शनेपिक्वचिद्व्याप्तिग्रहात् क्वचिद्व्यभिचारशङ्काभूयस्तन्निवारणाभूयोदर्शनमुप
युज्यते यत्रतुभूयोदर्शनादपिशंकानापैतितत्रविपक्षबाधकतर्कोपेक्षितः तथाहि वह्निविरहेण

35

पि धूमः स्यादिति यद्याशंका भवति तदा सा वह्निधूमयोः कार्यकारणभावस्य प्रतिसन्धानान्निवर्तते यद्ययं व
ह्निमान्न स्यात्तदा धूमवान्न स्यात् कारणं विना कार्यानुपपत्तेः यदि च क्वचित्कारणं विनापि कार्यं भविष्य।
मु॰व॰ ति अहेतुकमेव वा भविष्यतीति तत्राप्याशंका भवेत्तदा सा व्याघातादपसारणीया यदि हि कारणं
३५ विना कार्यं स्यात्तदा धूमार्थं वह्नेस्तृप्त्यर्थं भोजनस्य नियमत उपादानं नैव स्यादिति यत्र स्वतएवाशंका।
नावतरति तत्र न तर्कापेक्षेति न चेदमनुकूलतर्कः क्वचिच्छंकानिवर्तक इति इदानीं परकीयव्याप्तिग्रहप्र
तिबन्धार्थमुपाधिं निरूपयति॥ साध्यस्य व्यापको यस्तु हेतोरव्यापकस्तथा स उपाधिर्भवेत्तस्य निष्क
र्षोयं प्रदर्श्यते साध्यत्वाभिमतव्यापकत्वे सति साधनत्वाभिमताऽव्यापकत्वमुपाधित्वमित्यर्थः ननु स श्या
मो मित्रातनयत्वादित्यत्र शाकपाकजत्वं नोपाधिः स्यात्तस्य साध्यव्यापकत्वाभावात् श्यामत्वस्य घटादा
वपि च सत्त्वात् तत्र शाकपाकजत्वाभावात् एवं वायुः प्रत्यक्षः प्रत्यक्षस्पर्शाश्रयत्वात् इत्यत्रोद्भूत
रूपवत्त्वं नोपाधिः स्यात्प्रत्यक्षत्वस्यात्मादावपि सत्त्वात् तत्र च रूपाभावात् एवं ध्वंसो विनाशी जन्यत्वा।
दित्यत्र भावत्वं नोपाधिः स्याद्विनाशित्वस्य प्रागभावे सत्त्वात् तत्र च भावत्वाभावादिति चेन्न यद्धर्मा
वच्छिन्नसाध्यव्यापकत्वं तद्धर्मावच्छिन्नसाधनाव्यापकत्वमित्यर्थे तात्पर्यात् मित्रातनयत्वावच्छि ३५
न्नश्यामत्वस्य व्यापकं शाकपाकजत्वमेव एवं बहिर्द्रव्यत्वावच्छिन्नप्रत्यक्षत्वस्य व्यापकमुद्भूतरूप

वत्वेवह्निर्द्रव्यत्वावच्छिन्नसाधनस्याव्यापकेच एवंध्वंसोविनाशीजन्यत्वात् इत्यत्रजन्यत्वावच्छिन्नसाध्या-
व्यापकत्वंभावत्वम् सद्धेतौतु एतादृशधर्मोनास्ति यदवच्छिन्नसाध्यस्याव्यापकंतदवच्छिन्नस्यसाधन
स्याचाव्यापकंकिंचित्स्यात् व्यभिचारिणितुयन्ननउपाध्यधिकरणंयत्साध्याधिकरणंयच्चोपाधिशू
न्यसाध्यव्यभिचारिनिरूपकमधिकरणंतदन्यतरत्वावच्छिन्नस्यसाध्यस्यव्यापकत्वंसाधनस्यचा-
व्यापकत्वमुपाधेःसंभवतीति अतएवलक्षणमप्युपाधिस्वरूपमेतदनुसारेणादर्शयति। सर्वेसाध्यस
मानाधिकरणाःस्युरुपाधयः हेतोरेकाश्रयेयेषांस्वसाध्यव्यभिचारिता स्वचसाध्यंचस्वस्वध्येनयो
व्यभिचारितेत्यर्थः उपाधेर्दूषकताबीजमाह व्यभिचारस्यानुमानमुपाधेस्तुप्रयोजनम् उपाधिव्य
भिचारेणहेतौसाध्यव्यभिचारानुमानमुपाधेःप्रयोजनमित्यर्थः तथाहि यत्रशुद्धसाध्यव्यापकउ
पाधिर्व्यभिचारेणहेतौसाध्यव्यभिचारानुमानमुपाधेःप्रयोजनमित्यर्थः तत्रशुद्धेनोपाधिव्यभि-
चारेणसाध्यव्यभिचारानुमानंयथाधूमवान्वह्नेरित्यादौवह्निर्धूमव्यभिचारी तद्व्यापकार्द्रेन्ध
नव्यभिचारित्वात् इतिव्यापकव्यभिचारिणाव्याप्यव्यभिचारावश्यकत्वात् यत्रतुकिंचिद्धर्मावा-
च्छिन्नसाध्यव्यापकउपाधिस्तत्रतद्धर्मवतिउपाधिव्यभिचारेणसाध्यव्यभिचारानुमानंयथासश्या-
मोमित्रातनयत्वादित्यादौमित्रातनयत्वेश्यामत्वव्यभिचारिमित्रातनयेशाकपाकजत्वव्यभिचारात्।

35 दिति वायावुद्भूतपदेन रक्तं साध्यव्यापकताग्राहकप्रमाणाभावात्साध्याव्यापकत्वाच्च नोपाधिः वायोर्नीत
पदेन रक्तं उपाधिर्भवत्येव यथा वह्निरनुष्णः कृतकत्वादित्यादौ प्रत्यक्षेण वह्नेरुष्णस्पर्शत्वग्रहे वह्नीतरत्व
मु॰व॰ ३५ मुपाधिः यत्र तूपाधेः साध्यव्यापकत्वादिकं संदिह्यते स संदिग्धोपाधिः पदेन रक्तं संदिग्धोपाधि
रपि नोद्भावनीयः कथकसंप्रदायानुरोधात् केचित्तु सत्प्रतिपक्षोत्थापनमुपाधिफलम् तथाहि
अयोगोलकं धूमवद्वह्नेरित्यादौ अयोगोलकं धूमाभाववदार्द्रेन्धनाभावादिति सत्प्रतिपक्षसम्भवात्
इत्थं च साधनव्यापकोऽपि कश्चिदुपाधिः यथा करका पृथिवी कठिनसंयोगवत्त्वादित्यादौ अनुष्णा
शीतस्पर्शवत्त्वम् न चात्र स्वव्याप्तिग्रहे वह्न्यरणमिति वाच्यम् सर्वत्रोपाये हेत्वसमानाधिकरण्यस्याद्भूयात्
अत्र च साध्यव्यापकः पक्षावृत्तिरुपाधिरिति वदन्ति ॥ शब्दोपमानयोर्नैव पृथक्प्रामाण्यमिष्यते अ
नुमानगतार्थत्वादिति वैशेषिकमतम् वैशेषिकाणां मते प्रत्यक्षमनुमानं च प्रमाणं शब्दोपमानयो
रनुमानविधयैव प्रामाण्यम् तथाहि दण्डेन गामानयेति पदानि वैदिकपदानि वा तात्पर्यविषय
स्मारितपदार्थसंसर्गप्रमापूर्वकाणि आकांक्षायोग्यतासत्तिमत्पदकदम्बत्वात् घटमानयेति प ३५
दकदम्बकवत् यद्वा एते पदार्था मिथः संसर्गवन्तः योग्यतादिमत्पदोपस्थापितत्वात् दृष्टपदार्था
नवत् दृष्टान्तेऽपि दृष्टान्तान्तरेण साध्यसिद्धिरिति एवं गवयव्यक्तिप्रत्यक्षानन्तरं गवयपदं गव

यत्रप्रवृत्तिनिमित्तकं असतितु अन्यंतरे रूढिः तत्र प्रयुज्यमानत्वात् असति हन्यन्तरे यद्यत्र रूढिः प्रयुज्यते तत्र तत
न्प्रवृत्तिनिमित्तकं यथा गोपदं गोत्वप्रवृत्तिनिमित्तकम् यद्वा गवयपदं तत्प्रवृत्तिनिमित्तकं साधुपदत्वादित्य
नुमानेन पदत्वधर्मिताव लाङ्गव यत्प्रवृत्तिनिमित्तकत्वं सिध्यति तन्मतं दूषयति तन्न सम्यगिति ना व्याप्ति
बोधं शब्दादिबोधतः ७२ व्याप्तिज्ञानं विना शाब्दादिबोधस्यानुभवसिद्धत्वात् नहि सर्वत्र शब्दश्रव
णानन्तरं व्याप्तिज्ञानेनमानमस्तीति किञ्च सर्वत्र शब्दस्थले यदि व्याप्तिज्ञानं कल्प्यते तदा सर्वत्रानुमिति
स्थले पदस्मरणा कल्पयित्वा शाब्दबोध एव किं न स्वीक्रियते मिति ध्येयम् ॥ त्रैविध्यमनुमानस्य केवला
न्वयिभेदतः द्वैविध्यं तु भवेद्व्याप्तेरन्वयव्यतिरेकतः अन्वयव्याप्तिरुक्तैव व्यतिरेकिरायथोच्यते ॥ अनु
मानं त्रिविधम् केवलान्वयि केवलव्यतिरेकि अन्वयव्यतिरेकिभेदात् तत्रासद्विपक्षः केवलान्वयी यथा
ज्ञेयमभिधेयत्वादित्यादौ तत्र हि सर्वस्यैव ज्ञेयत्वाद्विपक्षासत्त्वं ननु सर्वं धर्मो शगा व्याहतत्वात्केवला
न्वयिप्रसिद्धिरिति चेन्न व्याहतत्वस्य सर्वसाधारणत्वस्यैव केवलान्वयित्वात् किं च वृत्तिमदत्यन्ताभाव
प्रतियोगित्वं केवलान्वयित्वं तच्च गगनादौ प्रसिद्धम् असत्सपक्षः केवलव्यतिरेकी यथा पृथिवी इतर
भेदेभ्यो भिद्यते गन्धवत्त्वादित्यादौ तत्र हि जलादित्रयोदशभेदस्य पृथ्व मतिष्ठितत्वात्तिष्ठन्साध्यवतः स
पक्षस्याभावात् सत्सपक्षविपक्षोऽन्वयव्यतिरेकी यथा वह्निमान् धूमादित्यादौ तत्र सपक्षस्य महानसादे

र्विपक्षस्य जलह्रदादेस्सत्त्वादिति तत्र हि व्यतिरेकिणो व्यतिरेकव्याप्तिज्ञानं कारणं तदर्थं व्यतिरेकव्या-
प्तिर्निर्वक्ति साध्याभावव्यापकत्वे हेत्वभावस्य यद्भवेत् साध्याभावव्यापकीभूताभावप्रतियोगित्वमि-
मु॰व॰ त्यर्थः अत्रेदं बोध्यम् येन सम्बन्धेन यत्र येन रूपेण यत्र व्यापकता यत्सम्बन्धावच्छिन्न यद्धर्मावच्छिन्नप्र-
३६ तिगृह्यते तत्सम्बन्धावच्छिन्नप्रतियोगिताकतद्धर्मावच्छिन्नाभाववत्त्वज्ञानात् तत्सम्बन्धावच्छिन्नप्रति-
योगिताकतद्धर्मावच्छिन्नाभावस्य सिद्धिः इत्थं च यत्र विशेषणतासम्बन्धेनेतरत्वव्यापकत्वं गन्धात्य-
न्ताभावे गृह्यते तत्र गन्धात्यन्ताभावाभावेनेतरत्वात्यन्ताभावः सिद्ध्यति यत्र तु तादात्म्यसम्बन्धेने-
तरव्यापकता गन्धाभावस्य गृह्यते तत्र तादात्म्यसम्बन्धेनेतरस्याभावः सिद्ध्यति स एवान्योन्याभावः
न चात्र साध्याप्रसिद्ध्या पृथिवीतरभेदवतीत्यनुमितिर्न स्यात् विशेषणाज्ञानाभावादिति वाच्यम् पृथि-
व्यामितरात्यन्ताभाव इति हि प्रथमानुमितिस्ततः परमा पृथिवीतरभेदवतीत्यनुमितिः एवं यत्र संयोग-
सम्बन्धेन धूमे प्रतिसंयोगसम्बन्धेन वह्निव्यापकता गृह्यते तत्र संयोगसम्बन्धावच्छिन्नप्रतियोगि-
ताकवह्न्यभावेन जलह्रदे संयोगसम्बन्धावच्छिन्नप्रतियोगिताकधूमाभावः सिद्ध्यति अत्र च व्य-
तिरेकव्याप्तिग्रहे व्यतिरेकसहचारज्ञानं कारणम् केचित्तु व्यतिरेकसहचारेणान्वयव्याप्तिरेव ३६
गृह्यते न तु व्यतिरेकव्याप्तिज्ञानमपि कारणम् यत्र व्यतिरेकसहचाराद्व्याप्तिग्रहस्तत्र व्यतिरेकीत्यु

36

च्यते न च व्यतिरेकिणि साध्याप्रसिद्ध्या पृथिवीतरभेदवतीमनुमितिर्वीर्न स्यात् विशेषणाज्ञानाभावादिति।
वाच्यम् इतरभेदविशेष्यकाया एवानुमितेः स्वीकारात् यद्वा घटादावेवेतरभेदः प्रसिद्धः नचानुमा
नैवेयं पृथिवीत्वावच्छेदेनानुमितौ बाधकाभावात्तदवच्छेदेनाप्रसिद्ध्यावपि नानुपपत्तिः पक्षतावच्छे
दकावच्छेदेनानुमितौ तत्सामानाधिकरण्येन सिद्धेरप्रतिबन्धकत्वात् साध्यप्रसिद्धिस्तु घटादाववज्ञा
ता पश्चात् पृथिवीत्वावच्छेदेन साध्यत इति वदन्ति॥ अर्थापत्तेस्तु नैव पृथक्प्रमाणान्तरत्वमिष्यते यदि देकव्या
प्तिबुद्ध्या चरितार्था हि सा यतः अर्थापत्तिः प्रमाणान्तरमिति केचिन्मन्यन्ते तथाहि यत्र देवदत्तस्य श
तवर्षजीवित्वं ज्योतिःशास्त्रादवगतं जीविनो गृहासत्त्वं च प्रत्यक्षादवगतं तत्र शतवर्षजीवित्वान्यथा
नुपपत्त्या बहिःसत्त्वं कल्प्यत इति तदनुमानेन गतार्थत्वान्नेष्यते तथाहि जीवित्वस्य बहिःसत्त्वगृ
हसत्त्वान्यतरव्याप्यत्वं गृहीतं तत्रान्यतरसिद्धौ जायमानायां गृहसत्त्वबाधाद्बहिःसत्त्वमनुमितौ भा
सते एवं पीनो देवदत्तो दिवा न भुङ्क्ते रात्रौ पीनत्वस्य भोजनव्याप्यत्वावगमाद्भोजनं सिद्ध्यति इतरबा
धसहकाराद्व्यतिरेकीत्युच्यते अभावप्रत्यक्षस्यानुभाविकत्वादनुपलम्भोऽपि न प्रमाणान्तरम्।
किंचानुपलम्भस्य हेतुत्वे ज्ञानाकरणकत्वात्प्रत्यक्षं ज्ञानस्य हेतुत्वे तज्ज्ञाप्यानुपलम्भापि देऽस्मना।
वस्था एवं चेष्टापि न प्रमाणान्तरं तस्याः सङ्केतग्राहकशब्दस्मारकत्वेन लिप्यादिसमशीलत्वाद्बह

एवानुभावात् यत्तवाम्यादिग्रहस्तज्ज्ञानमितिचेवेत्ति सुखंनिरूपयति सुखंतुजगतामेवकाम्यंधर्मो।
द्भवं गाजायते काम्यमभिलाषविषयः धर्मेणेति धर्मत्वेन सुखत्वेन कार्यकारणभावइत्यर्थः दुःखंनि
रूपयति अधर्मजन्यंतुदुःखंस्यात्प्रतिकूलंसचेतसाम् अधर्मत्वेन दुःखत्वेन कार्यकारणभावइत्य
मु.व. ३७ र्थः प्रतिकूलमिति दुःखत्वज्ञानादेवसर्वेषांस्वाभाविकद्वेषविषयइत्यर्थः इच्छांनिरूपयति नि
दुःखत्वेस्सुखेचेच्छातज्ज्ञानादेवजायते॥ इच्छातुतदुपायेस्यादिष्टोपायत्वधीर्यदि इच्छाहिफलविष
37 यिणी उपायविषयिणीच फलंसुखंदुःखाभावश्च तत्रफलेच्छांप्रतिफल[illegible]णामतएव
फलंस्वतःपुरुषार्थःसंभवति यज्ज्ञानेसत्यच्छतितद्येष्यते तत्पुरुषार्थइतितल्लक्षणात् इतरेच्छां
प्रतीनेच्छाविषयत्वंफलितोऽर्थः उपायेच्छांप्रतीष्टसाधनताज्ञानंकारणम् चिकीर्षाकृतिसाध्यत्व
प्रकारेच्छातुयाभवेत् कृतिसाध्यत्वप्रकारिका कृतिसाध्यक्रियाविषयणीच्छाचिकीर्षा पाकं
कृत्यासाधयामीतितदनुभवात् तद्धेतुःकृतिसाध्येष्टसाधनत्वमतिर्भवेत् चिकीर्षांप्रतिकृतिसा
ध्यताज्ञानमिष्टसाधनताज्ञानंचकारणम् अतएववृष्ट्यादौकृतिसाध्यताज्ञानाभावान्नचिकी।
र्षा बलवद्विष्टहेतुमतिःस्यात्प्रतिबन्धिका बलवद्विष्टसाधनताज्ञानंतत्रप्रतिबन्धकमतोमधु ३७
विषसंपृक्तान्नभोजनेनचिकीर्षाबलवद्द्वेषःप्रतिबन्धकइत्यन्ये तदद्धेतुत्वबुद्धेस्तद्धेतुत्वकस्य

चिन्मते ऽबलवदनिष्टाजनकत्वज्ञानं कारणमित्यर्थः कृतिसाध्यताज्ञानादिमतो बलवदनिष्टसाधन
ताज्ञानशून्यस्य बलवदनिष्टाजनकत्वज्ञानं विनापि चिकीर्षायां विलम्बाभावात्कस्यचिन्मते इत्यस्व
रसो दर्शितः द्वेषं निरूपयति द्विष्टसाधनताबुद्धिर्भवेद्द्वेषस्य कारणम् दुःखोपायविषयकं द्वेषं प्र
तिबलवद्द्विष्टसाधनताज्ञानं कारणमित्यर्थः बलवदिष्टसाधनताज्ञानं तत्र प्रतिबन्धकम् ते
न नान्तरीयकदुःखजनके पाकादौ न द्वेषः प्रयत्नं निरूपयति प्रवृत्तिश्च निवृत्तिश्च तथा जीवना
कारणमीरितः एवं प्रयत्नस्त्रैविध्यं तान्त्रिकैः परिकीर्तितम् प्रवृत्तिनिवृत्तिजीवनयोनियत्नभेदात्प्रयत्न
स्त्रिविध इत्यर्थः चिकीर्षा कृतिसाध्येष्टसाधनत्वमतिस्तथा मधुविषसंपृक्तान्नभोजनादौ बलवद
निष्टानुबन्धित्वेन चिकीर्षाभावान्न प्रवृत्तिरिति भावः कृतिसाध्यताज्ञानादिवद्बलवदनिष्टाननुबन्धि
त्वज्ञानमपि स्वतन्त्रान्वयव्यतिरेकाभ्यां हेतोः कारणमित्यपि वदन्ति कार्यताज्ञानमेव प्रवर्तकमिति।
गुरवः तथाहि ज्ञानस्य प्रवृत्तौ जननीयायां चिकीर्षातिरिक्तं नापेक्षितमस्ति सा च कृतिसाध्यताज्ञा
नसाध्या इच्छायाः स्वप्रकारप्रकारकधीसाध्यत्वनियमात् चिकीर्षा हि कृतिसाध्यत्वप्रकारकेच्छा
तत्र कृतिसाध्यत्वप्रकारकत्वप्रकारके ज्ञानं चिकीर्षायां तद्द्वारा प्रवृत्तौ च हेतुः न त्विष्टसाधनताज्ञान
न तु हेतुः कृतिसाध्येपि चन्द्रमण्डलानयनादौ प्रवृत्त्यापत्तेः कृत्यसाधनताज्ञानं प्रतिबन्धकमिति चेन्न

तदभावाभेदयाकृतिसाध्यताज्ञानस्यलघुत्वात् नचद्वयोरपिहेतुत्वंगौरवात् ननुत्वन्मतेपिमधुवि
षसंपृक्तान्नभचारोचैत्यवन्दनेचप्रवृत्त्यापत्तिःकार्यताज्ञानस्यसत्वादितिचेन्न स्वविशेषणवत्ताप्रति
सन्धानजन्यकार्यताज्ञानस्यप्रवर्त्तकत्वात् काम्येष्टियागपाकादौकामनास्वविशेषणाम् ननस्यव
न्यु॰वि॰ लवदनिष्टाननुबन्धिकाम्यसाधनताज्ञानेनकार्यताज्ञानम् ननस्यप्रवृत्तिः तमस्यभोजनेनप्रवर्त्तते
३८ तदानीकामनायाःपुरुषविशेषणत्वाभावात् नित्येचशौचादिकेपुरुषविशेषणंतेननशौचादिज्ञा
38 नाधीनकृतिसाध्यताज्ञानान्नप्रवृत्तिः ननुतदपेक्षयालाघवेनबलवदनिष्टाननुबन्धीष्टसाधनता
विषयककार्यताज्ञानमेवहेतुरस्तु बलवदनिष्टाननुबन्धीष्टत्व इष्टोत्पत्तिनान्तरीयकदुःखा
जनकत्वंबलवद्द्वेषविषयदुःखाजनकत्वंवेतिचेन्न इष्टसाधनत्वयोर्युगपज्ज्ञानमशक्यत्वात् सा
ध्यत्वसाधनत्वयोर्विरोधात् असिद्धस्यतत्साध्यत्वंसिद्धस्यचसाधनत्वम् नचैकमेकेनैकदासिद्ध
मसिद्धंचेतिज्ञायतेतस्मात्कालभेदात् उभयंज्ञायतइतिमेवम्लाघवेनबलवदनिष्टाननुबन्धी
ष्टसाधनत्वेसतिकृतिसाध्यताज्ञानस्यहेतुत्वात् नचसाध्यत्वसाधनत्वयोर्विरोधः यदाकदाचि
त्साध्यत्वसाधनत्वयोरविरोधात् एकदासाध्यत्वसाधनत्वयोश्चज्ञानात् नवीनास्तु ममेदंकृ ३८
तिसाध्यमितिज्ञानेनप्रवर्त्तकम् अनागतेतस्यज्ञानमशक्यत्वात् किन्तुयादृशस्यपुंसःकृतिसाध्यं

यद्दृशत्वेस्य प्रतिसन्धाय तत्र प्रवर्तते तेनौदनकामस्य तत्साधनताज्ञानवतस्तदुपकरणवतः पाकः
कृतिसाध्यस्ताद्दृशश्चाहमिति प्रतिसन्धाय पाके प्रवर्तते इष्टपाकः तत्र स्वकाल्पतल्पिर्षादिग्रहतो
यौवने कामो दृष्टादिना संभोगादौ च तदभावात् इदं त्वबोध्यम् इदानीमिष्टसाधनत्वादिज्ञानं कृति।
साध्यताज्ञानं च प्रवर्त्तकम् तेन भाविनि यौवराज्ये बालस्य न स इतिस्तदानीं कृतिसाध्यत्वाज्ञानात् एवं तृ
प्तस्य भोजने न प्रवर्तते तदानीमिष्टसाधनत्वाज्ञानात् प्रवर्तते च रोषदूषितचित्तो विषभक्षणे च तदानीं
बलवदनिष्टाननुबन्धित्वज्ञानात् न चास्तिकस्यागम्यागमनशत्रुवधादिप्रवृत्तौ कथं बलवदनिष्टान
नुबन्धित्वबुद्धिर्नरकसाधनत्वज्ञानादिति वाच्यम् उत्कटरागादिना नरकसाधनताधीप्रतिरोधानात्
दृष्टादौ न कृतिसाध्यताज्ञानाभावान्न चिकीर्षा प्रवृत्ती किं त्विष्टसाधनताज्ञानादिच्छामात्रं कृति।
स्तु प्रवृत्तिरूपा बोध्या तेन जीवनयोनियत्नसाध्ये प्राणापञ्चकसंचारे न प्रवृत्तिः इत्थं च प्रवर्त्तकत्वा
न्नरोपाद्विधेवपि चायमर्थः इत्थं च विश्वजिता यजेतेत्यादौ यत्र फलं न श्रूयते तत्रापि स्वर्गः फलं क
ल्प्यते ननु अहरहः संध्यामुपासीतेत्यादौ इष्टानुत्पत्तेः प्रवृत्तिः कथम् न चार्थवादिकब्रह्मलोकादि
प्राप्तिः प्रत्यवायाभावो वा फलमिति वाच्यम् तथा सति काम्यत्वे नित्यत्वहान्यापत्तेः कामनाभावे क
रणतापत्तेश्च इत्थं च यत्र फलश्रुतिस्तत्रार्थवाद इति चेन्न ग्रहणाग्रहणाश्रयैः नित्यत्वनैमित्तिकत्वयो

शिवभरणीश्राद्धे काम्यत्वं नैमित्तिकत्वयोरिव नित्यत्वकाम्यत्वयोरप्यविरोधात् नच कामनाभावे ऽकर
णानापत्तिस्त्रिकालस्नववायावादाविव कामनासद्भाव एव कल्पनात् ननु वेदबोधितकार्यताज्ञानात्प्र
वृत्तिरिति चेन्न स्वेष्टसाधनत्वमज्ञायतादृशकार्यताज्ञानसहस्रेणापि प्रवृत्तेरसम्भवात् यद्यपि पराऽपू
मृ·वं· र्वं फलमिति तदपि न कामनाभावे करणानापत्तेस्तौल्यात् कामनाकल्पने त्वार्थवादिकफलमे
३९ वरात्रिसत्रन्यायात्कल्प्यताम् अन्यथा प्रवृत्त्यनुपपत्तेः तेनानन्त्यमिति तथा चान्ये प्रत्यवायस्मत्वते एवं
39 सन्ध्यामुपासते ये तु सततं शंसितव्रताः विधूतपापास्ते यान्ति ब्रह्मलोकमनामयम् एवं दद्याद
हरहः श्राद्धं पितृभ्यः प्रीतिमावहन् इति प्रीत्यादिकमेव फलमस्तु नच पितृप्रीतिः कथं फलं व्यधि
करणत्वादिति वाच्यम् गयाश्राद्धादाविवोद्देश्यत्वसम्बन्धेनैव फलजनकत्वस्य कल्प्यता
त् अत एवोक्तं शास्त्रदर्शितफलमनुष्ठातरीत्युत्सर्ग इति पितॄणां मुक्तत्वेन स्वस्य स्वर्गादिः फल
म् यावन्नित्यनैमित्तिकानुष्ठानस्य सामान्यतः स्वर्गफलजनकत्वात् पराऽपूर्वार्थे प्रवृत्तिश्चान
से भवति नहि नन्त्र दुःखाभाववत् स्वतः पुरुषार्थः न वा तत्साधने प्रत्यवायानन्त्यतो कथं प्रवृ
त्तिरिति चेदिष्यताम् यथा हि नित्याकृते प्रत्यवायाभावस्थितिस्तदभावेन तदभावः एवं प्रत्यवायाभा ३९
वसत्त्वे दुःखप्रागभावसत्त्वेन तदभावेन तदभाव इति योगक्षेमसाधारणाकारणतया दुःखप्रागभा

वेऽप्यनुपपन्नवचनत्वात् एवमेव प्रायश्चित्तस्यापि दुःखप्रागभावहेतुत्वमिति ननु नकलञ्जं भक्षयेदित्यत्र
विध्यर्थे कथं नञर्थान्वयः इष्टसाधनताभावस्य कृतिसाध्यताभावस्य च बोधयितुमशक्यत्वादिति चे
न्न नञ्वाच्यादिष्टसाधनत्वे कृतिसाध्यत्वे च न विध्यर्थः किन्तु बलवदनिष्टाननुबन्धित्वमात्रं तदभाव
श्चानभावो बोध्यते अथवा बलवदनिष्टाननुबन्धीष्टसाधनत्वे सति साध्यत्वं विध्यर्थः तदभावश्च नञा
बोध्यमानो विशिष्टाभावो विशेष्यवति विशेषणाभावे विश्राम्यति ननु श्येनेनाभिचरन्यजेतेत्यादौ
कथं बलवदनिष्टाननुबन्धित्वमर्थः श्येनस्य मरणानुकूलव्यापारस्य हिंसात्वेन नरकसाधनत्वा
त् न च वैधत्वान्न निषेध इति वाच्यम् अभिचारे प्रायश्चित्तोपदेशात् न च मरणानुकूलव्यापारमा
त्रं यदि हिंसा तदा खड्गकारस्यापि हिंसकत्वापत्तिः गललग्नान्नभक्षणजन्यमरणे चात्म
घातित्वापत्तिश्चेति वाच्यम् मरणोद्देश्यकत्वस्यापि विशेषणत्वात् अत एव तत्प्रमीतेलाभकस्य न हिंसा
त्वम् अन्योद्देश्यककर्मणा वा हतब्राह्मणस्य न वाचनिकप्रायश्चित्तमिति च न श्येनवारणाय दृष्टद्वा
रकत्वेन विशेषणत्वात् अत एव काशीमरणार्थं कृतशिवपूजादेरपि न हिंसात्वम् न च साक्षा
न्मरणजनकस्यैव हिंसात्वं श्येनस्तु न तथा किन्तु तज्जन्यादृष्टमिति वाच्यम् खड्गघातेन ब्राह्मणव्रणा
पाकपरम्परया म्रियमाणे हिंसात्वानापत्तेः अभिचारे प्रायश्चित्तोपदेशस्तु नैमित्तिककर्माधिकारे वर्णितो

हिंवयोयत्रमत्रसाद्ग्यन्ततंवदेत् तत्पावनायकर्तव्यश्चरुः सारस्वतो द्विजैरित्यादिकमपिपतेनव्याख्यात
म् केचित्तुश्येनस्यहिंसाफलंनतुमरणं तेनश्येनजन्यखड्गाभिघातादिरूपाहिंसाभिचारपदार्थस्त
न्यु॰व॰ स्यचपापजनकत्वमतः श्येनस्यैवयत्वान्यापाजनकत्वेपिअग्निमपापंप्रतिसन्यायसमोनप्रवर्ततेइत्या
८० हुः आचार्यास्त्वत्राभिप्रायोविध्यर्थः पाकंकुर्यादित्यादावाज्ञादिरूपेच्छावाचित्ववल्लिङ्मात्रस्ये
च्छावाचित्वंलघुत्वात् एवंचस्वर्गकामोयजेतेत्यादौयागःस्वर्गकामकृतिसाध्यत्वेनाप्तेष्टइत्यर्थः।
ततश्चाप्तेष्टत्वेनेष्टसाधनत्वादिकमनुमायप्रवर्तते कलंजभक्षणादौतदभावान्नप्रवर्तते यस्तु
वेदेपौरुषेयत्वेनाभ्युपैतितंप्रतिविधिरेवतावद्दुर्भरइत्याह क्रमात्प्रयोगेमानम् नचकर्तुरस्म
रणाद्बाधकम् कपिलकणादादिकमारभ्याद्यपर्यन्तेकर्तुःस्मरणस्यैवप्रतीयमानत्वात् अन्यथा
स्मृतीनामप्यकर्तृकत्वापत्तेः तत्रैवकर्तुःस्मरणमस्तीतिचेद्वेदेपिछन्दांसिजज्ञिरेतस्मादित्यादिक
र्तृस्मरणमस्त्येव एवंप्रतिमन्वन्तरेचैषाश्रुतिरन्याविधीयतेइत्यपिद्रष्टव्यम् स्वयंभूरेषभगवा
न्वेदोगीतस्त्वयापुरा शिवाद्याऋषिपर्यन्ताःस्मर्तारोस्यनकारकाइतिवेदस्यस्तुतिमात्रम् नचपौ
रुषेयत्वेभ्रमादिसम्भवादप्रामाण्यंस्यादितिवाच्यम् नित्यसर्वज्ञप्रणीतत्वेननिर्दोषत्वात् अत ८०
एवपुरुषान्तरस्यभ्रमादिसम्भवान्नकपिलादेरपिकर्तृत्वदेवस्य किंतुवर्णानामेवानित्यत्वस्यवा।

द्वमागत्वात्तन्तरेतन्तस्य स्वेदस्यानिवदनित्यत्वमिति॥ उपादानस्य चापरोक्ष्यं प्रवृत्तौ जनकं भवेत् निवृत्ति
स्तु भवेद्द्वेषाद्दुष्टसाधनताधियः॥ उपादानस्य समवायिकारणस्य प्रत्यक्षं प्रवृत्तौ कारणमिति।
निवृत्तिं विनिर्दिष्टसाधनताज्ञानस्य दुःखसाधनविषयकृतिं निवृत्तिं प्रति जनकत्वमन्वयव्यतिरेका
दवधारितमिति भावः॥ यत्नो जीवनयोनिस्तु सर्वदातीन्द्रियो भवेत्॥ जीवनयोनियत्नो यावज्जी
वमनुवर्तते स चातीन्द्रियः तत्र प्रमाणमाह॥ शरीरे प्राणसंचारे कारणं तत्प्रकीर्तितम्॥ प्राणसं
चारो हि श्वासादिः प्रयत्नसाध्यः इत्येवं च प्राणसंचारस्य सर्वस्य यत्नसाध्यत्वानुमानात्।
प्रत्यक्षयत्नस्य गत्या तत्रातीन्द्रिययत्नसिद्धिः स एव जीवनयोनियत्नः॥ गुरुत्वं निरूपयति॥ अतीन्द्रि
यं गुरुत्वं स्यात्पृथिव्यादिद्वये भवेत् अनित्ये तदनित्यं स्यान्नित्ये नित्यमुदाहृतम् तदेवासमवायि
स्यात्पतनाख्ये तु कर्मणि॥ अनित्ये द्व्यणुकादौ तद्गुरुत्वमनित्यं नित्ये परमाणौ नित्यं गुरुत्वमित्यनुवर्तते
तद्गुरुत्वमसमवायि असमवायिकारणम् पतनेत्याद्यपतने इत्यर्थः॥ द्रवत्वं निरूपयति सांसिद्धि
कं द्रवत्वं स्यान्नैमित्तिकमथापरम् सांसिद्धिकं तु सलिले द्वितीयं क्षितितेजसोः॥ द्रवत्वं द्विविधं सां
सिद्धिकं नैमित्तिकं चेत्यर्थः द्वितीयं नैमित्तिकम्॥ परमाणौ जले नित्यमन्यत्रानित्यमुच्यते॥ जलप
रमाणौ द्रवत्वं नित्यमित्यर्थः॥ अन्यत्र पृथिवीपरमाण्वादौ जलद्व्यणुकादौ च द्रवत्वमनित्यं तत्र चिन्ते

जसिक्तस्य चिन्तपृथिव्यां चैवनैमित्तिकं द्रवत्वम् तस्य स्वर्णादिरूपे तेजसि हुतजतुप्रभृतिपृथिव्यां च वर्त्त
नेत्यर्थः॥ द्रवत्वं स्यन्दनहेतुरितिमितं संग्रहे हेतुत्व॥ हेतुरिति असमवायिकारणमित्यर्थः संग्रहे
सक्त्वादिसंयोगविशेषेणेत्येवं स्नेहसहितमिति वोद्धव्यं तेन कुतस्वर्णादिना न संग्रहः स्नेह
त॰व ५१ निरूपयति॥ स्नेहो जले नित्योणुमात्रवतितेवावयविन्यसौ॥ जलवृत्ति जलएवेत्यर्थः असौ स्नेहः
ननु पृथिव्यामपि तैलेन स्नेह उपलभ्यते तथा सौ जलीयः तथा सति दहनप्रातिकूल्यस्यादत
41 आह॥ तैलान्तरे तत्प्रकर्षाद्दहनस्यानुकूलता॥ ५०॥ तत्प्रकर्षात् तैलोपलभ्यमानस्नेहस्यापि जल
लीयएवतस्य प्रकृष्टत्वाद्गुणानुकूल्यम् अपकृष्टस्नेहं हि जलं वह्निं विनाशयतीति भावः संस्का
रं निरूपयति॥ संस्कारभेदो वेगोथ स्थितिस्थापकभावने॥ वेगः स्थितिस्थापकभावनाभेदात्संस्का
रस्त्रिविध इत्यर्थः वेगो मूर्त्तिमात्रे तु वेगः स्यात् कर्मजो वेगजः क्वचित्॥ कर्मजवेगजभेदाद्वेगो द्वि
विध इत्यर्थः शरीरादौ चैवनोदनाज्जनितेन कर्मणा वेगो जन्यते तेन च पूर्वकर्मनाशस्तत्र उत्तरक
र्म एवमग्रेपि विना च वेगे कर्मणः कर्मप्रतिवन्धकत्वात्पूर्वकर्मनाशे उत्तरकर्मोत्पत्तिर्न स्या।
न यत्र च वेगवता कपालेन च जनिते घटे वेगो जन्यते स वेगजो वेगः॥ स्थितिस्थापकसंस्कारः क्षिता। ५१
वौ केचिच्चतुर्ष्वपि अतीन्द्रियोसौ विज्ञेयः क्वचित्स्पन्देपि कारणम्॥ ५१॥ आकृष्टशाखादीनां पा।

तित्यागेपुनर्गमनस्यस्थितिस्थापकसाध्यत्वात् केचिदिति चतुर्ष्वित्यादिषु स्थितिस्थापकं केचिन्मन्य।
न्ते न तदप्रमाणमिति भावः अयं सौ स्थितिस्थापकः क्वचिदाकृष्टशाखादौ ॥ भावनाख्यस्तु संस्कारो जीव
वृत्तिरतीन्द्रियः उपेक्षानात्मकस्तस्य निश्चयः कारणं भवेत् भावनाख्य इति तस्य संस्कारस्योपेक्षा।
त्मकज्ञानात्संस्कारानुत्पत्तेरुपेक्षानात्मक इत्युक्तं तत्संशयात्संस्कारानुत्पत्तेर्निश्चय इत्युक्तं तेनोपे
क्षान्यनिश्चयत्वेन संस्कारं प्रति हेतुत्वमिति भावः ननु स्मरणं प्रत्युपेक्षान्यनिश्चयत्वेन हेतुत्वे तेनोपेक्षा
दिस्थले न स्मरणम् इत्थं च संस्कारं प्रति ज्ञानत्वेन हेतुत्वमस्त्विति चेन्न विनिगमनाविरहेपि संस्कारं
प्रत्युपेक्षान्यनिश्चयत्वेन हेतुतायाः सिद्धत्वात् किंचोपेक्षास्थले संस्कारकल्पनायां गुरुत्वात् संस्का
रं प्रति चोपेक्षान्यत्वेन हेतुतायाः सिद्धत्वात् न च प्रमाणं दर्शयति ॥ स्मरणे प्रत्यभिज्ञायामप्यसौ हेतु
रुच्यते ॥ असौ संस्कारो यतः स्मरणं प्रत्यभिज्ञां च जनयति अतः संस्कारः कल्प्यते विना व्यापारं पूर्वा
नुभवस्य स्मरणादिजननासामर्थ्यात् स्वस्वव्यापारान्यतराभावे कारणत्वासम्भवात् न च प्रत्यभि
ज्ञां प्रति तत्तत्संस्कारस्य हेतुत्वे न प्रत्यभिज्ञायाः संस्कारजन्यत्वेन स्मृतित्वापत्तिरिति वाच्यम् अप्रयो
जकत्वात् परे त्वनुद्बुद्धसंस्कारात्प्रत्यभिज्ञानदर्शनादुद्बुद्धसंस्कारस्य हेतुत्वापेक्षया तत्र स्मरणस्यैव
प्रत्यभिज्ञां प्रति हेतुत्वं कल्प्यत इत्याहुरिति अदृष्टं निरूपयति ॥ धर्माधर्मावदृष्टं स्याद्धर्मः स्वर्गादिकारणम् ॥

मू स्वर्गादीति स्वर्गादिसकलसुखानां स्वर्गमापनीभूतशरीरादीनां च साधनं धर्म इत्यर्थः तत्र प्रमाणं दर्श
यतिमाह यागादिगङ्गास्नानादिव्यापारः सन्नकीर्तितः यागादिव्यापारतया धर्मः कल्प्यते अन्य
था यागादीनां चिरविनष्टतया तद्व्यापारतया वा कालान्तरभाविस्वर्गजनकत्वं न स्यात् तदुक्तमाचार्यैः
मु॰व॰ चिरध्वस्तं फलायालं न कर्मातिशयं विनेति ननु यागध्वंस एव व्यापारः स्यात् न च प्रतियोगितद्ध्वं
४२ सयोरेकत्राजनकत्वं सर्वत्र तथात्वे मानाभावात् न च तन्मते फलानन्त्यम् तन्मते चरमफलस्यापूर्व
42 नाशकत्वात् तथात्वमिति वाच्यम् कालविशेषस्य सहकारित्वादित्यत आह गंगास्नानेति गं
गास्नानस्य हि स्वर्गजनकत्वे तेषां जलसंयोगध्वंसानां व्यापारत्वमपेक्ष्यैकमपूर्वं कल्प्यते लाघ
वादिति भावः ननु ध्वंसोपि न व्यापारोस्तु न च निर्व्यापारस्य चिरध्वस्तस्य कथं कारणत्वमिति वा
च्यम् अनन्यथासिद्धनियतपूर्ववर्तित्वस्य तत्रापि सत्वात् अव्यवहितपूर्ववर्तित्वं हि चक्षुःसंयो
गादेः कारणत्वे न तु सर्वत्र कार्यकालवर्तित्वमिव समवायिकारणस्य कारणत्वे कालविशेषणा
सहकारित्वाच्च नातिप्रसंग इत्यत आह कर्मनाशाजलस्पर्शादिनानाश्यत्वसंभवः मू यदि ह्य
पूर्वं न स्यात्तदा कर्मनाशाजलस्पर्शादिना नाश्यत्वं धर्मस्य न स्यात् न हि तेन यागादेर्नाशः प्रतिबं
धो वा कर्तुं शक्यते तस्यापूर्वमेव हतत्वादिति एतेन देवताप्रीतिरेव फलमित्यपास्तम् गङ्गास्ना ४२

नादौसर्वत्रैवतत्प्रीतिरसम्भवात् देवतायाश्चानन्तत्वेपितत्प्रीतेरनुद्देश्यत्वात् प्रीतेःसुखस्वरूपत्वेना
विष्णुप्रीत्यादेरनरसम्भवात् जन्यसुखादेस्तत्राभावात् तेनविष्णुप्रीतिजन्यत्वेनपराभिमतस्वर्गादिरे
वविष्णुप्रीतिशब्देनलक्ष्यते अधर्मोनरकादीनांहेतुरिति नरकमत्रउक्तनरकदुःखादिसकलदुःखानां
नारकिशरीरादीनांचसमाचनमधर्मइत्यर्थः तत्रप्रमाणमाह प्रायश्चित्तादिनाशेषोजीवहतीत्यधर्मोग्रा
हेण इदश्च यदिह्यधर्मोनस्यात्तदाप्रायश्चित्तादिनाश्यत्वंनस्यात् नहितेनब्रह्महननादीनांनाशःप्रतिव
न्धोवाविधातुंशक्यतेतस्मादेवविनश्यत्वादितिभावः जीवेति इश्वरेच्छयाधर्माधर्माभावादितिभावः इमो
त्ववासनाजन्योज्ञानादपिविनश्यतः उभौधर्माधर्मौ वासनेति अतोज्ञानिनाकृतेऽपिसुकृतदुष्कृ
तकर्मणिनफलयोगमितिभावः ज्ञानादपीत्यपिनाभोगपरिग्रहः ननुतत्वज्ञानस्यकथंधर्माधर्म
नाशकत्वम् नाभुक्तंक्षीयतेकर्मकल्पकोटिशतैरपीतिवचनविरोधात् इत्यंचतत्वज्ञानिनाऽरीर
य तिकायव्यूहेनसकलकर्मणांभोगेनक्षयइतिचेन्न तत्रभोगस्यैवदोषिनतनाशकोपलक्षकत्वात् कथ
मन्यथाप्रायश्चित्तादिनाकर्मणोनाशः तदुक्तम् ज्ञानाग्निःसर्वकर्माणीत्यादिनायतेचास्यकर्मा
णीति ननुतत्वज्ञानिनस्तद्देहशरीरावस्थानेसुखदुःखादिकंचनस्यात्ज्ञानेनसर्वेषांकर्मणांनाशा
दितिचेन्न प्रारब्धेतरकर्मणामेवनाशात् तच्छरीरेभोगजनकंयत्कर्मतत्प्रारब्धंतदभिप्रायमेवनाभुक्त

मिति वचनमिति शब्दं निरूपयति शब्दो ध्वनिश्च वर्णश्च मृदङ्गादिभवो ध्वनिः कण्ठसंयोगादिजन्या वर्णा
स्ते कादयो मताः सर्वः शब्दो नभोवृत्तिः श्रोत्रोत्पन्नस्तु गृह्यते ॥ नभोवृत्तिरिति आकाशसमवेतः इत्यस्य शब्दस्यायं ग्रह
णादाह श्रोत्रेति ननु भेर्यादिदेशावच्छिन्नः शब्दः श्रोत्रे कथमुत्पत्तिरित्यत आह ॥ वीचीतरङ्गन्यायेन तदुत्पत्तिस्तु ।
मु॰व॰ कीर्तिता ॥ आद्यशब्दस्य व्यापकः वहिर्दशदिगवच्छिन्नोन्यः शब्दस्तेनैव शब्देन जन्यते तेनैवापरस्तद्व्यापक
४३ एवं क्रमेण श्रोत्रोत्पन्नो गृह्यत इति ॥ कदम्बगोलकन्यायादुत्पत्तिः कस्यचिन्मते ॥ आद्यशब्दाद्दशदिक्षु
दश शब्दा उत्पद्यन्त इति भावः अस्मिन्मते कल्पनागौरवादुक्तं कस्यचिन्मत इति ननु शब्दस्यानित्यता
43 उत्पत्तिकथनमसङ्गतमत आह ॥ उत्पन्नः को विनष्टः क इति बुद्धेरनित्यता ॥ शब्दानामुत्पादविनाशशालि
त्वादुत्पत्तिकथनं सङ्गतमत आह ॥ तदनित्यत्वमित्यर्थः ननु स एवायं ककार इत्यादि प्रत्यभिज्ञानाच्छब्दा
नां नित्यत्वम् इत्थं चोत्पादविनाशबुद्धिर्भ्रम एवेत्यत आह ॥ सोऽयं क इति बुद्धिस्तु साजात्यमवलम्बते ॥
तदेवौषधमित्यादौ सजातीये पि दर्शनात् तस्मात् नित्या एवेति वर्णाः सर्वमतेन हि नः ॥ ९६ ॥ तत्र प्रत्यभिज्ञा
नस्य सत्सजातीयत्वविषयो न तु तद्व्यक्त्यभेदो विषयः उक्तप्रतीतिविरोधात् इत्थं च तयोरपि बुद्ध्योर्न भ्र ४३
मत्वमिति ननु सजातीये सोऽयमिति प्रत्यभिज्ञा कथं स्यादित्यत आह तदेवेति यदौषधमन्येन कृतं
तदेवौषधं मयापि कृतमित्यादि दर्शनादिति भावः ॥ इति श्रीमहामहोपाध्यायविश्वनाथपञ्चानन

भट्टाचार्यविरचिता सिद्धान्तमुक्तावली संपूर्णा ॥ तर्कपारावारविन्दुवर्षिकामेहसेनाभसेज्ञाख्य
वोरे सिद्धान्तनामावलीमलिलेख स्वात्मप्रीत्यै जीवनोमौक्तिकानाम् ॥ शुभमस्तु सर्वजगताम्

मु·व·

न्यायाः

४४ 44

वीचीतरंग
कदम्बगोलक
हारमध्यमणिः
तक्रकौण्डिन्यः

ब्राह्मणश्रमण
स्थालीपुलाकः
स्थूणानिखनन
सूचीकटाह
काकतालीय

दण्डापूप
खलेकपोत
चित्रतुरग
कैमुतिक
काकाक्षिगोलक
मण्डूकप्लुति

घट्टकुटीप्रभातः
अन्धगोलाङ्गूलः
जात्यन्धगज
प्रधानमल्लनिबर्हण
काकोलूक
उष्ट्रलगुड

गोमयपायसीय
भिक्षुकपादप्रसारण
देहलीदीप
स्वामिभृत्य
अरुन्धतीस्थूला
गुडजिह्विका

इति न्यायाः ॥